CC-0. Digitized by eGangotri and MIDF - Delhi



सिद्धान्तव्याप्तिनिरूपणम्

'सिद्धान्तलक्षण प्रकरणम्'

सम्पादको व्याख्याकारश्च

प्राध्यापक- डॉ. गोविन्द चौधरी

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

।। श्रीः ।।

सिद्धान्तव्याप्तिनिरूपणम्

''सिद्धान्तलक्षण प्रकरणम्''

सम्पादको व्याख्याकारश्च

प्राध्यापक- डॉ. गोविन्द चौधरी

(विद्यावारिधि) प्र. श्रेणी, ''आत्मतत्त्व विश्लेषणम्'' पौरसत्य पाश्चाह्न पथेन''

श्री.पू.म.वाट प्राप्त- स्वर्णपदक (विद्यापति वनौली, जनकपुर धामस्थः

''तिथि-२०२९ ई.'' माघे- ६- फरवरी,

''स्वतो ग्राह्यत्वम्'' प्रमात्वम्'' (प्रमात्व विचारः)

चौखम्बा संस्कृत पुस्तकालय

वाराणसी

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकाशक:

चौखम्बा संस्कृत पुस्तकालय

पत्रमञ्जूषा-संख्या १०९१

सी.वो. २८/१५, ज्ञानवापी, चौक

वाराणसी- २२१००१ (भारत)

@ लेखक :

प्रथम संस्करण: सन् २०२१ ई.

विक्रम सम्बत् २०७६८

मूल्य: ४००.००

मूद्रक: **चौखम्बा प्रेस**

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

"श्री गणेशायनमः"

भूमिका

आनन्दैकपरे चिदात्मनि रसे ब्रह्मम्युमाश्लेषतो यत्रैश्वर्यवंती श्वरेत्यभिधयेकान्ति क्युपेतास्थितः तस्यैकस्य शिवस्य भाविक गुण प्रोदमासिभेदो परांविश्वोत्पत्त्यवनक्षयक्षमतमां मूर्तिर्त्र्यी तो नुमः।। अथ तर्क सरसीरुहकाननेषुतत्त्वचिन्तामणिः गङ्गेशो पाध्यायस्य न्यायदर्शनस्य प्रमाणमात्रं करतलीकृत्यं प्रणीत इति विदितमेवेति निश्चयं प्रत्येमि।

तत्र षोडश पदार्थेषु विवेचनीयेषु समस्यर्हितत्वेनसकल पदार्थमूलकत्वेनच प्रमाणस्यैव प्राथम्येनोपादादानं वरीवृतीति । अतस्तदधि कृत्यैव तत्त्वचिन्तामणे निर्माणणम् । इतएव च नव्य न्यायस्यारम्भः।

एतस्मात् प्राक आचार्योदयनं मणिकण्ठ शशधरतरणिमिशअरादिभिः प्रणीतेषु न्यायरत्न न्यायसिद्धान्तपीपरत्नकोषादि ग्रन्थेष्वन्यत्र च नव्यन्यायस्य स्वरूपमुपलभ्यते । अतएवाचार्योदयनं प्राच्य नव्य व्याययोः मध्यमणितया विराजत इति न्यायशास्त्र विवेचकाः। तथापि प्रमाणप्रदर्शन कौशलं मितेन सारेण वचसा पदार्थो पस्थापन पार्श्व लेखन चातुर्यं च गङ्गेशोपाधाययमेव नव्यन्यायसेयद् भावकतया परिगृह्णन्ति स्वयमाप्यसौचिन्तमणि प्रारम्भ व्याचष्टे-

अन्वीक्षा नयमाकलस्य गुरुमिर्ज्ञात्वागुरुणां मतं चिन्तादि व्यविलोचनेनचतयोः सारंविलोक्याखिलम् । तन्त्रेदोषगणेनदुर्गमतरे सिद्धान्त; सारं विलोक्याखिलम् । तन्त्रदोषगणेन दुर्गमतरे सिद्धान्तक्षागुरु-र्गङ्गेशस्तनुते मितेन वचसा श्रीतत्त्व चिन्तमणिम् ।। यतो मणः पण्डित मण्डन क्रिया प्रचण्डपाखण्ड तमस्ति स्क्रियाविपक्ष पक्षे न विचार चातुरी नवच स्वसिद्धान्तवचोदरिद्राता । इति चिन्तामणावलोक्यते ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एतावताप्रबन्धवचसा विज्ञायते यत् श्रीमतः गङ्गेशोपाध्यायस्य चिन्तामणोवेवनव्यन्यायस्योद्भवऽत्र गुरुविष्य परम्पारप्राप्त विद्या विवेचनाय च मीमांसा विचार झझावातोद् धूत पक्ष प्रतिपक्षतयासमायात विशेषेण प्रभाकरादि विचार पूर्वकं निराकरणं च विद्यात एव ।

एतेन न्यायमीमासाशास्त्रयो गुरुपरम्परापारं पर्येण समायातस्य विशेषेण पभाकरादिसम्मत विचार गभीरस्य सम्यक् गुणोपादन विचार पूर्वकत्वेन निराकरणं च विद्यत एवेति सत्यं प्रतिभाति।

तत्राणि प्राचीन न्याये बौद्धा चार्याणां सिद्धान्तैः सार्कन्यायाचार्याणां विचार सरस्वती प्रतिस्पर्धा सुस्पष्ट भवलोक्यकपते विदुषां निवहैः। अतएव न्याय वार्तिकारम्भे उद्योतकराचार्यःप्रतिपादयति वचनभिदं यत् —

कुतार्किक ज्ञान निवृत्ति हेतुः करिष्यते तस्य मया निबन्धः। पद्योस्मिन् कुतार्कि क पदेन बौद्धाचायोऽमिप्रते इति नैव तिरोहितं विदुषासमाजे। तेनतात्पर्य टीकायां श्रीमान् वा चस्यति मिश्रः वातकिोपरिदूषण पङ्कप्रक्षालनोद्देश्यत्वेनधर्मकीर्ति प्रमुखान् बौद्धाचार्या नमिलक्ष्य निर्दिशति यत् इच्छामि किमपिपुण्यं दुस्तर कुमिबन्ध पङ्क भगनानाम् । उद्योत गवी नामति जरतीनां समुद्धरणात् ॥

पररिस्मन् पक्षे ज्ञान श्री मित्रीमिध; बौद्धाचार्यः श्रीमन्त वा चस्पतिमिश्रं तदीयंगुरुचरणं त्रिलोचनाचार्यं न्यायमूषणस्य प्रणेतारमा सर्वज्ञं तत्समय प्रसिद्धः शङ्कराधिं शङ्करमिश्र न्यायवेदिकायाः स्तम्भचतुष्टयात्मकतया स्वकीये निबन्धे निबन्धावली मुल्लिखति तन्मतानि नाम ग्राहमषाक तुंम् । तथाच -

दुनीताश्रयवेदिका दृढतरस्तम्भामून् शङ्कर न्यायोलक्ष्करण त्रिलोचन

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वाचस्यत्याह्वयान् हेल्या। उष्मूल्य क्षण मङ्ग एवं विहितः श्रीङ्करेण स्वयम् ।

एव मुदयनाचार्यस्तु न्यायकुसुमानजलावात्मतत्त्व विवेके परशिुद्धौ चार्युं ज्ञान शअरीमित्रं नियुगं निराकरोति । इत्युदयाना चार्यो वितस्तु विदुर्षां समाजे प्रसिद्ध तमैव वरीवृतीति ।

अतःएव पश्चात् ह्रासोम्मुखे बौद्ध सिद्धान्ते संजात् प्रवल्ये मीमांसकानां रद्धान्ते तदीयैरेवसिद्धान्तैस्तत्रापि विशेषेण प्रभाकरैः सार्कं न्याय सिद्धान्त परिपालन तत्पएणां श्रीमतां गंगेशोपाध्यायानां नैयायिकानां सारखतः कलहः प्रमुखं स्थान मलभत ।

तस्मात् श्रीमतां पदवाक्यन्यायपारावारपारीण प्रवीणानां तथाचार्याणांसदोक्तिः संगच्छते ।

उदयतिदिशि यस्यां भानुमान् सैव पूर्वानहि तरणि रुदीप्ते दिक पराधीन वृत्तिः ।

(न्यायकुसुमञ्जलिः)

अथएवालोक व्यायातः परिशुद्धिदर्पण व्याख्याकारः वटेश्वरोपाध्याय प्रपौत्र यज्ञयत्युपाधायायः चिन्तामणि प्रमायां प्रतिपादिवान् वचनमिदम् ।

अतएवेक्तिः संगच्छतेयत् मिश्राणांमुपाध्यायैःसह सगोत्रकलहोऽवशिष्यते । तादृश विचारसन्दर्भं समवेक्ष्य सिद्धान्त लक्षण चिन्तामणि जो गदीशीव्याख्यान वलोयां सादर मुवाचविदुषां राद्धान्तः ।

अतसीपुष्पं सङ्कशे न्यायो ज्ञेयो पिश्चिता सिंहास्यो दक्षिणं सूत्रं ध्वजं वाम करेदशान् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इत्यलै वाक्य कदम्बेन ।

एश्वर्यमदमत्तोऽसि मानवज्ञान वर्तसे ।
समायातेपुनवैद्धे भवधीन तवस्थितिः इत्याचार्यः ।।

एवमन्यत्रापि वृद्धवाचस्पति मिश्रोऽपि तात्पर्य टीकायां मङ्गमाचरन्नमिदधाति, तमेव पक्षं विपरिवर्त्य तात्पर्य टीकायांमङ्गल माचरन् अभिदधाति यत् —

इच्छामि किमपि पुण्यं दुस्तर कुनिबन्ध पङ्क मग्नानाम् ।

उध्योतकर गवीना मतिजरतीनांसमुद्धरणात् ।।

ग्रन्थ व्याख्यानव्याजेनैव बौद्धानामाक्षेपजात मपाकृत्य वार्तिकाशय मपाकृत्य विरजस्कं विद्यातुंप्रयतते- तथाच-

ग्रन्थव्याख्या व्याख्या व्याजेनैव बौद्धानामाक्षेपं निरस्य वार्तिकाशयं प्रकाश्य पद्यमिदं व्याजहार

ग्रन्थ व्याख्याच्छलेनैव निरस्ताखिल दूषणा, न्याय वार्तिक तात्पर्य टीका स्मामि र्विधास्यते।।

एवं च-

क्रूराऽकृताञ्जलि रयं बलिरेवदत्तः कायो मया प्रहरतात्र यथमिलाषम् ।
अभ्यर्थये वितथवाङ् मय पांसुवर्षैमायाविलीकुरुत कीर्ति नदीः परेषाम् ।।

गवेषकरणां धारणास्ति यदयं वाचस्पतिमिश्रः शङ्कर भगवत् पादापेक्षया ब्रह्मसिद्दिकृतो यदयं मण्डनमिश्रतोधिकं प्रभावितोस्ति, किन्तु ब्रह्मसिद्धे; सम्बद्द प्रकरणेननास्य संजायते पुष्टिः । तस्मान् मन्ये वाचस्पति मिश्र स्तेन सम्प्रदायेन सम्बद्ध आसीन्नवेति विदुषां विचार प्रवाह एवेति पर्याप्तं प्रमाममिति मन्ये ।

परिस्थित्यामस्यं अलौकिकोपि सामान्यलक्षणा प्रत्यसत्तिः सन्निकर्षः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वीकर्तव्यएवादस्ते ।हेतुनामुना रधुनाथशिरोमणिममिलक्ष्य श्रीमान् मिश्रः न्यायशिरोमणिः पक्षधर मिश्रोऽगादीत् वचनमिदम् ।

वक्षोषपानकृत् काण संशये जाग्रतिस्फुरम् ।

सामान्यलक्षणाकस्मादकस्मादपलप्याते । इथ्यादयो विषयाः नितए भवगन्तव्याः ।

एवं न्यायशिरोमणिगङ्गेशोपाध्याय कृत चिन्तमणि व्याप्ति सस्वरूप व्याख्यानं तर्कालङ्काकृतं सिद्धान्त लक्षण प्रकरणं समेषां व्युत्पत्ति लिप्सूनां छायामां सौकार्य कारण ममिगम्य दुखगाहामा विषयाणां संकलय्य सरलया माषया प्रकाशयितुमिच्छामि ।

तत्रक्वचित् प्रमाद पारतन्त्रयेम सं नाताशुद्धतरं संशोध्य द्रक्ष्यन्ति शअरीमन्तः एतएवोक्तिः कौटिल्यस्य-

प्रदीप; सर्वविद्यानामुपायः सर्वकर्मणाम् ।
आश्रयः सर्वधर्माणां शाश्वदान्वीक्षिकीमता ।।

अथच—

मोहं रुमाद्दि विमली कुरुते च बुद्धिम् । सूतेच संस्कृत पद व्यवहारशक्तिम् ।
शास्त्रन्तराभ्यासनयोग्यतया पुनक्ति तर्कश्रमो न तनुते कमिदो पकारम् ।

।। आचार्य'' कुमारिल भट्ट।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विषयानुक्रमणिका

''सिद्धान्त व्याप्ति निरूपणम्''

''सिद्धान्त लक्षण प्रकरणम् ''

१. चिन्तामणि सिद्धान्त लक्षणम्

२. शिरोमणि दिशा सिद्धान्त व्याप्ति लक्षणम्

३. मूलेनञ् व्यत्यासः

४. अनवच्छेदकत्वानुसरणम्

५. तस्यौचित्यम्

६. साध्यतावच्छेदकेतरोभयानवच्छित्व विचारः

७. तस्यावश्यकत्वम्

८. पर्याप्ति विचारः

९. तदनवच्छेदकत्वानुसारणस्य वैयर्थ्यम्

१०. तर्कालङ्कार दिशा नास्ति पौन रूक्त्यम्

११. दण्डिमान् दण्डिसंयोगादित्यत्राव्याप्तितन्निरास निरूपणम्

१२. दण्डयादौ साध्ये परम्परया तदवच्छेदकत्वम्

१३. केचित्तु विचारे तन्निरूपणम्

१४. यद्रूय विशिष्ट फलम्

१५. शिरोमणिदिशा व्याख्यानम्

१६. तत्रालङ्कादिशा तन्निरूपणम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

१७. द्रव्ये विशिष्ट सत्त्वादित्यादौ तन्निरूपणम्

१८. दीधितौ- वस्तुतस्तु कल्यविचार:

१९. प्रतियोग्यसमानाधिकरणान्त निरूपणम्

२०. शिरोमणिदिशातन्निरूपणम्

२१. संयोग सामान्यभाव निरूपणम्

२२. तत्र प्रमाणस्यौचित्यम्

२३. तर्कालङ्कार दिशा व्याख्यानम्

२४. तत्र शब्दमण्यालोकस्य प्रामाण्यम्

२५. शिरोमणिविचार निरूपणम्

२६. प्रकारान्तरेण तस्यौचित्यम्

२७. तर्कालङ्कार दिशा तन्निरूपणम्

२८. प्रतियोग्य सामानाधिकरण्य परिष्कार:

२९. तत्र शिरोमणि विचार:

३०. सम्प्रदायविर्दा विचार:

३१. शिरोमणिदिशा तन्निरूपणम्

३२. चकूकादि प्रसङ्ग निर्वचनम्

३३. संसर्गाभाव प्रवेश विचार:

३४. विषयताया: वृत्ति नियामकत्वम्

३५. अनियामकत्व विवेचनम्

३६. दिक्कालयो: ईश्वरानतिरिक्तत्वम्

३७. अन्योन्याभावस्य प्रतियोग्यसमानाधिकरणत्वम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

३८. प्रतियोग्य समानाधिकरणत्व विचार:
३९. नवीनमतम्
४०. तत्र सिद्धान्त पक्ष:
४१. प्रतियोगीत्वस्यातिरिक्तत्वम्
४२. अत्रवदन्ति कल्प:
४३. यद्वेति कल्प:
४४. तद् ग्रन्थस्य प्रतिपादनम्
४५. महाकालान्यत्वविशिष्टस्य निरूपणम्
४६. सार्वभौम विचार:
४७. तत्र सिद्धान्त पक्ष:
४८. तत्र तर्कालङ्कामते व्याख्यानम्
४९. अत्र तर्कालङ्कार दिशा निरूपणम्
५०. नहिपचति चैत्र:, इत्यादिस्थले शाब्दवोध:, तस्य निरूपणम्
५१. वदन्ति ग्रन्थस्य निरूपणम्
५२. केवित्तु ग्रन्थस्य प्रदर्शनम्

इतिशम् ।

विषय सूची भेदेन लिख्यते ग्रन्थ भेदतः ।
तत् सर्वमूल तत्त्वेन विद्यते नान्यथा क्वचित् ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

।।श्रीः।।

"सिद्धान्तव्याप्तिनिरूपणम्"

समारब्धानुमानप्रामाण्यपरीक्षाकारणीभूतव्याप्तिग्रहोपायप्रतिपादननिदान-व्याप्तिस्वरूपनिरूपणमारभते- अथेत्यादिना ग्रन्थेन मणिकारः।

तथा च—

प्रतियोग्यसमानाधिकरणहेतुसमानाधिकरणात्मन्ताभाव प्रतियोगितावच्छेदकावच्छिन्नभिन्नसाध्यसामानाधिकरण्यं व्याप्तिरिति लक्षणंभवति। प्रथमं यत्यदं हेतुपरम्, तदपरं यत्पदं साध्ययपरम् ।

वहिनमान् धूमादित्यादौ प्रतियोग्यसमानाधिकरण हेतुसमानाधिकरणात्यन्ताभावः घटोनास्तीत्याकारकः तदभावप्रतियोगितावच्छेदकावच्छिन्नो घटस्तदभिन्नं साध्यं वहिनस्तत्सामानाधिकरण्यं धूमे अतः तल्लक्षण समन्वयोवोध्यः।

धूमवान् वहनेरित्यत्र वहन्यधिकरणायोगोलकवृत्यभाव प्रतियोगितावच्छेदकावच्छिन्नो धूमः तद्भिन्नं साध्यं नास्तीत्यतोनातिव्यप्ति रांकावकाशः। अत्र व्याप्तिलक्षणे प्रथमंयत्पदं हेतुपरं- तदपरं यत्यदं साध्यपरम् । यत्त्यदोत्तरनञ्पदस्य-प्रतियोगितावच्छेदकावच्छिन्नेपदेन्तरेऽन्वयः।

अत्र यद्धर्भावच्छिन्नवाचकपदंतरं मआदि पदं श्रूयते तेन तद्धर्भावच्छिन्न-प्रयोगिताकभदावगाहनंक्रियत् इतिनियमानुरोधेन प्रतियोगितावच्छेदकावच्छिन्ने साध्यभेदः नितरामवगम्यते मणिग्रन्थ स्वारस्येनति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

किन्त्वत्र मूल कारस्य तात्यर्यमुपेक्ष्य तर्वालंकारग्रन्थानुरोधात् यत्यदार्थे प्रतियोगितावच्छेदकावच्छिन्नभिन्नत्वस्माऽन्वयः शिरोमणिनास्वीकृतःनञ् व्यत्यासः। अन्यथा धूमवान् वहनेरित्यत्रातिव्याप्तिरापद्येत।

तथा च—

ताद्दशात्यन्ताभावप्रतियोतिवच्छेदकावच्छिन्नं यद्भिन्नं जायते तत्सामानाधिकरण्यंव्याप्तितिलक्षणंपर्यवसितम् । एतादृशलक्षणशरीरे स्वीकृते धूमवान् वहनेरित्यत्र तादृशप्रतियोगितावच्छेदकावच्छिन्ने घटपदादौ धूम-भेदस्य विद्यमानत्वेन सुतरामतिव्याप्तिः संघ्रटते ।

तादृशातिव्याप्ति भयकर्तुं तादृश प्रतियोगितावच्छेदकावच्छिन्नत्वा-वच्छेदेन साध्यमेदनिवेशस्यैरचित्यतया तादृश प्रतियोगिगितावच्छेदका-वच्छिन्नत्वव्यापकभदेसामानाधिकरण्य विवक्षणेनातिव्याप्तिशंकावतारः।

न च व्यायकत्वप्रवेशे गुरुत्वायत्तिरितिवाच्यम् । फलमुख गौरवस्याऽदोषत्वात् । तर्हिकिमर्थं नञ् व्यत्यासः शिरोमणिनाकृतः । अतः नञ् व्यत्यासमुयेक्ष्यातिव्याप्तिमयाकर्तुं शन्नोति चेत् तादृशनञ्-व्यत्यासस्यौचित्यंनावगच्छतितार्किकः।

वास्तविकन्तु—

तादृशप्रतियोगितावच्छेदकावच्छिन्नत्वंसमानाधिकरणविंशिष्टोभयाऽवृत्ति-समनियतधर्मावच्छिन्नानुयोगिताकपर्याप्तिकूटविशिष्टसाध्य सामानाधिकरण्य विवक्षणेन न कोपि दोषःसमुद्भवति । अतएव परम गुरु-चरणैरभ्यधायिकिल- नायं सुधांशुः किन्तु व्योमगंगासरोरुहमिति काव्य-प्रबन्धेदृश्यमानतया तर्हिकिमर्थं नञ् व्यत्यासः परमावश्यक इति प्रकृत-विषयेसङ्कोचमासादयेत् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एवं तादृशप्रतियोगितावच्छेदकताव्यापकभेदसाध्यसामानाधिकारण्यस्यैवलक्षणत्वेतारप्रतियोगितावच्छेदकावच्छिन्न धूमेसाध्यभेदस्याऽवर्तमानातित्यादि विवक्षणीयत्वेन नैव धूमवान् वहनेरित्यादौ केदर चिदयि तथातिव्याप्ति शंकावलेशः। कूटत्व च हेतुसमानाधिकरर्णा भाव प्रतियोगिता स मनियत धर्मावच्छिन्न प्रतियोगिताक भेदत्वावच्छिन्नानुयोगिताक पर्याप्ति प्रतियोगित्वमेव। सामनयैत्वञ्च स्वनिरूपितावच्छेदकत्व व्यापकत्वसम्बन्धने।

न च नञ् व्यत्यासमन्तरेणापि तादृशातिव्याप्तिमयाकर्तुं शक्नोति चेत् निष्प्रयोजनमेव नञ् व्यत्यासस्य। अतएव नञ् व्यत्यासोऽपिनितरामुयेक्षणीय एव प्रतिभाति ।

यद्यत्र यद्धर्मावच्छिन्न वाचक पदोत्तरं नञादिपदं श्रूयते तेन तद्धर्मावच्छिन्न प्रतियोगिताक भेदावगाहनं क्रियते'' नियममित्यनुसृत्य मूलग्रन्थ स्वारस्येन प्रतियोगितावच्छेदकावच्छिन्ने साद्यभेदस्य नैसर्गिकतया तद् भेदस्यैवौचित्यं मूल सम्मतमेवेति साधीयान् पन्थाः नितरां श्रेयोन् ।

किन्तु शिरोमणि प्रदर्शितरीतिं स्वीकृत्य प्रतियोगिता वच्छेदकावत्छिन्नस्यैव भेदः साध्ये स्वीकार्यतया तदनुसारेण तादृश प्रतियोगितावच्छेदकावच्छिन्ने यद भिन्नं भवति तत्सामानाधिकरण्यं व्याप्ति रितिलक्षण शरीरे धूमवान् वहनेरित्यादौ तथातिव्याप्तिः। तेन—प्रतियोगितावच्छेदकावच्छिन्नत्वावच्छेदेन साध्यभेदस्यैव निवेशनीयतया धूमवान् वह्ने रित्यादावपि तादृशप्रतियोगिता वच्छेदकावच्छिन्ने घटे धूमभेदस्य सत्त्वेनापिनातिव्याप्ति शंकावतारः लोचनपथे पथिकायते । एवं च तादृश प्रतियोगितावच्छेदकावच्छिन्नत्वव्यापक भेदसामानाधिकरण्यस्यैवलक्षणत्वे तादृश प्रतियोगितावच्छेदका वच्छिन्ने धूमे साध्यभेदस्याऽवर्तमानत्वेन नातिव्याप्तिशङ्कालेशः संभाव्यतेऽस्मामिः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रतियोगितावच्छेदकावच्छिन्न घटभेदस्य विध्यमान त्वादतिव्याप्तिनरासाय व्यायकत्वप्रवेशस्यगुरुत्वेनापि फलमुख गौरवस्यादोषत्व व्याजेन तादृशप्रतियोगितावच्छेदकावच्छिन्नत्वव्यापक भेदसामानाधिकरण्यस्यैवौचित्यमेवेति निर्विवादसिद्धोऽयं पन्थाः दृष्टि पथे पथिकायते ।

किन्तु विलक्षण प्रतियोगितासम्बन्धेन तादृश विशिष्ट प्रतियोगितावच्छेदकावच्छिन्नत्वावच्छिन्न प्रतियोगिताक भेद निवेशस्यैव सर्वसम्मतत्त्वेनैवतादृश सामान्य भेदस्य निवेशस्यावसरः नैव समुपसर्यति ।

एतेन निवेश प्रवेश मार्गानुसरणकल्पनापेक्षयाऽतिव्याप्ति निराकरण मार्गानुसन्धान कल्पनाजालस्यैौचित्यसम्मतमेवेति बृद्धानां विचार सरणिः। तर्हि किमर्थं नञ् व्यत्यासः शिरोमणिना पक्षोऽयं स्वीकृतः।

नञ् व्यत्यासेऽपि

उभय भेदमादाय व्यभिचार मात्रे अतिव्याप्तिनिरासाय तादृश प्रतियोगितावच्छेदकत्वावच्छिन्न प्रतियोगिताक भेद निवेशः आवश्यकः। तथाच समवायेन प्रमेय साध्यक भावत्व हेतुक व्यभिचार स्थले—

प्रमेयत्वावच्छिन्न प्रतियोगिताक भेदा प्रसिद्धयाऽभावान्तरमादायातिव्याप्तिः स्यादेव किमर्थं तदव्यक्तिर्नास्तीत्यभावमादायाव्याप्ति प्रदानं सर्वदा सन्दर्भ विरुद्धमेवेति सर्वदा संगत मेवेति चेत् सत्यमेव। किन्तु तादृश प्रतियोगितावच्छेदका वच्छिन्नानुयोगिताकं पर्याप्तिक कूटत्वानाच्छिन्नवत् साध्य सामानाधिकरणेत्यर्थकरणेन नोक्त दोषावकाशः संभवति ।

तादृश कूटवत्त्वंच स्ववृत्युभयावृत्तिधर्मावच्छिप्रतियोगिताक भेदकूटवत्त्व सम्बन्धेन । तदनन्तरमेव तादृशस्थले तत्तदव्यक्तित्वावच्छिन्न प्रतियोगिताक

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भेदकटवत्त्वस्य विरहेण साध्ये नावकाशः अतिव्याप्ति प्रदानावसरः समागच्छति ।

अन्येषां विदुषां विचारे तु- तादृश प्रतियोगिवच्छेदकत्वव्यापक कूटत्वावच्छिन्न विशिष्ट साध्यसामानाधिकरण्यविवक्षणतयापि अतिव्याप्तिवारणं भवेदेवसत्यं वचः प्रतिभाति । तत्र कूटेत्वं च हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदक धर्मावच्छिन्न प्रतियोगिताक भेदत्वावच्छिन्नंनुयोगिताक पर्याप्तिप्रतियोगित्वमेव, तेन पूर्वोक्त दोषाणामवकाशः दृष्टिपथे नहि समभ्युपैति । तत्र व्यापकत्वं च- स्वाश्रय निरूपित प्रतियोगितावच्छेदकत्वंसंबन्धेन ।

एवं च प्रमेयत्वे हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदकत्वस्य वर्तमानत या तादृश कूटवत्त्वस्योक्तसम्बन्धेन तादृशावच्छेदकत्वव्यापकत्त्वा भावात् नावकाशः तथातिव्याप्तेः ।

वास्तविकंतु—

तादृश प्रतियोगितावच्छेदकावच्छिन्नत्व समानाधिकरणोभयावृत्ति धर्मावच्छिन्न प्रतियोगिक भेदत्वावच्छिन्नानुयोगिताक पर्याप्तिक कूटत्वावच्छिन्नवत्साध्य सामानाधिकरण्यस्यविवक्षणीय तयानास्ति दोषावकाशः प्रतिभाति ।

अथ च नञ् व्यत्यासाऽव्यत्यासयोः निवेशानिवेशाभ्यां कार्यकारण नातिभारः सर्वथाऽतिव्याप्ति प्रदान निदानयोः दरीदृश्यते विदुषां गरिष्ठैः न्यायतत्त्वविदैः।

अतएव नञ् व्यत्यासस्य प्रयोजनं नैवावलोक्यते प्राच्यविदुषां विचार

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रवाहैः। ये दोषाः समुद्भाव्यन्ते नञ् व्यत्यास रसिकेन तेदोषाः तदभावपक्षेऽपियथाश्रुत मणिग्रन्थ व्याख्यान सापेक्षतया निराकतुं शक्यन्ते वृद्धैः ।

अतएव नातिभारः कार्यकराण भावस्यअतिव्याप्ति प्रदानाप्रदानयोः, येन नञ् व्यत्यासः आवश्यकः। नञ् व्यत्यासाभावेऽपि आवश्यकः। नञ् व्यत्यासाभावेऽपि अतिव्याप्ति निरास मार्गः नितराभन्वेष्टव्यएवेति निश्चयं प्रतीमः।

यद्धर्म समानाधिकरण धर्मावच्छिन्नप्रतियोगिताक भेदस्य तादृश प्रतियोगितावच्छेदकावच्छिन्नत्व व्यापकत्वं तद्धर्मावच्छिन्न सामानाधिकरण्यं विवक्षणीयमेवेति निर्विवादसत्यं प्रति भाति ।

एवञ्च मेयत्व समानाधिकरण वाच्यत्वत्वावच्छिन्न प्रतियोगिताक भेदस्य प्रसिद्धत्वेन नाव्याप्ति शङ्कावतार; लोचन यथे पथिकायते । किमर्थं परमावश्यकः नञ् व्यत्यासः। न च क्लिष्टकल्पनापत्तिःस्यादिति वाच्यम् । फलमुख गुरुत्वस्याऽदोषत्वादिति साधीयान् पन्थाः।

केनापि विदुषा-चत्त्थ निगद्यते यत् - यद्धर्मोभयसमानाधिकरणोभयावृत्ति धर्मावच्छिन्न प्रतियोगिताक मेदकूट निवेशेनापि निराकरणं भवेदेवेति नावश्यकः नञ्व्त्यासः।

नञ् सममिव्याहारस्थलेयेन रूपेण यस्योयस्थिति स्तदूपावच्छिन्न प्रतियोगिताकत्व संसर्गेणैवान्वयः नतु तदव्यक्तित्वावच्छिन्न प्रतियोगिता कत्वेनेति नियमस्याऽप्रमाणिकत्वादिति ग्रन्थान्तरे दृष्टव्यमेति विदुषा विभावनीयमेवेति अतएव भट्टाचार्येणापि न्यगादि व्युत्पत्तिवादे किल—

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नहि कश्चिद् विपरीत लेखनं युक्तिवलाद् वस्तु सिद्धौवाधकं भवतीति प्रतियादनात् ।

नञ् व्यत्पासेऽपि जायन्ते ये- दोषाः तेषां परिहाराय येनरूपेण निवेशः क्रियते सएव मार्गः मयापि तन्निरासायस्वीकर्तव्य एव। यस्तुभयोः समो दोषः परिहारस्तयो समः'' अनया रीत्या नञ्व्यत्यासाभावेऽपि सएव पन्थाः स्वीकार्य एवा तर्हि किमर्थं नञ् व्यात्यासः संपादितः शिरोमणिना । नास्त्यावश्यकता नञ् व्यत्यासस्य। यथाश्रुतमेव मणिकारस्य मूलसूत्रं निर्विवादसत्यं प्रतिभाति ।

अनावश्यकमेव नञ् व्यत्यासः शिरोमणैः। अतः धूमवान् वह्नेरित्या दावपि तेनैव पथाऽतिव्याप्तिः निराकारि समालोचकेन विदुषा।

तात्पर्यमिदमेव विचिन्त्य शिरोमणिनास्वकीयव्याख्यावसरे नञ् व्यत्यासस्योल्लेखः नैवाऽभ्यधायि। तथा च मणिसूत्रे प्रतियोगिता-च्छेदकावच्छिन्नं यन्न भवतीति ग्रहन्थस्याशयोमन्तव्य एवेति भवतीति ग्रन्थस्याशयोमन्तव्य एवेति निश्चीयते प्राच्यतत्त्व विदा वृद्धगुरुवरयाद पद्मर्नेति ।

एवं च नञ् समभिव्याहारस्थले येन रूपेण येस्यापस्थितिस्तद्रूपावच्छिन्न प्रतियोगिताकत्व संसर्गेणैवान्वयः भवेदेवेति चाङ्गीकृत्यतत्तदव्यक्तित्वावच्छिन्न प्रतियोगिताकत्वसम्बन्येनेति नियम विरोधस्य निर्मूलकत्वमेवेति प्राच्यविदुषां विचारप्रवाहः ।

तादात्म्य संसर्गेण प्रमेय साध्यक सद्धेतावपि अव्याप्तिवारण प्रकारः सर्वदाऽन्वेष्टव्य एवेति परमगुरुवरपादपद्मेन खकीय प्रबन्धे व्यधायि। तेन मणिसूत्रस्य व्याख्यानं यथाश्रुतं साधीयः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वास्तविकंच-

तादृशप्रतियोगितावच्छेदकावच्छिन्नत्वसमनियतसमानाधिकरणोभयावृत्ति धर्मावच्छिन्नप्रतियोगिताकभेदविशिष्टानुयोगिकताफ पर्याप्तिकूटत्वावच्छिन्न विशिष्ट सामानाधिकरण्य विवक्षया स्वप्नऽपि नावकाश:दोषाणामिति ।

तथाच प्रतियोगिमेदं समुपेक्ष्य प्रतियोगितावच्छेदक भेदं प्रतिपादयितुं व्याचक्षते शिरोमणि:। प्रतियोगितानवच्छेदकोयो धर्म इति।

लक्षण शरीरं तु-

प्रतियोगिव्याधिकरण हेतुसमानाधिकरणात्यन्ताभावप्रगितानवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्न साध्यसामानाधिकरण्यं व्याप्तिलक्षणं भवति । वह्निमान् धूमादित्यादौ धूम समानाधिकरणात्यन्ता भाव प्रतियोगितानवच्छेदकं घटत्वं तदभिन्नसा ध्यतावच्छेदकं वह्नित्वं तदवच्छिन्नो वह्नि: तत् सामानाधिकरण्यं धूमे ।

तद्व्यक्त्यभावमादायाव्याप्तिनिरासायाऽनवच्छेदकत्वानुसरणं कृतं दींधतिकारेण।

वह्निमान् धूमादित्यत्र हेतुसमानाधिकरणात्यन्ताभाव प्रतियोगितावच्छेदकं तद् व्यक्तित्वंतद् भिन्नं साध्यतावच्छेदकं वह्नित्वं तदवच्छिन्नसाध्यसा-मानाधिकरण्यस्य हेतौ सत्त्वाल्लक्षणसमन्वये। वोध्य:।

धूमवान् वह्नेरित्यादौ वह्निसमानाधिकरणात्यन्तात्याभाव प्रतियोगितावच्छेदकं घटत्वं धूमघटोभयत्वंवेति तद्भिन्न त्वस्य धूमत्वे सेत्त्वनाति व्याप्ति:। तन्निराकर्तुं प्रतियोगिता नवच्छेदकत्वस्य तादृश प्रतियोगितावच्छेदकत्वावच्छिन्न सामान्य प्रतियोगिताकभेदस्य विवक्षणतया

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नातिव्या प्त्यवकाशः संभवति । तथा च प्रतियोगितावच्छेदकत्वेतर धर्मानवच्छिन्न प्रतियोगितावच्छेदकत्वावच्छिन्न प्रतियोगिताक भेदस्य विवक्षणी यत्वेन नोक्तदोषावकाशः प्रतिभाति ।

नन्वत्र रूयवान् पृथिवीत्वादित्यत्र विषयितासम्बन्धेन रूपत्वविशिष्टाभावमादाय तदग्रे प्रतियोगितावच्छेदकतायां साध्यतावच्छेदकता घटक सम्बन्धावच्छिन्नत्वस्य निवेशनीयत्वेन तादृश तद्व्यक्तित्व-निष्ठावच्छेदकतायां साध्यतावच्छेदकताघटकीभूतसमवायसम्बन्धा-वच्छिन्नत्वासत्त्वेन तद्व्यक्तित्वावच्छिन्नामावमादायाव्याप्त्यभावतया किं प्रयोजनमवंच्छेदक त्वानुसरणस्येत्यतो व्यर्थमेवानुसरणस्यावच्छेदकस्येति चेत् सत्यम् ।

किन्तु तद् व्यक्तित्वं च तद् व्यक्तिगत रूपमेवेत्य तो वह्निगतरूपनिष्ठावच्छेदकतायां समवाय स म्बन्धावच्छिन्नत्वस्य विद्यमानत्वेना व्याप्तिरितिध्रुवमेव । उत्पन्नं द्रव्यं क्षणं निर्गुणं निष्क्रियं चतिष्ठतीति प्रत्ययप्रतीत्याउत्पत्तिकालावच्छेनवह्नावपि रूपस्याविद्यमानतया उत्पत्तिकालावच्छेदेन तद् व्यक्तित्वं नास्तीति प्रत्यय वलेनापि रूपत्व जाति विशिष्ट वृत्तित्वस्य तत्रापि वर्तमानतया नात्र दोषावकाशः दृष्टि पथे विदुषां समाजे समभ्युपैति । यद्यप्यत्र तदव्यक्तित्वस्य तद्वहन्यनुयोगिक समवायेन वह्नित्व स्वरूपतया तदव्यक्त्यभावमादायपुनरपि अव्याप्ति प्रसंगः स्यादेवेति निश्चितमेव । तथापि साध्यतावच्छेदकताघटक-सम्बन्धावच्छिन्नत्वस्येतरवारकपर्याप्ति प्रवेशेनैववारणात् । अन्यथाऽन-वच्छेदकत्वानुसरणेऽपि पूर्वोक्तदोषस्य विद्यमानत्वमेवस्यात् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नच तथापि प्रतियोगितावच्छेदकताघटकसम्बन्धेनैव प्रतियोगितावच्छेदकावच्छिन्नत्वस्यैवनिवेशनीयतया रूपवान् पृथिवीत्वादित्यत्र विषयिता संसर्गेण रूपत्वेविशिष्ट ज्ञानभिन्नत्वस्य साध्ये रूपे विद्यमानत्वेना व्याप्तिवारण सम्भवे साध्यता घटक सम्बन्धावर्च्छिन्नत्वं नैव प्रवेश्यम् । स्वरूपसम्बन्धेन गुणकर्मभेदविशिष्टसत्त्वस्य समवायेन साध्यतायां जातिमत्त्वादि हेतौ सामानाधिकरण्यसम्बन्धावच्छिन्न गुणकर्मान्यत्वनिष्ठावच्छेदकताक प्रतियोगिताभावमादायाऽव्याप्तिवारणाय तादृश- निवेशास्यावश्यकत्वेनावच्छेदकत्वानुसारणस्यौचित्यंनास्तीति समाहृत विदुषां विचारपन्था: सन्तिष्ठते । अतएव नैवकोप्यन्यथा मार्ग: लोचन गोचरतां समम्युपैति ।

किन्त्वत्र वह्नित्वप्रतियोगिकसमवायसम्बन्धेन वह्निविशिष्ट विषयितासम्बन्धेन सध्यत्वे तज्ज्ञानत्वहेतौ हेतुसमानायिकरण शुद्धसमवायसंसर्गेण वह्नित्वविशिष्टाभावीयप्रतियोगितावच्छेदकताया अपिसाध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वात् तत्राऽव्याप्ति निरासाय, एवं विषयितात्वि समवायत्वैतदन्यतर सम्बन्धेन रूपत्व विशिष्टस्य समवाय सम्बन्धेन साध्यत्वे आत्मत्वद्घटकान्तरत्व हेतौ आत्मघटान्यतरत्वाधिकरणेघटे विषयिता सम्बन्धेन रूपत्व विशिष्टस्य, आत्मनि च समवाय सम्बन्धेन रूपत्वविशिष्टाभावमादायव्याप्तिनिराकरणाय न्यूनवारक पर्याप्तिनेवेश रमावश्यक: प्रतिभाति। एवमस्यां परिस्थित्यां समवायेन वह्नित्वविशिष्टस्य विषयिता सम्बन्धेन साध्यत्वे तज्ज्ञानत्व हेतौ वह्नित्वप्रतियोगिक समवायेन वह्नित्वविशिष्टाभावमादायाव्याप्तिवारणायेतरवारक पर्यप्तिनिवेशोपि सुतरामावश्यक एवेति निश्चय: परमावश्यकरवाऽऽभाति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तथा च-

साध्यताव्चछेदकताघटकसंसर्गतावच्छेदकतात्वावच्छिन्न प्रतियोगिताक पर्याप्त्यत्नुयोगितावच्छेदक रूपवृत्ति यदवच्छेदकत्वम् तादृशावच्छेदकताक प्रतियोगिताकाभावः विदुषा विवक्षणीयएवेति निश्चीयते।

रूपवृत्तित्वं च-

स्वावच्छेदकसंसर्गतावच्छेदकतात्वावच्छिन्न प्रतियोगिताक पर्याप्त्यनुयोगितावच्छेदकत्वसंसर्गेण। तदनन्तरं वह्नि प्रतियोगिक समषायेन वह्नित्वविशिष्टस्य संयोगेन साध्यतायां धूमादि हेतौ तादृश सम्बन्धावच्छिन्नावच्छेदकता प्रसिद्धतयाऽव्याप्ति निराकरणाय स्वानवच्छेदक सम्बन्धावच्छिन्नत्वसमानाधिकरण्योभय सम्बन्धेन साताह वच्छकता विशिष्टावच्छेदकत्वा निरूपकत्व मेव प्रतियोगितायां साध्यतावच्छेदकताघटक सम्बन्धावच्छिन्नावच्छेदकतानिरुपकत्वमेवास्ति।

तथा च तद्व्यक्तित्वनिष्ठाववच्छेदकतायां स्वसामानाधि-करण्याभावतया तदव्यक्त्यभावमादायवह्निमान् धूमादित्यादौ अव्याप्तिः।

अतएव तादृशाभावमादायोऽव्याप्तिनिरासायाऽनवच्छेदकत्वानुसरणं कृतवान् तार्किकशिरोमणिः। किन्तु तादृशाऽनवच्छेदकत्वानुसरण विरहदशायामपि-विलक्षण प्रतियोगिता संसर्गेण तादृश प्रतियोगिता-वच्छेदकावच्छिन्नतवच्छिन्न प्रतियोगिताकभेद प्रवेशादेव तन्निरासो भवेदेवानवच्छेदृकत्वानुसरणस्यावश्यकतायाः समादरः नावलोक्यते वृद्धगुरुवर्याणां विचारतरंग प्रवाहलतिकायां तथौचित्यमेव ।

अतएव अन्यूनवृत्ति धर्मस्यैवानुयोगितावच्छेकत्वभित्यस्य नियम-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सम्मततयैव तथैव तथा प्रतियोगितावच्छेदकाच्छिन्नत्वावच्छिन्नानुयोगिताक-साध्यभेदस्य प्रवेशतारतम्य वलादेवतन्निराकरणस्य सुलभोय: मार्ग: घी घनेशै: समादरणीय:।

अत्रेदं जिज्ञास्यते यत्-

यद्धर्मावच्छिन्नवाचकपदोत्तरंनञादिपदं श्रूयते, तद्धर्मावच्छिन्न प्रतियोगिताकभेदावगाहनस्यैवप्रमाणसम्मतत्वेन नञादि भेद एव युक्त्यासम्मत:, तथातादृशभेदस्यप्रतीयमानतयावस्तुगत्याव्यर्थमेव नञव्यत्यासस्य प्रयोजनं प्रमाणहीन मेवेति भाषन्तेतरांवृद्धा:। तन्निवेश मन्तरायि दोषोद्धार: भवे: देवेति साधीयान् पक्ष: प्रतिभाति ।

अन्ये मान्या: व्याचक्षते सत्यमेव नञ् व्यत्यासमन्तरापि यथाश्रुत लक्षण व्याख्यानै: तन्निर्वाहात् ।

घटभेद तात्पर्यमवलम्व्य घट: पटोनवेति वाक्य वलादेव घटभेद वोधस्यापि प्रामाण्यापत्ति: सुस्थिर: भवेदवेति पक्ष: श्रीयान् । नच शाब्दवोधे तात्पर्यज्ञानस्यापि कारंणत्वेन केनापि प्रकारेण पटभेद तात्यर्येण प्रयुक्त घट भेदस्य कथमपि प्रभात्वापत्ति: सम्पख्यते । अतएव तत्रापि कथं प्रमात्वापत्ति: भेवदितिवाच्यम् ।

तथा च तथानियमाङ्गीकारे द्रव्यं न घटइत्यस्यापि प्रमात्व वोधजनकत्वने प्रभात्वापत्ते:।

अत्रेदं चिन्त्यतेऽस्माभि: यत्-

प्रतियोगितावच्छेदकावच्छिन्नत्वं केन सम्बन्धेनेति? किं सम्बन्ध सामान्येन सम्बन्धविशेषेणवेत्यत्र प्रतियाद्यते समालोचकेन यत् सम्बन्ध

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समान्येन स्वीक्रियते तर्हि रूपवान् पृथिवीत्वादित्यादिस्थले विषयिता सम्बन्धेन रूपत्व विशिष्टज्ञान भिन्नत्वस्य साध्ये रूपे वर्तमानत्वेनाव्याप्ति निराकरणदशायामपि साध्यताघटकसम्बन्धावच्छिन्नत्वप्रवेशस्यौचित्यं नास्तीति किं प्रयोजनं तस्येति चतेसत्यमाभातीति कथनं नैव साधीयः।

यद्यपि गुण कर्मभेदविशिष्टसत्त्वस्य समवायसम्बन्धेन साध्यत्वे जातिमत्त्वस्य हेतुत्वे सामानाधिकरण्यसम्बन्धावच्छिन्नगुणकर्मान्यत्व निष्ठावच्छेदकदकतकप्रतियोगिताकाभावमादायाऽव्याप्ति निरासाय तादृशनिवेशस्यौचित्यतयानाऽव्याप्तिशंकावतारः तर्हिअनवच्छेदकत्वानुसरणस्य वैयर्थ्यमेव तुतरां संसिद्धमेवेति विद्रुषां विचारः।

एवं च हेतुमनिनष्ठाभावीय प्रतियोगितायां साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्व विशेषणस्य नितरामावश्यकतया महानसीय वहन्यभाभावभादायाऽव्याप्ति निरासः सर्वथा समुचितएवाऽऽभाति । तथा च महानसीय वहन्यभावीय प्रतियोगितायां साध्यता वच्छेदक तदितरोभयानवच्छिन्नत्वा भावतया नाव्याप्तिशंका समुदेति । अत्र साध्यता वच्छेंदकावच्छिन्नत्वमात्र प्रतिपादने व्यभिचारिणि सुतराभतिव्याप्तिः सुनिश्चित्येतिसुविचार्य तं परित्याज्य पूर्वोक्त निवेशस्य सार्थक्यं युक्त्या संसिद्धमेवेति साधीयान् विचारः प्रतिभाति । साध्याभावस्य लक्षणाऽघटकत्वादिति नैसर्गिकोयं पन्थाः विलसति ।

घटाभाव प्रतियोगित्वस्य सांध्यतावच्छेदकेत्तरानवच्छिन्नत्वाभावात् । उभयानवच्छिन्नत्वमात्रप्रतिपादने तु- वह्निधूमोभयवान् वहनेरित्यादौतु तथातिव्याप्तिदोषग्रस्तत्वेन दुष्टत्वमेव संजायते । महानसीयत्वंच-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

महानसवृत्तित्वमेव। तच्च वह्नौ विशेषणम् । तथा च प्रतियोगितावच्छेद-दकतायां साध्यतावच्छेदकताघटक सम्बन्धावच्छिन्नत्वस्य महानसीयत्व-निष्ठावच्छेदकतायां तद्भावतया कथं तर्हि तादृशाभावस्यलक्षणा घटकत्वं भवेदिति सत्यमेव । किन्तु महानसीयत्वं- महानसानुयोगिकसंयोग एव वोभवीति, तन्निष्ठावच्छेदकत्वस्य समवायसम्बन्धावच्छिन्नतयाऽव्या-व्याप्तिप्रदानस्यैचित्यं प्रमाण पटलैः समावृतमेवास्तीति हेतुना तार्णत्व जातेः स्वीकार्यतया तन्मते तार्णवहन्यभावंचाङ्गी कृत्याऽव्याप्ति प्रदानस्यैव युक्तियुक्तत्वं सर्व सम्मतमेवेति निर्विवाद सत्यमाभाति। तदनन्तर मेवाऽव्याप्तिदानं समुचितम् । अन्यथा नावकाशः अव्याप्ति प्रदानस्य । अतएव महानसीयवहन्यभावं परित्यज्याऽभावान्तरमादाय तत्रव्याप्तिः समुचिता प्रतिभाति ।

तथा-

कपिसंयोगी एतद्वृक्षत्वादित्यत्राऽव्याप्तिमयाकर्तुं प्रतियोगिवैयकरण्यस्य विवक्षणीयत्वेन तन्निरासः-सम्भवति । अतः यादृशप्रतियोगितावच्छेदका वच्छिन्नानधिकरणत्वं हेतुमतस्तादृश प्रतियोगितानवच्छेदकत्वमित्यस्यैव युक्ति युक्तर्त्वं साधीयः।

अनेनैव प्रकारेण वह्निमान् धूमादित्यत्र माहानसीय वहन्यभाव प्रतियोगितावच्छेदकीभूतवह्नित्वावच्छिन्ननधिकरणीभूतत्वस्यैव पर्वते विद्यमानत्वेनकथं तर्हि महानसीयवह्न्यभावः प्रतियोगिव्यधिकरण; सम्भवति। तार्ण वहिनमान् धूमादित्यत्र वह्नित्वावच्छिन्न निरूपकताधिकरणत्वस्य हेत्वधिकरणे वर्तमानत्वेन तार्ण वहन्यभावस्य लक्षणाऽघटकत्वेनातिव्याप्तिः सुस्थिरैवाऽऽभाति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अतएव प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वमित्यनेन स्वप्रतियोगितावच्छेदकावच्छिन्नत्व प्रतियोगिताकपर्याप्त्यनुयोगिता वच्छेदक रूपवृत्तित्वं तादृशनिरुपकतायाः निवेशनीयम् । रूप वृत्तित्वं च स्वावच्छेदकतात्वावच्छिन्नप्रेतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्व सम्बन्धेन। अथैवं महानसीयवहन्यभावप्रतियोगितावच्छेदकतात्वावच्छिन्न प्रतियोगिताक पर्याप्त्यनुयोगितावच्छेदकं यन्महानसीयत्ववह्नित्वगतं द्वित्वं तद्वृत्तिनिरूपकताकाधिकाणत्वाभावस्य पर्वतादावपि विद्यमानतया तस्यलक्षण घटकत्वेनाव्याप्ति संगतिरेव मन्तव्येति निश्चयं प्रत्येमि ।

अतः तादृशनिवेशस्यौचित्यं सर्वथा संगतमेवविश्वासं व्यज्मि।

अत्रेदं शङ्कते यत्-

महानसीयवह्निवृत्तित्वविशिष्टजातिमान्नास्तीत्यभावमादाय शुद्ध-साय्यतावच्छेदक स्थले प्रतियोगितावच्छेदकतायां निखच्छिन्नत्वप्रवेशस्य नितरामौचित्यसम्मतत्वेन तथाप्रवेशेनैव महानसीयवहन्यभाववारणं सम्मवतीति निश्चिनोमि।

अथ तावदिदं किमिति साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वम्। यदि च-

साध्यतावच्छेदकतदितरोभयनिष्ठावच्छदकत्वानिरूपकत्वमुच्यते तर्हि अवच्छेदकतायाः सुतरामवच्छेदक मेदेन भिन्नतया तदा तत्रैवाऽप्रसिद्धत्वेन लक्षण समन्वयस्य दुर्घटत्वात् ।

महानसीयवहन्यभावीयप्रतियोगितानिरूपतिावच्छेदकता भिन्नैवाऽऽस्ते, वह्नित्वनिष्ठाअवच्छेदकता निखच्छिन्ना, एवं महानसीयत्व निष्ठावच्छेदकता

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सावच्छिन्ना विद्यते । अतएव साध्यतवच्छेदक तदितरो भयनिष्ठाऽवदकता कदाचिदपि एकावरीवर्ति, तेन क्वचिदपि स्थले लक्षणाघटकत्वेनाऽसम्भ-वापत्तिरेव नितरामापातत: लक्षण समन्वयस्य गगन कुसुभायमानस्यैव प्रतीति र्जायतऐवेति दृष्टिपथे स एवमागच्छति। कथं साध्यतावच्छेदकतदित रोभयानवच्छिन्नत्वप्रवेश: महानसीयवहन्यभावमादाय समागतस्यापि निरास-मार्गस्यौचित्यं भविष्यतीति शंका जागरिता भवेदेवेति निश्चिनोमि ।

जातिमान्नास्तीत्यभाव प्रतियोगिता निरूपित जातित्वावच्छिन्नावच्छेद-कतायांतस्यसुप्रसिद्धतयानास्ति दोषाषकाश: संभवतीति चेत् सत्यम् । किन्तु तादृशावच्छेदक त्वानिरूपितत्त्वस्य महानसीय वह्नयभावीय-प्रतियोगितायां विद्यमानत्वेन कथमपि नैवाऽप्रसिद्धिरितिवोभवीति विदुषां विचार मन्दिरे न कोपिदोष: समुदेति । तथापि तादृशावच्छेदकत्वा-निरूपितत्त्वस्य महानसीय वहन्यभावीय प्रतियोगितायां वर्तमानत्वेन तथाऽव्याप्तिदोषस्यतादवस्थ्यमेवेति निश्चयं प्रत्येमि।

नन्वत्र महानसीयवह्निवृत्तित्व विशिष्ठजाति मान्नीस्तित्यभावं स्वीकृत्य तत्रस्थानितरामव्याप्तिं दरीकर्तुं शुद्धसाध्यतावच्छेदककस्थले प्रतियोगि-ताच्छदकतायां निरवच्छिन्नत्वप्रवेशस्यावश्यकत्वं सुखचिन्त्यतेनैव वह्निमान् धूमादित्यत्र महानसीयवह्न्यभावमादायाव्याप्तिवारणं भवत्येवेति निश्चप्रचम् । किं च वह्नित्वनिष्ठनिखच्छिन्नावच्छेदकताकत्वस्य तादृश प्रतियोगितायां वर्तमानत्वदशायां कथमपि तामयाकर्तुं नैव शक्नुम:।

किंवा सावच्छिन्नावच्छेदकताभिन्नावच्छेदकतानिरूपितत्वमेव तथेतिवाच्यम् । इत्यतो महानसीयवह्निवृत्तित्त्व विशिष्ट जाति मदभाववारणं स्यादेव कथं तर्हि तथाभावमादायाव्याप्ति: प्रत्ता केनापि विदुषा।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अतएव तार्णवह्न्यभावीय प्रतियोगितायां तार्णत्वनिष्ठ निरवच्छिन्ना-वच्छेदेकताकत्वस्य एवं वह्नित्व निष्ठनिरवच्छिन्नावच्छेदकताकत्वस्य च विद्यमानत्वेन तन्निरूपकाभावमादायाऽव्याप्तिनिरास:स्यादेषेत्यतो साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्व प्रवेशस्य सार्थक्यमेवेति ग्रन्थकाराणां विचारमार्ग:सर्वथासाधीयान् प्रतिभाति । आहोस्वित् साध्यतावच्छेदकता विशिष्टान्यावच्छेदकत्वानिरूपितत्व प्रवेशेनैव तथा वारणं कर्तुं शक्नुम:। साध्यतावच्छेदकतदितरोभयानव:च्छिन्न त्वप्रवेशस्यौचित्यं नास्तीति भाषन्तेतरां विपश्चिदयश्चिमा:।

अपि च साध्यतावच्छेदक समनियतावच्छेदकदकताऽनिरूपितत्वमेव प्रवेश्यं तेनैव तथा निराकरणं स्यादेवेति विदुषां विचार सरणि:। अतएव नावश्यकत्वं तन्निरासाय साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वनिवेश: नैव सार्थक्यं भजतेतराम् ।

किमर्थं साद्यतावच्छेदक तदितरोभयाऽनवच्छिन्न प्रवेश: समभ्यधायि तर्कालङ्कारेण महता ।

वास्तविकं तत्त्वमिदं प्रतिभाति यत् - महानसीय वह्न्यभाव-मार्दयाऽव्याप्तिं दूरीकर्तुंपर्याप्ति निवेशएवं सर्वदौचित्यंलभते किं प्रयोजनं तन्निवेशस्य साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वस्येति नैरर्न्यक्यमेव । गोरवदोष ग्रस्तत्वात् । साध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपितत्वविशिष्ट तदितरनिष्ठावच्छेदकतानिरूपितत्वस्य विवक्षितत्वात् । एवं च-साध्यतावच्छेदक निष्ठावच्छेदकतानिरूपिता सती तदितरनिष्ठा-याऽवच्छेदकता निरूपिता या प्रतियोगिता तदभिन्नत्व निवेशेनैव वारणं भवेर्दिति। नात्र विदुषां विचारवैमत्यामिति सार्वजनीनोयं पन्था:।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न च प्रमेयाश्रयवान् धूमादित्यत्र साध्यतावच्छेदकेतरस्याऽप्रसिद्धयाऽव्याप्तिः तदवस्थैवेतिवाच्यम् । साध्यतावच्छेदकतावच्छेदक रूपवच्छिन्नावच्छेदकताऽनिरूपितप्रकारतावच्छेदकत्वस्य विवक्षणेन पूर्वोक्तस्थले नास्ति दोषावकाशः।

तत्त्वविदां विचारे-

साध्यतावच्छेदकता विशिष्टान्यावच्छेदकेत्यत्र वैशिष्टयं तु स्वनिरूपित विशेष्यतावच्छेदकतात्वावच्छिन्न प्रतियोगिताक पर्याप्त्यनुयोगितावच्छेदक रूप वृत्तित्व सम्बन्धेन । रूपवृत्ति त्वंचस्वनिरूपित प्रतियोगितावच्छेदक तात्वावच्छिन्न प्रतियोगिताक पर्याप्त्यनुयोगितावच्छेदक सम्बन्धेन । तथा च महानसीयवह्निर्नास्तीत्याकारकाभावीय प्रतियोगितावच्छेदकतायाः तादृश रूपेऽविद्यमानत्वेन पूर्वोक्त दोषस्य निरासः सम्भवेत् ।

नन्वत्र महानसीय वह्निमान् तज्ज्ञानत्वादित्यत्र विषयिता सम्बन्धेन महानसीय वह्निसाध्यकस्थे पुनरपि तथैवाऽव्याप्तिः तदवस्थैव । महानसीयत्वविशिष्टाभाव वहन्यभावयोः तादृशतयालक्षण घटकत्वस्य तथाविद्यत्वेन तत्प्रतियोगितावच्छेदकत्वस्यसाध्यतावच्छेदके विद्यमानत्वात् । एवमपि प्रतियोगित्वसंसर्गेण महानसीयत्वविशिष्टवह्निसाध्यकस्थले तदव्यक्तित्वादिहसुतरामव्याप्तिः संघटत एवेति सत्यमाभाति । अतएव तामपाकर्तुं तथाविधप्रतियोगितायां- यत्किञ्चिद्धेत्वधिकरण निरूपित वृत्तितावच्छेदकताप्रतियोगिक पर्याप्त्यनुयोगितावच्छेदकरूपावृत्तित्वस्य प्रतियोगितायांप्रवेशेन नावकाशः पूर्वोक्ताऽव्याप्तेः तत्र रूपवृत्तित्वं च-स्वावच्छेदकतात्वा वच्छिन्न प्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्व सम्बन्धेन। अनेनैव निवेशेन पूर्वोक्ताऽव्याप्तिदोषोद्धारः संभवति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न च तथापिविषयितासम्बन्धेन वह्नेः साध्यत्वे महानसीयवह्निविषयक ज्ञानविषयकज्ञानान्यतरत्वादित्यत्रातिव्याप्ति दोष ग्रस्तत्वेनतयाविध निवेशः नैव साफल्य मासादयेत् । तथा साध्यभावीय प्रतियोगितायां तादृशरूप वृत्तित्वाभावदर्शनात् ।

तथाविधरूपे साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताक-पर्याप्त्यनुयोगितावच्छेदकत्वस्य विवक्षणतयानावकाशः समुल्लिखित-दोषस्येतिवृद्धगुरुणां विचार सरणिः।

तदनन्तरमेव वह्निगतैकत्वस्य तादृशावच्छेदकत्वाभावतया वह्न्यभावीय प्रतियोगितायामवृत्तित्वस्य सुतरां संसिद्धतया लक्षणघटकत्वस्य तादृशत्वात् ।

न च तथापि-

वह्निमान् धूमादित्यादौ हेत्वधिकरणनिरूपितप्रमेयात्ववच्छिन्नवृत्तिता-वच्छेदकताक प्रतियोगिताक पर्याप्त्यनुयोगितावच्छेदकं यत् साध्यतावच्छेदकतातवच्छिन्नप्रतियोगिताक पर्याप्त्यतदवृत्तित्वस्य प्रतियोगितामात्रेऽविद्यमानत्वेनाऽसम्भव संभव एव विदुषां समाजे सर्वदा सततमेवाऽग्रं गच्छेदिति तार्किकवर्याणां विचार चातुरी विमर्शः। अभुयाक्रम पद्धत्या सिद्धान्तव्याप्तिनिरुपणवेलायां तर्कोलंङ्कारनिरुपणास्यवैशिष्टयं धत्ते।

साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वविचारप्रसारः वास्तविकत्वेन तर्करसरसिकानांनैव प्रमोदाय संभवति । मूलार्थव्याख्यानसम्भूतत्वेनैव निर्वाहः प्रभवति । किमर्थं कष्टकल्यना जालमाला लालित्यमिति। अथचेदं व्याप्तिलक्षणस्वरूपं वरीवृतीति किलतर्कालङ्काराणां विचारः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रतियोगि व्यधिकरण हेतुसमानाधिकरणाऽत्यन्ताभव प्रतियोगितानवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्न साध्यसामानाधिकरणयं व्याप्ति लक्षणं संजातमेव। एतवता वाक्येन लक्षर्णं परिष्कृत स्वरूपमध्यान वद्यं पर्यभूत्। प्रतियोगितावच्छेदकतापर्यात्यधिकरणाभाव विशिष्टसाध्यतावच्छेदकमिति लक्षणस्वरूपमवतिष्ठते ।

अन्येषां विचारेत्वित्थं वरीवर्तियत् -साध्यतावच्छेदकता विशिष्टान्यावच्छेदक त्वमेवतत्र प्रवेश्यम् वैशिष्टस्यं च-

स्वनिरूपितावच्छेदकतात्वावच्छिन्न प्रतियोगिताक पर्याप्त्यनुयोगितावच्छेददकरूपवृत्तित्वसंसर्गेण- रूपवृत्तित्त्वंचस्वनिरूपित प्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगितावच्छेदकतायाः तादृशसाध्यतावच्छेदक रूपेऽवर्तमात्वेन साध्यतावच्छेदक विशिष्टान्यत्वेन पूर्वोक्तदोषस्योद्धारः संभवति । वह्निमान् धूमादित्यादौ हेत्वधिकरण निरूपित वृत्तितायाः सम्बन्धः सामान्येन घटयटादिसाधरणतया तादृशावच्छेदकता प्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वस्य घटाभावीय प्रतियोगितायां विद्यमानत्वेन पूर्वोक्तदोषस्य तदवस्थ्यमेवेति सत्यं प्रतिभाति ।

एवं च प्रतियोगिव्यधिकरण हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदकता पर्याप्त्यधिकरण त्वाभावविशिष्ट साध्यतावच्छेदकं तदवच्छिन्न साध्य सामानाधिकरण्यं व्याप्तिरितिलक्षणं संजातम् । एतेषां विचारे-

व्यासज्यवृत्ति प्रतियोगिताकपर्याप्तेवख्याप्यवृत्तितया तादृश सम्बन्धमर्यादया तदधिकरणत्वस्याऽव्याप्य वृत्तित्वेन महानसीयवहन्यभाव प्रतियोगितावच्छेदकता पर्याप्त्यधिकरणत्वस्यद्वित्ववच्छेदेन विद्यमानत्वेनापि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वह्नित्वगतैकत्वावच्छेदनतदभावस्यापि विद्यमानत्वेनैव लक्षण समन्वयायोपिध्रौव्यम् । अवच्छेदकमेदेन तदभावस्यैकत्रसमावेशे नास्ति कोपि तत्र समावेशः वाधकत्वेन समभ्युपैति ।

न च महानसीयवह्निमान् धूमादित्यादौ साध्यतावच्छेदके महानसीय वहन्यभाव प्रतियोगितावच्छेदकतायाः द्वित्वावच्छेदेन विद्यमानत्वेनापि एकत्वावच्छेदेनापि तदभावसत्वेनैव वाधकाभावेनाऽतिव्याप्तिरिति वाच्यम् । साध्यतावच्छेदक पार्याप्त्यधिकरण धर्मावच्छेदेन ताहःशाभावस्य लक्षण शरीरे प्रविष्टत्वेननातिव्याप्ति शंकावतारः ।

व्यासाज्यवृत्तिरपि प्रतियोगिताक पर्याप्तेरपि व्याप्यवृत्तितया तत्सम्बन्धेन तदधिकरणत्वस्यापि व्याप्यवृत्तित्वात् तदभावस्यापि तदवच्छेदकाप्रसिद्धया पूर्वोक्तदोषस्य निराकरणं नैव संभवति । अतएव तर्कालंकारोपि तमेव पक्षं- व्याचष्टे । एवं च तत्सम्बन्धेन प्रत्येकावृत्ति धर्मस्य तत्सम्बन्धेन समुदायावृत्तित्वमिति नियमः जगदीश तर्कालङ्कारेणापि स्वीकृतः। एवं च महानसीयवहन्यभाव प्रतियोगितावच्छेदकं यदि पयप्ति संसर्गेणवह्नित्व निरूपितवृत्तित्वाभाववत् स्यात् तदा तत्सम्बन्धेन समुदायावृत्तित्व मिति नियमः सूचितः ।

तथा च- महानसीयवहन्यभावप्रतियोगितावच्छेदकत्वं वहिनत्वनिरूपित वृत्तितावत् महानसीयत्व वहिनत्वोभय निरूपित वृत्तितावत्त्वात् इत्यनुमानेन वह्नित्वे तादृशावच्छेदकता पर्याप्त्यधि करणत्व सिद्धिः सुतरां सम्पद्यत एवेति निश्चयं मन्ये । अतएव वह्निमान् धूमादित्यादौ नितरामव्याप्ति वारक पर्याप्तिनिवेशस्यौचित्यं नैव युक्तियुक्तं समवलोकयामि। पर्याप्तिश्च-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अयमेकः अयमेकः इमौद्वाविति प्रतीति साक्षिकः स्वरूप सम्बन्ध विशेषएंवेति । केचन विद्वांसस्तु- एकत्वावच्छिन्नानुयोगिताक पर्याप्तिंस्वीकुर्वते । तदपरेतु -उभयत्वावच्छिन्नानुयोगिताक पर्याप्तिं स्वीकुर्वते । जगदीशस्तु एकत्वं तदैकत्वावच्छिनेनेन पर्याप्तमिति स्वीकुरुते ।

अत्रेदं जिज्ञास्यते केनापि यत् किमर्थं स्वीक्रीयते पर्याप्ति सम्बन्धः। पर्याप्त्यस्वीकारे आकाशोविति प्रयोगः व्यवहारे कथं न जायेतः तत्रापि द्वित्वसंख्यायाः विद्यमानत्वात् । अतः एवावश्यकत्वं पर्याप्तेः। तस्य स्वीकारे उभयत्वावच्छिन्नानुयोगिताकपर्याप्तिसम्बन्धेनगगनेद्वित्वे नास्तित्यो पूर्वोक्ताऽऽयत्तिः नाभ्युपैति लोचन गोचरतामिति । अत्र व्याचक्षते केचन विद्वांसस्तु यत् -प्रतियोगिव्यधिकरणहेतुसमानाधिकरणात्यन्ताभाव प्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदक रूपभिन्न साध्यतावच्छेदकतात्वावच्छिन्न प्रतियोगता पर्याप्त्यनुयोगिता-वच्छेदकरूविशिष्टावच्छिन्नसामानाधिकाण्यमित्येवास्तु लक्षणशरीरं किमेतत्कल्पपरित्यागस्मौचित्यं समवलोकयन्ति, कथयन्ति यत् प्रस्तुतयरिष्कार प्रावल्येन लक्षण समन्वयो भवेदेवेति नितरांनिश्चयं प्रतिभान्ति, किमर्थ लक्षणान्तर कल्पनमिति साधीयान् पक्षः।

परन्तु एकत्वादेः पर्याप्त्यस्वीकारे- वह्निमान धूमादित्यादौ साध्यतावच्छेदकतात्वावच्छिन्न प्रतियोगिताक पर्याप्त्यनुयोगिता वच्छेदकरुपा प्रसिद्धयाऽव्याप्त्यापत्तेः। धूमवान् वह्ने रित्यादावतिव्याप्त्यापत्तेः। साध्यतावच्छेदकगततादृशरूपाप्रसिद्धयात् ।

न च प्रतियोग्यसमानाधिकरण्येत्यत्र विशिष्ट सत्तावान् जातेरित्यादौ तथातिव्याप्ति निरासाय पर्याप्तिनिवेशस्यौचित्यं सर्वसम्मतत्वेनैव दोषोद्धारः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्यादेवेति नितरां सत्यमाभाति, परन्तुएकत्व प्रतियोगिक पर्याप्त्यस्वीकारे तत्रातिव्याप्तितादवस्थ्यमितिवाच्यम् । प्रतियोगिव्यधिकरण पदेन स्व प्रतियोगितावच्छेदकतात्वसमनियतनिरूपकतानाधिकरणत्वाभावस्य विवक्षणतयानावकाशः दोषस्येति विदुषां विचार पक्षः समुद्भासते ।

व्यायकताघटक सम्बन्धश्च-

स्व निरूपितावच्छेदकतात्व व्यापकत्व सम्बन्ध एवेति विज्ञातव्य एवेति विदुषां विचार सरणिः।

अवच्छेदकतावत्त्वं च - स्वसामानाधिकरण्य, स्वावच्छेदक सम्बन्धावच्छिन्नत्व, स्वानवच्छेदकानवच्छिन्नत्व स्ववृत्तित्वैच्चतुष्ठयसम्बन्धेन।

साध्यतावच्छेदक भिन्नो य साध्यनिष्ठोधर्मस्त दनवच्छेदया प्रतियोगिता तुनैव निवेश्या, कथंतु हेतुसमानाधिकरणाभाव प्रतियोगिता शून्य साध्य सामानाधिकरण्यस्यैव व्याप्तिलक्षणतयोऽनवच्छेदकत्वानुसरणस्य वैयर्थ्यमेव संपध्येत ।

महानसीयवहन्यभावीय प्रतियोगितातु- साध्यतावच्छेदकीभूत-वह्नित्वभिन्नो यः सीध्यनिष्ठोधर्मः महनसीयत्वमेव तदवच्छेद्यैव सा प्रतियोगिता वर्तते तदनवच्छेद्यातु सा नास्तीत्यतो नास्त्यव्याप्तिदोषावकाशः। अत्र साध्यतावच्छेदक भिन्न धर्मानवच्छिन्नत्व निवेशे वह्निमान् धूमादित्यादौ लक्षण संगमनाभाव तयैवाव्यात्पिदोषस्य ध्रैव्यमेवेति दृश्यते । घटद्य भावीय प्रतियोगितायाः साध्यतावच्छेदक भिन्नत्वाद्यवच्छिन्नत्वात् । अतएव साध्यनिष्ठत्वमेव संमुचितं प्रतिभाति ।

अत्र केनाय्युच्यतेयत् - साध्यनिष्ठत्व धर्मे सम्बन्धसामान्येन किंवा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सम्बन्ध विशेषेण । यदि सम्बन्ध विशेषेणोच्यते तर्हि क्वापि लक्ष्ये तादृश प्रतियोगित्वस्य सुतरां प्रसिद्धयाभावादेवाऽसंभवदोष एव दृष्टिपथे समागच्छति। समेषां घटत्वपटत्वादीनां कालिकादि सम्बन्धादिना साध्यवृत्तित्वमेव दृष्टि पथे सम्युपैति । यदि च साध्यक्ता विरोधित्वसम्बन्धेन प्रतियाद्यते तर्हि वह्निमान् धूमादित्यादौ महानसीयवहन्यभाव मादायाऽव्यप्तिस्तादवस्थ्यमेवेति समालोचकानां विचारपन्थाः।

न च साध्यतावच्छेदकातिरिक्तधर्मावच्छिन्ना या साध्यनिष्ठा प्रतियोगितातन्निरुपकत्वऽभावेदीयतामित्यतोनैव पूर्वोक्त दोषः संभवतीतिवाच्यम्, तद्रूपवान् द्रव्यत्वादित्यत्र समनियताभावस्य तेथात्वे तद्रसाभावमादायातिव्याप्तेः। तथासति हेतुसमानाधिकरणाभाव प्रतियोगिताशून्यसाध्य सामानाधिकरण्यस्यैव व्याप्तित्वे तदवच्छेदक त्वानुसरणस्यवैयर्थ्यापत्तेः।

कथं तु तद् व्यक्तिनिष्ठ प्रतियोगितायाः साध्यतावच्छेदकातिरिक्त साध्यवृत्तित्वेन तद् व्यक्त्यभावस्य लक्षणाघटकत्वात् ।

समवायेन प्रमेयस्य साध्यतां आत्मत्व हेतावव्याप्तिः। प्रतियोगि-व्यधिकरणाभावस्याऽप्रसिद्धेः। किन्तु दिक्कृत विशेषणता विशेष संसर्गेण प्रमयत्वविशिष्टाभावस्य प्रसिद्धत्वात् ।

न चावच्छेदकत्वानुसरण वैयर्थ्य स्वीकारे प्रमेयवान् वाच्यत्वादित्यादौ हेतु समानाधिकरणाभावस्याऽप्रसिद्धेः ।

अन्येषां विचारानुसारेण जातिविशिष्टस्यतादात्म्येन साध्यत्वे सत्तादि हेतावव्याप्तेः हेतुसमानाधिकरणानां द्रव्यं न गुणो नेत्यादि भेदस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रतियोगिताशून्यत्वस्य साध्ये अभावात् । तद्वारणायाऽनवच्छेदकत्वानुसारणस्यौचित्यं परमावश्यकं प्रतिभाति ।

यद्यनवच्छेदकत्वानुसरणस्य वैयर्थ्यं जायते चेत् भवतुनाम काहानिरिति तथा च- प्रमेयवान् वाच्यत्वादित्यादावव्याप्तिरेवदोषः विदुषां विचारपथे समापतेत् । साध्यतावच्छेदकातिरिक्तस्य घटत्वादेः तदनवच्छिन्न प्रतियोगिताकस्य तादृशाभावस्याऽप्रसिद्धया सुतरामव्याप्तेः न चाऽनवच्छेदकत्वानुसरणेऽपि प्रतिपादित स्थले जातिमद्घटाभावमादायाऽव्याप्तिः पुनरुपि भेदेवेति वाच्यम्, साध्यतावच्छेदरूपाभिन्नस्य तदवृत्तित्वैन समुल्लिखित प्रतियोगितायांविवक्षणीयत्वात् ।

साध्यवृत्तित्वं च रूपे स्वाश्रय वृत्तित्व सम्बन्धेनेति विज्ञातव्यमिति धीधनेशैः।

अपरे समालोचकास्तदित्त्थं व्याचक्षते किल तत्राऽव्याप्ति निरासाय येन रूपेण साध्यतावच्छेदकत्वं रूपेण तद्धर्मानवच्छिन्न प्रकारतावच्छेकभिन्नार्थकत्वेनैव प्रतिपादनस्यौचित्यतयाद्रव्यादिनिष्ठ प्रतियोगितायां साध्यतावच्छेदकातिरिक्तसाध्यनिष्ठ धर्मानवच्छिन्नत्वस्य नितरामविद्यमानत्वेन द्रव्यादिप्रतियोगिकमेदस्य लक्षणाघटकत्वेन प्रमेयाश्रयवान् धूमादित्यादावव्याप्तिनिरासायाऽनवच्छेदकत्वानुसरणस्यौचित्यं शिरोमणिः तथा प्रतियोगितानवच्छेदकोयोधर्म इति परमावश्यकतया दीधिति कारेणसमुपपादि ।

द्रव्यत्वेनरूपेण धूमे किं वाधूम सामान्ये वह्नि व्याप्यत्वस्य निराकरणाय विशेषरूपेण ग्रन्थसम्मत तथैव स्वाभिमततया निर्दिशतिव्याप्तिलक्षणं दीधितौतद्रूपविशिष्टस्यैति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वह्नित्वावच्छिन्न प्रकारतानिरूपित पर्वतत्वावच्छिन्न विशेष्यता शाल्यनुमितित्वावच्छिन्नं प्रति वह्निव्याप्यधूमत्वावच्छिन्न प्रकारताशालि निश्चयत्वेन कारणत्वस्याभ्युपगमतया कार्य कारणभावः समभ्युपेयः । कार्यकराण भावश्चेत्त्थंविज्ञेयः समैः।

आत्मनिष्ठ प्रत्यासत्त्या किंवा समान विशेष्यता प्रत्यसत्त्यविति मन्तव्यः।

तद्धर्भावच्छिन्नहेतुकतद्धर्भावच्छिन्न साध्यकानुमितौ वह्निव्याप्य धूमत्वावच्छिन्नप्रकारता निरूपित पर्वतत्त्वावच्छिन्न विशेष्यताशालिनिश्चयत्वेन कारणत्वस्य परमावश्यकत्वंविद्यतएवेति निश्चप्रचम् । एकज्ञानीय समानाधिकरण विषयतयोखच्छेद्यावच्छद्यकभावः, किंवाऽभेदोवेति मन्यन्ते विद्वच्चणः।

तत्र तर्कालंकाराणांविचारेऽभेदएवेति निश्चयः। भट्टाचार्यणां विचारे अवच्छेद्यावच्छेद्यकभाव एव तेनविषयविधयाअनुमितिजनकतायां सुतरामवच्छदकत्वं भवेदेवेति निश्चिनोमि ।

व्यापक सामानाधिकरण्यविशिष्ठधूमत्वस्यैवव्याप्तित्वंस्वीकुरुते-मणिकारः। धूमत्वावच्छिन्नलिंगाकवह्नित्ववच्छिन्न विधेय काशाल्यनुमिति-जनकतावच्छेदिका खेतर भिन्ना तद्धर्मावच्छिन्न सामानाधिकरण्याभाव प्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नसामानाधिकरणयात् । नन्वत्र तद्धर्भाश्रयलिङ्गकत्व प्रतिपादनेनापि प्रतिपादितविषयस्यसिद्धिः स्योदेवेतिसत्यं प्रतिभाति । तथा च द्रव्यत्वावच्छिन्न हेतुक वह्नित्वाव च्छिन्न विधेयता शाल्यनुमितिजनकतावच्छेदकस्य पक्षान्तर्गतत्वेन तादात्म्य सम्बन्धेन

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तद्धर्मत्वावाच्छिन्न समानाधिकरणात्यन्ताभाव प्रतियोगितानवच्छेदक वह्नित्वावच्छिन्न समानाधिकरण्यरूपव्याप्ते रस त्वात् भावगासिद्धिरेव समापतति। इत्यतो पक्षतावच्छेदकावच्छेदेन हेतोरभाव: भागासिद्धिदोष एव समागच्छति। अमुना हेतुना तद्दोष निरासाय तद्धर्भावच्छिन्नलिंग कत्व प्रतिपादपादनस्यौचित्यं वरीवर्ति:।

एवं च धूमत्वावच्छिन्न समानाधिकरणात्यन्ताभाव प्रतियोगितानवच्छेदक वह्नित्वावच्छिन्न सामानाधिकरण्यस्य तादात्म्येन धूमत्वावच्छिन्नलिंगक वह्नि त्वाश्रयतदव्यक्तित्वावच्छिन्न विधेयता शाल्यनुमिति जनकतावच्छेदके पक्षधर्भकोटौ नितरामविद्यमानतया पूर्वोक्तदोषस्य तादव्यस्थ्यतया तद्धर्भावच्छिन्नत्वस्य विधेय कोटौ तन्निवेशस्यावश्यकत्वं दृश्यते । अतएव भागासिद्धिं निराकर्तुं तथानुमानस्यस्वरूपं निर्देशष्टव्यमिति विज्ञायते विदुषा। तथा सति-

धूमत्वावच्छिनन हेतुक वह्नित्ववच्छिनन साध्यकानुमिति जनकता-नतिरिक्तवृत्ति विषयताखेतर भिन्नधूमत्वावच्छिन्न समानाधिकरणात्यन्ताभाव प्रतियोगितानवच्छेदक वह्नित्वाषच्छिन्न सामानाधिकरण्यनिरूपितत्वादिति विवक्षण परकत्वस्यवक्ष्यमाणतया नैवभागासिद्धिदोष: समापतति। अतएव व्याप्तिपदनोत्त्य दोष: दृष्टियथेयथिकायते। वस्तुतस्तुव्यापक समानाधिकरण्य-विशिष्टस्यैव व्याप्तित्वं समुचितमिति विद्वांस: स्वीकुर्वते ।

अनेनशिरोमणिकथनेन विज्ञायते यत् द्रव्यत्वाच्छिन्नलिंगक वहिनत्वाचच्छिन्न विधेयताशाल्यनुमिति जनकतावच्छेदकस्य पक्षत्वनिरासाय तद्रूयविशिष्टस्येति कथं व्यापक निर्देशानुसारेण निगदितं शिरोमणिना दीधितौ यद्रूपेति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनवच्छेदत्वानुसरणेऽपि चालनीन्यायेन दण्डमात्रस्यैव हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदकत्वेन दण्डिमान् दण्डिसंयोगात् अत्राव्याप्तिः पुनरपिस्यादेवेति निश्चयं मन्ये। शुद्धसाध्यतावच्छेदकस्थले निर्खच्छिन्नत्वमेव तत्र प्रवेश्यम्-विदुषा। कुत्रापि साध्यतावच्छेदक तदितरोभयानवच्छिन्नंदेयम् । अन्यथा पर्वते महानसीयत्व विशिष्ट जातिमान्नास्ति प्रतीत्या विशिष्टवह्नित्वस्य प्रतियोगितावच्छेदकत्वेन वह्निमान् धूमादित्यादौसुतरामव्याप्तिः स्यादेवेति सत्यम् ।

जातिमद्वान् घटत्वात् इत्यत्र घटे परसमवेतत्व विशिष्ट जातिमान्नास्तीति विशिष्टजातेः विद्यमानतयाऽव्याप्ति प्रसंगस्यौचित्यम् ।

नन्वत्र-

महानसीय वह्निवृत्तित्व विशिष्ट जातिमान्नास्तीति प्रतीत्यासाध्यतावच्छेदकतरोमयानवच्छिन्नत्वाभावात् कथमव्याप्तिः संगच्छते। सत्यमिदंवचः प्रतिभाति ।

तद्दण्डवान् नास्तीति प्रतीतिवलेन तदविशिष्टदण्डस्यैव प्रतियोगितावच्छेदकत्वं जायते। अतः शुद्धदण्डस्य नैव प्रतियोगितावच्छेदकत्वं समुयजायेत् । तथा च साध्यतावच्छेदकतावच्छेदकतदितरोभयानवच्छिन्नत्व विशेषणाभावतया तदभावसत्त्वान्नाव्याप्तिरिति विज्ञायते।

परन्तु प्रमेयदण्डवान्नास्तीतिप्रतीतिप्रत्ययपरकत्वेन प्रमेयत्वोयलक्षितदण्डस्य यथा प्रतियोगितावच्छेदकत्वं भवति तथा तद्दण्डवान्नास्तीत्यादावपि तत्त्वोपलक्षित दण्डस्यैवावच्छेदकत्वमवगाहते, अतः केवलस्यावच्छेदकत्वाभावात् विशिष्टस्यैवावच्छेदकत्वाङ्गीकार्य प्रमेयत्व-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विशिष्टदण्डादेरपि तथात्वापत्तेः। अतएव शिरोमणिः-दण्डयादौ साध्ये परम्परासम्बद्धंदण्डत्वादिकमेव साध्यतावच्छेदकमतोनाव्याप्तिः।

स्वाश्रयालक्षणपरम्परासम्बन्धेन दण्डत्वविशिष्टस्यदण्डिनः हेत्वधिकरणे अभावाभावात् नाव्याप्तिशंकावतारः ।

तत्सम्बन्धावच्छिन्नत्वाप्रवेशे रुपवान् पृथिवीत्वात्'' इत्यादाव-व्याप्तिप्रसंगः। अतएव हेतुमन्निष्ठाभाव प्रतियोगितावच्छेदकतायां साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वं प्रवेष्टव्यम् । अन्यथा रूपत्व विशिष्ट ज्ञानस्य विषयिता संवन्धेन समवायेनाभावस्य हेत्वधि काणे विद्यमानत्वेन रुपवान् पृथिवीत्वादित्यादावव्याप्ति प्रसंगः। वास्तविकंच विद्यमान साध्यतावच्छेदक सम्बन्धेन प्रतियोगिवैपधिकरण्यस्य पारिभाविकस्यैव प्रवेशे रुपवान् पृथिवीत्वादित्यत्राऽव्याप्तिः, किन्तु वह्निमान् धूमादित्यत्रनाव्याप्तिः। अस्मै प्रयोजनाय प्रसिद्धस्थलपरित्याग इति विद्वद्भिः समादरणीय एवेति । एवं प्रतियोगिता धर्मिकोभयाभावघटितलक्षणे वह्निमान् धूमादित्यादिस्थले नाव्याप्तिःसम्भवति, इत्यतो रूपसाध्यकानुमानमेव प्रादर्शितार्किक चणैः।

अत्र केनापि विदुषोच्यते यत्-

समवायसंसर्गेणैव स्वरूपतः जातेः भानात् विषयिता सम्बन्धावच्छिन्न रूपत्वनिष्ठावच्छेदेकतायां निर्खच्छिन्नत्वाभावात् कथमव्याप्तिरिति चेत् सत्यमाभाति। किन्तु गोत्वंनाम नापिस्वरूपतो जातेः भानास्याङ्गीकारात्। अतएव प्रसिद्धस्थलभयहाय स्थलान्तरानुधावनमेव तेषं शरणमिति व्याचक्षते सुधीजनः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्ये आचार्यारित्थं प्रतिपादयन्ति यत् -वह्निप्रतियोगिक संयोगसम्बन्धेन वह्नेः साध्यत्वेअव्याप्तिदोषमपाकर्तुंतादृशप्रतियोगितायां प्रतियोगिव्यधिकरण-विशिष्टसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य परिभाषिकत्वेन व्याख्यान्-सापेक्षतया तादृशाभावस्यसमुपयुक्तस्थले विद्यमानतयापि साध्यतावच्छेदक-संसर्गाविच्छिन्नप्रतियोगिताकाभावमात्रं स्वीकृत्याऽव्याप्तिप्रदानं सम्भवेऽपि महताप्रयासेन तत्सम्यापदनं निराकरणं च शिरोवेष्टनेन नासिकास्यर्श तुल्य मिवाभातीत्याशयेन, प्रसिद्धलपरित्यागस्य वैलक्षण्यं प्रतिभातीति तार्किकचणाः।

एतत् सर्वं सुचिन्त्यप्रत्ययादि शिरोमणिना यत् दण्डयादाविति । यद्यत्रतर्करसरसिकेन विदुषा स्ववलवत्तर प्रमाणपटलेनोच्यते यत् दण्डयधिकरणे तत्ताभाव विशिष्ट शुद्धदण्डस्यैवावच्छेदकत्व प्रत्ययस्यैव जायमानतया तदण्डी नास्तीतिप्रतीतिवलेन दण्डस्यैवावच्छेदकत्वमुपयुज्यते प्रमेयदण्डवान्नास्तीत्यत्रापि विशिष्टस्यैवावच्छेदकत्वसिद्धौकथं तर्हि तत्राव्याप्तिकथनमसंगतमेवेति ध्रौव्यमेवेति विदुषां विचारपन्थाः।

अतएव स्थलान्तरानुधावनम्, रूपत्वन्यूनवृत्ति जातिमदवान् रुपादित्यदावव्याप्तिः। नीलपीतत्वजातीनां पूर्वोक्तप्रतियोगितायाः निरवच्छिन्नावचछेदकत्वेननीलोनास्तीत्यादिप्रत्ययस्य दृष्टिगोचरतया दण्डिमान् दण्डिसंयोदित्यादावपि तथाव्याप्तिविरहमाकलय्यादिपदमुपात्तम् ग्रन्थकारेण ।

तथा च स्वन्यूनवृत्तिजात्याश्रयत्वसम्बन्धेनरूपत्वस्यैव साध्यता-वच्छेदकत्वेनाऽव्याप्ति शङ्कालेशः दृष्टिगोचरतां समभ्युयैति। वास्तविकंतु दण्डत्वस्यैव साध्यतावच्छदकत्वे दण्डिमान् दण्डिसंयोगादित्यत्रानुमितिः न स्यात् । दण्डस्यैव व्यापकतानवचछेदकत्व प्रत्ययवलेनैव तत्र स्थले

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आदिपदमुपात्तम् । हेतुनामुना स्ववृत्तिदण्डत्व जात्याश्रयाधिकरणलक्षण-परंपरासम्बन्धेन साध्यतावच्छेदकत्व लाभात् दण्डिमान् दण्डिसंयोगदित्यत्र व्याप्तिलक्षणसमन्वयसम्भवतयानात्राव्याप्तेरेवावसरःसमुपजायते ।

दण्डत्वधर्मिकानवच्छेदकत्वज्ञानस्याकार्यतावच्छेदकत्वेन दण्डत्वावच्छिन्नविधेयताकानुमितित्वस्यदण्डप्रकारकत्व समुपन्नमेवेत्यतो न तत्र काप्यनुपपत्तिः लोचन गोचरायते । उभयधर्मावच्छिन्नस्यैव सा मग्री भवति चेत् दण्डत्वावच्छिन्नस्यैव सामग्री भवति चेत् दण्डत्वावच्छिन्न विधेयताकानुमितित्वस्य तज्ज्ञानकार्यतावच्छेदकत्वेन सर्वदा तदुभयाकारानुमितेः सर्वसम्मतत्त्वमेवेति साधीयान् पक्षः विलसति।

अत्र केवचन विद्वांसस्तु इत्थं प्रतिपादयन्ति यत् साध्ता विशिष्ट निरूपकतासमानाधिकरणनिरूपकतावच्छेदकतात्वावच्छिन्न प्रतियोगिताक पर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वसाध्यतावच्छेदकताघटक सम्बन्धातिरिक्त सम्बन्धावच्छि्न्नत्वोभयाभावस्य विवक्षणीयत्वेन नास्त्यवकाशः कस्यापिदोषस्येति विज्ञेयं विज्ञाजनैः। रूपवृत्तित्वं च- स्वनिरूपक प्रतियोगितावच्छेदकतात्वावच्छिवच्छिन्न प्रतियोगिताक पर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन । मेदघटिताभेदघटितव्यापकस्य स्वशास्त्रे परशास्त्रे वेति व्याख्यान् सापेक्षतयैव प्रतिपाद्यतया तदनुसारमेव तत्रापिव्याख्येयमेवेति साधीयान् पक्षः विभाति । तथा साध्यतावच्छेदकता घटक सम्बन्धातिरिक्त सम्बन्धावच्छिन्नत्व साध्यतावच्छेदकसमानाधिकरण भेद प्रतियोगितानवच्छेदकनिष्ठत्वोभयाभावनिवेशनीयतया न कोपि दोषः। यद्यपि चिन्त्यमिति कोपि तथ्य हीनंवचः निगदति, तत्र तेषां वचसि प्रभाण परकत्वाभावस्यपि दृश्यमानतया स्वयमेव कल्पनागगन कुसुमायमान-मिवाभाति । तद्-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वचनमपि स्वयंचिन्त्यनीयमिव तत्र प्रतिभाति । आर्थसमाजग्रस्तत्वात् । वहुवादिविवदमानत्वाच्च। प्रमाणपूर्वकत्वस्या दृश्यमानतया रिक्तंवचः लोचनपथेपथिकाकयते ।

वस्तुतस्तु- प्रतियोगि व्याधिकरण हेतुमन्निष्ठाभावीय प्रतियोगितायां साध्यतावच्छेदकविशिष्ठावच्छेदकत्वानिरूपकत्वस्यविशेषणीयत्वप्रवेश सौलभ्यतयानास्तिदोषस्यसम्भावनादृश्यते, अतएव तन्निवेशवैलक्षण्य प्रभावादेव दोषाभावोपिनिराकृतः। वैः स्वानवच्छेदकसम्बन्धावच्छिन्नत्व, स्वसमनियतत्त्व स्वसाज्यैतत्त्रितय सम्बन्धेन, साजात्यंच किंचिदवच्छिन्नत्व निखच्छिन्नत्वान्यतररुपेण। नैतादृश निवेश प्रवेशेऽपि महानसीयवहन्यभाव-मादायवारयितुं क्षमते कोपि। तेन साध्यतावच्छेदक विशिष्टन्या-वच्छेदकत्वानिरुपकत्व विवक्षणीयतयैव तन्निराकर्तुं शक्यमेवेति। नवीन विचारानुसारमवलम्बव्य दण्डिमानित्यनुमितौ नैव संयोग ससर्गेणदण्डयादौ-प्रकारत्वमुपजायते, अपितुस्ववृत्ति पुरुषत्वावच्छिन्नाधिकरणत्व संसर्गेण। तथाचानुमितौ न कापिवाधा दृष्टि पथे समागच्छति। तथापि स्वाभाविकानुभव विरोधः भवेदेवेति विदुषां विचार पन्थाः। दीधितिकारमते साध्यतावच्छेदक धर्ममर्यादा प्रभाववैलण्येन संयोगस्य च साध्यतावच्छेदकघटकसंसर्गविधया नितराभवगाहमानतया स्वाभाविकापलापापत्तेः ध्रौव्यमेवेति ज्यायान् पक्षः प्रतिभाति।

अनयारीत्या तन्निराकरणौचौत्यिदर्शनत् द्विविधानुमितिस्वीकारे द्विविधकार्यकारणभावकल्पनाप्रसूनस्याविमलानमानेऽपि गुरुत्वापतिदोष-ग्रस्तत्वादिति नैव विदुषां समाजः नितरामादियते । कथं तु दण्डिसंयोग-साध्यकस्थले तत्तदण्डिसंयोगभावं स्वीकृत्य समापतिताव्याप्ति शंका-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

व्याजेन तदूरीकतुं साध्यता वच्छेदकताविशिष्टन्यावच्छेदक प्रवेशवैशिष्टयेनै-तद्दोषोपि निराकृतः स्यादिति निश्चयभवगच्छामि। एवमपि तादृशावच्छेद-कतावच्छेदके प्रतियोगितावच्छेदकतावच्छेदकवैशिष्टस्यमपि प्रवेष्टष्यमिति वृद्धाः।

परंतु हेतावपि दण्डिसामान्याभाववृत्तित्वरूप व्यभिचार ज्ञान दशायामपि तथोक्त व्याप्तिज्ञान सम्भवेनानुमित्यापत्तेः सुस्थिरैवति निश्चयंमन्ये।

तथापि पूर्वोक्त सम्बन्धेन दण्डिसामान्याभाव दण्डत्वावच्छिन्नाभावयोः समनियेतोपस्थितिकत्वेन दण्डिसामान्याभाववद् ग्रहकाले प्रतिपादितसंसर्गेण दण्डत्वावच्छिन्नस्याभववद्वृर्त्तित्वस्यापि तत्र विद्यमानतया तादृश ग्रहाधीन व्याप्तिज्ञानं नैवेतिकथनं विवाद ग्रहग्रस्ततया कथमपि तस्यसम्भावनानास्तीति विचारप्रवाहदोषग्रस्ततया कथमुक्तं व्याप्तिज्ञानं निर्दुष्टंस्यादिति केचन तादृश विचारप्रवाहपारतन्त्र्यतयातमेव पक्षं ब्रुवते। तादृश विचार पराषारप्रवाह झंझावातोद्धूततया नैव मान्यानां विचारचातुर्येण प्रमाण पूर्वकत्वेनैव समादरभावं स्वीकुरुते वृद्धगुरुः।

संयोगेन दण्डप्रकारक ज्ञानस्य दण्डत्व प्रकरकज्ञानस्य च तादृशज्ञान सामग्रीपारतन्त्र्येण च विवाद ग्रस्ततया समनियकत्वाभवात् न तथोक्तस्य प्रामाण्यमिति ।

अथ व्याप्यत्वधठितलक्षणस्य वाच्यत्वादिसाध्यकस्थले तदभावाधि-करणाऽप्रसिद्ध्याऽव्याप्तिदोषस्य ध्रौव्यतया तादृशव्याप्तिलक्षण स्यप्रतिपादनं दुर्घटमेवातः सिद्धान्तव्याप्तिनिरुपणाभावश्यकथमेवेत्यतः व्यापकलक्षणं स्वाभाविकगत्या निर्वक्ति। तनोतत्र व्यापकत्वं केन रूपेण स्वीक्रीयते,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तदा प्रमेयादि साध्यकस्थले किंवा तद्विशिष्ट साध्यकस्थले घटपटाभावीय प्रतियोगितावच्छेदकस्य घटत्वपटत्वादेरपि प्रमेयत्वेन रूपेण तद्विशिष्ट त्वेनरूपेण वा प्रमेयत्वव्यापकाभावाद प्रसिद्धयाव्याप्तिलक्षण समन्वयस्य दुर्घटत्वापत्तेः जागरुकत्वमेव प्रतिभाति।

यद्यत्र तद् व्यक्तित्वेन रुपेणोच्यते तदातादृशावच्छेदक व्यापकाप्रसिद्धया पुनरपितद्दोषस्य जागुरुकत्वमेव समागच्छत्येवेति निश्चीयते ।

न च स्वसमानकालीन साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्न भिन्न सम्बन्धावच्छिन्नव्यापकत्वसम्बन्धेन या साध्यतावच्छेदकता विशिष्ट तादृश प्रतियोगितायाप्रवेशः नितरामावश्यक एवेति निश्चप्रचम् । किन्तु समुल्लिखित प्रमेयविशिष्टसाध्यकस्थलेविषयितासम्बन्धेन प्रमेय प्रतियोगिकाभावमदायाव्याप्तिदोषोद्धारः सर्वत्राऽसम्भव एवाऽऽभातीति वाच्यम् । स्वाच्छेदकसम्बन्धावच्छिन्नत्वस्वावच्छेदककधर्मावच्छिन्नत्व स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितय सम्बन्धेन साध्यतावच्छेदक विशिष्टसमानाधिकरण निरुपकतावच्छेदकव्यापकत्वोभयाभावस्य विवक्षणीय तयानास्तिपूर्वोक्त दोषशंका समुद्भासते स्वप्न संसार विलास यात्रायां कदाचिदपि ।

यद्यपि व्यापकत्वं साध्यतावच्छेदकसम्बन्धेनोच्यते किंवा प्रतियोगितावच्छेदक व्यापकत्वेनवा । वह्नित्वप्रतियोगिकसमवाय कालिकोमय सम्बन्धेन घटत्वविशिष्ट साध्यकस्थले तादृशसम्बन्धेन तन्निष्ठ प्रतियोगिताकाभेदस्यैवाऽप्रसिद्धया सुतरामव्याप्ति दोषस्या जागुरुकत्वात्।

विषयितासम्बन्धेन रूपवान् पृथिवीत्वादित्यत्राऽव्याप्तिदोषस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तादवस्थ्यमेव सम्भवति चेत् तादृश सम्बन्धेन रुपविशिष्टज्ञानाभावस्यापि लक्षण घटकत्वात् ।

अथच वह्नित्वप्रतियोगिककालिकेन वहिनत्वविशिष्टस्य कालिकेन साध्यत्वे महाकालत्व हेतौ साध्यतावच्छेदकताघटक कालिक सम्बन्धेन तादृश व्यापकत्वादभावाप्रसिद्धेरित्यपि द्रष्टव्योयं विषयः प्रतिभाति।

प्रतियोगिव्यधिकरण हेतुमन्निष्ठाभाव प्रतियोगितायां साध्यतावच्छेदकताविशिष्टावच्छेदकत्वानिरूपकत्वस्य विशेषणीयत्वेन नास्ति दोषावकाशः वरीवर्ति। तत्र वैशिष्स्यञ्च स्वानवच्छेदकसम्ब्धानवच्छिन्नत्व स्वसमनियतत्व स्वसाज्यत्यैतत्त्रितय सम्बन्धेन । तदा किंचिदवच्छिन्नत्व निरवच्छिन्नत्वान्यतर सम्बन्धेन । एवं सत्यपि महानसीय वहन्यभावमादायाऽव्याप्ति दोषस्य निराकरण मार्गः विदुषां विचारसमुदाये नोदेतिप्रतरामिति। तथापि साध्यतावच्छेदकविशिष्टान्यावच्छेदत्वानिरूपकत्वस्य विवक्षणीयत्वस्यौचित्यतया पितर्हि दोषोद्धारः नैव स्वप्न संसारेऽपि लोचना गोचरतां समभ्युपैति तार्किकाणां समाजविचारावसरे । अतएव तत्र पर्याप्ति सम्बन्ध एव शरणंहेतुनामुना- एंव स्वीकर्तुं वरम्, नान्यदीयः पन्थाः दृष्टियथे समापतति। वर्तते चेत् गौरवगुरुत्वदोषसमाकलितत्वेन नास्ति विचार पन्थाः श्रयसां भवत्येविति निश्चिनोमि। वास्तविकंतु साध्यतावच्छेदकसम्बन्धेन प्रतियोगिव्याधिकरणस्य प्रवेशे रूपवान् पृथिवीत्वादित्यत्राऽव्याप्तिस्तु संगच्छत एवेति ननु वह्निमान् धूमादित्यत्राव्याप्तिरिति सूचयितुं प्रसिद्धस्थलमयास्य स्थलान्तरानुधऽवनंनितान्तं सूचयति मर्मज्ञः।

अन्येषां विचोरतु प्रतियोगिता धर्मिकोभयाभावद्यटित लक्षणे वह्निमान् धूमादित्यादिस्थले नाप्याप्तिः संगच्छते, अतएव स्थालान्तानुधावनं स्वीकुरुते।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अत्र समवाय सम्बन्धेन जातेः स्वरूपतो मानाङ्गीकारपक्षे विषयिता सम्बन्धावच्छिन्नरूपत्वनिष्ठावच्छेदकतायां निरवच्छिन्नत्वाऽसत्वात् कथमुक्ताऽव्याप्तिरिति सत्यमभाति, घटत्वं जानामित्यनुव्यवसायानुरोध प्रावल्यतया विषयित्व सम्बन्धेन जतिरपि स्वरूपतो मानस्य चोररीकारादिति नैवकदापि विस्मर्तव्यात्तिति गुरुचरणैः प्रतयापादि। किन्त्विति तर्कालंकार पक्षमङ्गीकृत्य साध्यतावच्छेदकसम्बनधेन प्रतियोगिनोघटादेरधिकरणस्या-प्रसिद्धया तत्प्रयुक्ताऽव्याप्तिरिति सत्यमाभाति यद्यपि, तथापि साध्यता-वच्छेदक सम्बन्धावच्छिन्नाधिकरणत्वीय स्वरूप सम्बन्ध्येन प्रतियोगिता-वच्छेदकरणे साध्यतावच्छेदक सम्बन्धान्यसम्बन्धावच्छिन्नत्व साध्य-निष्ठत्वोभयाभावस्य प्रतियोगितायां प्रवेशेनैव दोषोद्धारः स्यादेवेति गुरुचरणानां राद्धान्तः । मान्यस्तु- दण्डिमान् दण्डिसंयोगाद्यनुमितौ संयोग सम्बन्धेन न दण्डयादेः प्रकारत्वं भासते परन्तु स्व वृत्ति पुरुषत्वावच्छिन्नाधि-करणत्व संसर्गेण प्रकारत्वंवरीवर्ति, इत्यवपक्षं भाषन्ते नात्रानुभव विरोधः शंकनीयः केनापि। कथं तु शिरोमणि विचारनुसारं साध्यतावच्छेदक धर्म विधया संयोगस्य च साध्यतावच्छेदकताघटक संसर्ग विधयाऽवगाहमान-स्यापलापापत्तेः।

दण्डिमान् दण्डिसंयाद्यनुमितौ नोक्त व्याप्तिज्ञा नस्य हेतुत्वं विद्यते-किन्तु अन्योन्याभाव घटितव्याप्तिज्ञानहेतुत्वंस्वीकुरुते अपितु नान्यदीयसंसर्गेणेति कथनम् युक्त्या प्रामाणिक वचनमपि शिरोमणिनापि स्वीकृतमेवेति नात्र वैमत्यं विदुषां प्रतिभाति।

किंतु- प्राच्य विदुषां विचार पन्थांः सुतरामन्यदीयएवेति निश्चयं प्रतीमः कथंतु दण्डत्वस्य साध्यता वच्छेदकत्वे नानुमितिः सम्भवति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दण्डिमान् इति। दण्डास्य व्यापकतानवच्छेदकत्वादित्यस्वारस्यात् । अतएव शिरोमणिः स्व विचार ग्रन्थे आदियदमुपतम् तेन महता, अतएव स्ववृत्तिदण्डत्व जात्याश्रयलक्षण परंपरासंसर्गेणैव साध्यतावच्छेदकत्वलाभात् दण्डिमान् दण्डिसंयागादित्याकारानुमितिः सुतरां प्रामाणिकीति ग्रन्थविचारसरणिः। तेन पूर्वोक्तनुमितिः सुतरां साधीयसीति कथयन्ति सुधीजनाः। केचन विद्वांसस्त्वित्त्थं निगदन्ति यत् - साध्यसाध्यनभेदेन व्याप्ति ग्रहानुमित्योः कार्यकारणभेदवैचिन्त्र्येण हेतुमन्निष्ठा भाव प्रतियोगिता नवच्छेदको योधर्मस्तद्विशिष्टावच्छिन्नसामानाधिकरण्यस्यैव व्याप्तित्वे तादृश विशिष्टावच्छिन्नविधेयकानुमिति प्रयोजिका भवति। एवं च यत्रस्थले परम्परया यत्रानुमितौ विधेयतावच्छेदकं दण्डत्वमेव संजायते तत्र- हेतुमन्निष्ठाभाव प्रतियोगितानवच्छेदको योधर्मः परंपरया तदवच्छिन्न समानाधिकरण्यैव व्याप्तिः प्रयोजिका भवति। अतएव शिरोमणिःस्व विचारानुसारं प्रत्यपादीत् यत्- दण्डयादौसाध्ये परंपरासम्बन्धेन दण्डत्वादिकमेव साध्यतावच्छेदकमिति ग्रन्थः शिरोमणेः संगच्छत एवेतिनिश्चिनोमि। यदि दण्डत्वस्यसाध्यतावच्छेदकत्वं नाङ्गीकुरुते चेत् परमवृद्धगुरुदर्शित विचारमार्गः चाङ्गीकर्तव्यः तत्त्वालोकस्येति निश्चयः।

यदि च- प्रतियोगितावच्छेदकतायां साध्यतावच्छेदकता विशिष्टान्यावच्छेदकत्वानिरूपितत्त्वनिवेशेकिंवा तादृशोभयानवच्छिन्नत्व प्रवेशे न्याप्तिदोषावसरः समुपसर्पति, कथं तर्हि पूर्वोक्तस्थलेऽव्याप्ति दोषापातः सम्भवेदिति रूपत्वन्यूनवृत्तिजातिमद्वान् रूपादित्यात्याप्ति निराकरणाय तदनुसरणस्यौचित्यं सर्वसम्भतमेवेति ज्यायान् विचारः गुरुचरणा नामिति सार्वजनीनोऽयं पन्थाः विलसत्येवेतिः निश्चयचम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्येषां विचारेत्वित्त्थंविज्ञात्यं यत् -दण्डत्वधर्मिक प्रतियोगितानवच्छेदकत्वज्ञानस्यैवकार्यतावच्छेदकत्वेन दण्डत्वावाच्छिन्न विधेयताकानुमितित्वस्य दण्ड प्रकारकत्वंसर्वथासमुपपन्नभेवेति निश्चयं प्रत्येमि। परम्परपा दण्डत्वावच्छिन्न विधेयता कानुमितित्वस्या तादृशज्ञानकार्यतावच्छेदकत्वेन सर्वेयोमयधर्मावच्छिन्नस्य सामग्रीवलादेव तदुभयकोटिकानुमितिः प्रतिबन्धकाभाववलादेवस्यादेवेति समेषां निश्चयः। नात्रकापि शंका लोचन गोचरायते । किन्तु दण्डिमान् दण्डिसंयोगादित्यत्रापि समुल्लिखित व्याप्तिज्ञानस्य कारणंत्वंनदृश्यते परन्तु अन्योनाभावघटित व्याप्तिज्ञान स्यैव हेतुत्वंतर्क सम्मतमेवेति निश्चेतव्यम् ।

नव्याऽऽचार्याणां विचारे दण्डिमान् दण्डिसंयोगादित्यनुमितौ संयोग सम्बन्धेन दण्डस्य प्रकारत्वं नैवास्ते किन्तु स्ववृत्ति पुरुषत्वावच्छिन्नाधिकण त्वसंसर्गेणेति निश्चयं मन्ये। नचानुभव विरोध इति वक्तुंतावदशक्यमेवेति विदुषां राद्धान्तः।

शिरोमणि विचारपक्षे साध्यतावच्छेदक धर्म प्रकार मर्यादया संयोगस्य च साध्यतावच्छेदकता घटकसंसर्गविधया अवगाहितस्यापलापापत्तेः।

वस्तुस्तु- साध्यतावचछेदक सम्बन्धेन प्रतियोगिनो घटादेरधिकरणा प्रसिद्धया पूर्वोक्तदोषस्य संभावना नावलोक्यते । सत्यमिदं वचनं प्रतिभाति विदुषांसुतराम्, परन्तु- साध्यतावच्छेदक सम्बन्ध भिन्न सम्बन्धावच्छिन्नत्व साध्यनिष्ठत्वोभयाभावस्य हेत्वधिकरणे किंवा प्रतियोगितायां तिवेशेन नात्रकोपि दोषः समभ्युपैति ।

अतएव तर्कालंकारोपि शिरोमणिपक्षमभिगम्य यथाश्रुतं तमेव पक्ष

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वीकुरुते। प्रतियोगिताधर्मिकोभयाभावघटितलक्षणस्य वक्ष्यमाण प्रतिपादनत्वेनैव तत्समाधानस्यौचित्यसर्वथोययुक्तमिति ज्यायान् पक्षः प्रतिभाति।

अतः वृद्धगुरुणां विचार पक्ष सौष्ठवं सुविचिन्त्य जगदीश सम्मत विचारस्याऽऽर्थ समाजग्रहग्रस्ततया विचारलाघव संकोचमञ्चति। तन्निषेध मुखेनैव चिन्तामणेः सर्वथौचित्यं प्रतिपाद्यतयाऽनावश्यकत्वं युक्त मुत्यश्यामः। सुष्पष्टतत्वालोके परम गुरुवः लाधवमुखेन न्यभान्त्सुः।

अथैवमपि-

इदं द्रव्यं गुणकर्मान्यत्वेसति सत्त्वादित्यादौविशिष्टः शुद्धान्नातिरिच्यत इत्यादि प्रतीतिवलादेव सत्ताधिकरणे गुणे तन्निष्ठात्यन्ताभावस्य प्रतियोगित्वेऽपि द्रव्यत्वस्य नाव्याप्तिः। कथंतुविशिष्टसत्व शुद्धसत्त्व-योरैक्येनापि गुणकर्मान्यत्व विशिष्टसत्तात्वावच्छिन्नाधिकरणतायेक्षया। शुद्धसत्तात्वावच्छिन्नाधेयता निरुपिताधिकरणतागुणादिनिष्ठाविद्यते। गुणकर्मभेदविशिष्टसत्त्वात्वावच्छिन्नाऽद्येयता निरूपिताधिकरणता केवलं द्रव्यनिष्ठैवास्ते अतः शुद्धसत्त्व विशिष्ट सत्त्वयोरैक्येनापि विशिष्टाधिकरणता विलक्षणैवाऽऽस्ते तेनोभयोः वैषम्येन नाऽव्याप्तिशंका जागर्ति।

नन्वेवमपि द्रव्यं विशिष्टसत्त्वादित्यत्र हेतुतावच्छेदकीभूत केवल सत्तात्वावच्छिन्नाधेयतानिरूपिताधिकरणतायाः गुणे विद्यमानतया किन्तुतत्रैव साध्यभावस्य वर्तमानतयाऽव्याप्तिः भवेदेवेति निश्चयं प्रतीमः। अतएव तन्निरासाय न्यूनवारक पर्याप्ति निवेशस्यावश्यकत्वं नितरां सुस्थिरमेवेति।

वह्निज्ञानत्वसाध्यकस्थले विषयितासम्बन्धेन वह्नि हेतौमहान-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सीयवह्नित्वावच्छिन्नत्वावच्छिन्नत्वस्याधिकरणात्वस्यापि हेतुतावच्छेद-कावच्छिन्न हेत्वधिकरणत्वापातात् तस्य महानसीय वह्निविषयकज्ञाने विद्यमानत्वेन तत्र साध्याभावमादायाव्याप्ति दोषस्योद्धारः कथमपि स्वप्नवदिवाऽऽभति।

इत्थं द्रव्यं सत्त्वादित्यादौ विशिष्टसत्तात्वावच्छिन्नाधिकरणतायाः केवलं द्रव्ये सन्तिष्ठते नान्यत्रस्थातुं शक्नोति। तत्रैव विध्यमानतया कथं तत्र साध्याभाव सन्तिष्ठेत् । एतावतैवातिव्याप्तिः संघटिता जायते। सुर्वमभिप्रेत्येतरवारक पार्यप्तिनिवेशस्यौ चित्यंसर्वथा समुययुज्यते । इतर वारक पर्याप्ति निवेश प्रकारस्त्वित्थ व्यचक्षते यत् हेतुतावच्छेदकेतर-धर्मान वच्छिन्नत्वेसति हेतुतावच्छेदकावच्छिन्नाधेयता निरूपिता धिकरणत्वं विवक्षणीय मिति विदुषा विचारसरणिः। तन्निवेश प्रकारस्तु चत्त्थंवरीवर्ति यत्-

हेतुतावच्छेदकतात्वावच्छिन्न प्रतियोगिता यर्यप्त्यनुयोगितावच्छेदकरुपा-वच्छिन्नानुयोगिताक पर्याप्ति सम्बन्धावच्छिन्नावच्छेदकताकनिरूप्यता निरूपित निरूपकताकाधिकरणत्वमिति तात्पर्यं वेदितव्यम् । अन्यथा तन्निराकरणोपायस्तु गगन कुमुमायमानमिवाभाति सम्यक्-

विविच्य स्व विचार चातुरीमुद घोषयन्ति धीधनेशाः प्राज्ञवर्याः।

अयमेव तन्निरास पन्थाः गुरुचरणैः प्रत्यपादि ।

इत्तर वारक न्यूनवरक पर्याप्ति निवेश वैलेक्षण्य भिन्नमपि निवेश संश्लेषं स्वकीयोदार प्रतिभा विमाविलास वैचित्र्येण स्व विचार मार्गनुसन्धानेन प्रत्यपीयदत् विचारगुण गौरवेण विचार वैभव वचन भिदम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अयं वृक्षः कपि संयोगी एतद् वृक्षत्वादित्यादौहेत्वधिकरणे वर्तमानस्य कपि संयोगाभावस्य प्रतियोगितावच्छेदकं साध्यतावच्छेदकमेवास्तोत्यतो सुतरामव्याप्तिः: स्वाभाविकीति सत्यमिदंवचः प्रतिभाति । किञ्च-

धूमत्वव्यतिरिक्त धर्मावच्छिन्न धूमत्वावच्छिन्नाऽऽधेयतानिरूपिताधिकरणत्वाप्रसिद्धया पर्वतोवह्निमान् धूमादित्त्यादा वव्याप्त्यापत्तिः सुस्थिराजायत एवेतिसत्यमेवास्ते ।

तत्राधिकरणत्वावगाहित्वस्यैव विरहेण स्वाभाविक गत्याऽव्याप्ति शंका वतारस्य वैशिष्टस्यं पतत्येवेति समालोचकानां विमर्शः। गुणो गुण कर्मान्यत्वविशिष्ट सत्तावानिति प्रतीतेरप्रामाण्यस्य मतुप् प्रत्ययार्थाधिकरणत्वनिरूपित सम्बन्धमर्यादया प्रकृतयर्थभाने तत्पारतन्त्र्येण प्रकृत्यर्थतावच्छेदकस्य निरूपकता संसर्गेणतस्य मानं स्वाभाविक गत्था तत्रैव विज्ञेयमिति विदुषां विचारः।

पर्वतत्व चत्वरत्वादि तत्तद्धर्म विशिष्ट तत्तद्धूमत्वाद्यवच्छिन्नाधिकरणता व्यक्तिभिरेव धूमवानिति प्रतीति प्रत्ययसमुपपतौ धूमत्वावच्छिन्नाधिकरणातायां प्रमाणाभावत्वेनैव समुचितस्थले तावदव्याप्तिशंका जागरिता भवेदेवेति निश्चयं वेवेद्वि। धूमत्वावच्छिन्नाधिकरणत्वाप्रसिद्धेः धूमवान् वह्नोरित्यादि प्रतीतेः प्रमाण प्रत्ययाभ्यां संवलितत्वेऽपि प्रमात्वोपपत्तौ नकोपि दोषः समम्युपैति । धूमत्वनिष्ठ प्रकारता निरूपित विशेष्यतानिरूपित धूमत्व निष्ठावच्छेदकताकप्रकारताकत्वरूपम् तथा सति अधिकरणतायाः विरहे प्रमात्वापत्तिः कथं सुस्थिरा भवेदिति निर्णयमनुधावन्ति वृद्धाः। अतएवाधिकरणत्वमावश्यकमितिमत्वा तन्निषेःध मुखेन किमपि तदपेक्षया वैशिष्यं निर्दिशति। तथाच धूमवानितिप्रीतीतिः तत्तद् धूमत्वा-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वच्छिन्नधिकरणाता कूटावशिष्टाधिकरणता विषयकत्वाभाववती सम्यक प्रयोजनवतीति तद् वचनं संगतं भवतीति सर्वं सुस्थिरमेवेति ज्यायान् पक्षः विलसति विदुषां समाजे ।

तथापि अत्रेदं विचिन्त्यं विद्वद्भिः यत् कि-ल- पर्वतोवह्निमान् धूमादित्यादावपि धूमत्वातिरिक्तधर्मानवच्छिन्न धूमत्वावच्छिन्ना धेयतानिरुपिताधिकरणत्वाऽप्रसिद्धेः। तथाच पर्वतो धूमवानिति प्रतीतेरधिकरणत्वावगाहनेपि न तादृशाधिकरणत्वाप्रसिद्ध्या तद्विषयकत्वेन प्रतीयमानतायाः सन्दिग्धत्वेनः पर्यवसानात् ।

तेन पर्वतीय धूम चत्वरीय धूमवत्त्वविशिष्टेत्यादि प्रतीत्योः पर्वतीयत्व महानसीयत्वविशिष्ट धूमत्वोभय धर्मावच्छिन्नाऽऽधेयता निरूपिताधिकरण-त्वावगाहित्वस्यावश्यकतया तादृशाधिकरणताकूटा—वगाहितया धूमवानिति प्रत्ययोयपत्तौ तादृशाधिकरणताघटितिरिक्ता सामान्य धर्मावच्छिन्नाधिकरणता नकदाचिदपि सिद्धयेत् । अमुना कारण प्रत्ययवलेन पर्वतीय धूम प्रतीतेरन्यथा समुपपत्त्या विशिष्ट धर्मावच्छिन्नाधिकरणता तु सुतरामवश्यमे वाङ्गीकार्येति-प्रवदन्ति तार्किक+चणाः।

हेतुतावच्छेदकी भूत धूमत्वावच्छिन्नाधिक रणत्वाऽप्रसिद्धया वह्निमान् धूमादित्यादौ तथा व्याप्तिदोषस्योद्धारः नितरांदुर्ज्ञेयः।

अतएव तर्कालंकारः इत्थं निदिष्टवान् यत् हेतुतावच्छेदकीभूतधर्मे-स्वाश्रयाधिकरणीभूतं यन्निष्ठाधिकरणतानवच्छेदकत्वस्य एवं सामान्य-तोऽधिकरणतावच्छेदकत्वस्य च र्व्यतिरेकस्तथाविध हेतुतावच्छेद-काश्रयाधिकरणमेव हेतुतावच्छेदकावच्छिन्नाधिकरणेत्यनेन विवक्षणीयमिति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अतएव वह्निमान् धूमादित्यत्र तादृशाधिकरण त्वस्य प्रसिद्धयाभावात्काशः-नाव दोषस्येति । द्रव्यं विशिष्टसत्त्वादित्यत्र तादृश हेत्वधिकरणं द्रव्यमेवनतुगुणः, अतएव तन्निष्ठाधिकरणताऽनवच्छेदकत्वस्य, एवं सामान्यतोधिकरणता- वच्छेदकत्वस्य च द्वयोः विद्यमानत्वेन नाव्याप्ति-शंकावतारो विज्ञेयः।

अत्र केचिदित्त्थं व्याचक्षते यत् तादृशोभयत्वस्य स्वरूप सम्बन्धेन पर्याप्त्योमयत्रेव प्रत्यकमपि विद्यमानत्वेन तादृशोभयत्वाश्रयवद्धेतुतावच्छेदक गत रूपे तादृश हेत्वधिकरण विवक्षयैव सामाञ्जस्ये तथोभयाभाव निवेशस्य वैशिष्टयं स्यादिति विचिन्त्य ताथाविध परिष्कारस्यावश्यकत्वं व्याख्यातं प्रयतते । अन्यथा तादृश परिष्कारस्य तथा विधौचित्यं दरीदृश्य विदुषां वरिष्टः परिष्कारपरिपार्टीं परित्यज्य पर्याप्ति घटितत्वेन परिष्कारान्तरं व्यद्यात् वृद्धगुरुः।

येन प्रक्रान्तविषयस्यापि निर्देशं व्यजीज्ञपदिति तत्त्वमपि गूदाशयं अचीकथत् ।

हेतुतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेद-कत्वेसति स्वाश्रयावच्छिन्नानुयोगिताक पर्याप्तावच्छेदकताक निरूपकता-धिकरणतया तन्निष्ठाधिकरणतानिरूपकतावच्छेदकतात्वावच्छिन्न प्रतियोगिताक पर्याप्त्यनुयोगिताकयोगितावच्छेदकरुपावृत्तित्वोभ-यत्वाश्रयत्वस्यैव विवक्षणेनैव नावसरः समुयगच्छति। उभयत्र वृत्रित्त्वं स्वरूप सम्बन्धेन।

एवं च तादृश रूपवृत्तित्वस्य हेतुतावच्छेदक वह्नित्वगतैकत्व

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निष्ठावच्छेदकताया:विद्यमानतया तदभावस्य घटादावपि संसिद्धतया प्रमेयवद् विषयक ज्ञानस्य साध्यतायां विषयितया प्रमेयविशिष्टस्य हेतुस्थले तादृशावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकत्वस्य प्रमेयत्वरूपतया सर्वत्र वृत्तित्वेन यत्यदेन धर्तुमशक्मतया अव्यांप्तिदोषस्य प्रसारः नोय युक्त इति निश्चयं मन्ये ।

स्वाश्रयाधिकरणीभूतेति पदानुपादेन वह्निनमान् धूमादित्यत्राव्याप्तिः नैसर्गिकी भवेदेवेति सत्यं प्रतिभाति । यत्पदेन ह्रदादेरपि प्रतिपादयितुं शक्यत्वेन ह्रदस्यापि पारिभाषिक हेत्वधिकरणत्वात् । स्वाश्रयत्वं चात्र हेतुतावच्छेदकताघटक सम्बन्धेन । तद्नुपादाने कालिकादिना तद्धर्मत्वाश्रयाधिकरणे घटे भूतलादवपि। हत्वेधिकरणतापत्त्या तद्दोष तादवस्थ्यमेवेति विज्ञानव्यमेव ।

स्वाश्रयाधिकरणत्वं हेतुतावच्छेदक सम्बन्धेनवोध्यम् । अतएव वह्निमान् धूममादित्यत्र कालिक सम्बन्धेन धूमत्वाश्रय धूमाधिकरण हदादि निष्ठाधिकरणतानवच्छेदकत्व विशिष्ट सामन्यतोधिकरणतावच्छेदकत्वाभाव एव प्रवेश्यतां किमुभयाभाव निवेशस्यौचित्यं नास्तीति वदन्ति तार्किकाः । तथापि तद्धूम प्रतियोगिक संयोगेनधूमस्य हेतुत्वे वह्नेः साध्यायां तद्धूम प्रतियोगितकसंयोगसम्बन्धावच्छिन्ननिरूपकतोवच्छेदकत्वविशिष्ट निरूपकतावच्छेदकत्वस्याऽप्रसिद्धया सुतरामव्याप्तिः स्यादेवेति सत्यम् । किन्तु मयामा तन्निवेशे-

तद्धूम प्रतियोगिक संयोगसम्बन्धावच्छिन्न निरूपकतोनवच्छेदकत्व-स्याऽपर धूमत्वे प्रसिद्धयातद्धूम प्रतियोगिक संयोगसम्बन्धावच्छिन्न निरूपक-तानवच्छेदकत्वस्य तद्धूमत्वेऽप्रसिद्धया तदुभयोभयावस्यापि हेतुतावच्छेदकत्वे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वर्तमानत्वाल्लक्षण स मन्वयोपि भवत्येवेति निश्चयं प्रतीयः।

वास्तविकं च-

गुण कर्मात्यत्वविशिष्ट सत्तात्वावच्छिन्नाधिकरणतया घटे गुणकर्माभ्यत्व विशिष्ट सतावानिति प्रतीति सिद्धावपि गुणो कर्मान्यत्व विशिष्ट सत्ताकनिति भ्रमात्मक प्रतीति सत्त्वदशयामपि गुणवृत्तित्व विशिष्ट सत्तात्वावच्छिन्नाधिकरण तावगाहित्वे प्रमात्वापत्तिः स्यादिति केचिद् विद्धांसः समुयपादयन्ति । परन्तु- गुण कर्मान्यत्वविशिष्टसत्तात्वावच्छि-न्नाधिकरणतैव तद्विषयत्वेनैवेति नितरामवगाहमानतयैव तद्विषयत्वेनैव प्रतीतिः सम्पन्नाभवेदेवेति निश्चप्रचम्। तादृशाधिकरणतापा अवश्यमेव स्वीकार्यतया सुतरामेव यथाश्रुत-स्यैवैचित्यादिति निश्चिनोमि।

नच तथापि वैशिष्य्यावच्छिन्नाधिकरणत्वं स्वीकृत्य विशिष्ट सत्तावानिति प्रतीति दशायां वैशिष्य्यस्य वृत्तित्वोभय धर्मावच्छिन्नाधिकरणतायां प्रमाणा भावतया पूर्वोक्तस्थले सुतरामव्याप्तितादर्वस्थ्यमितिवाच्यम् ।

हेतुतावच्छेदकतात्वव्यापकत्वस्योभयाभावस्य विनक्षणात् । हेतुघटकीभूतवैशिष्टस्यस्योभयाभावविद्यमानदसायां तादृशोभयाभावस्य व्यायकत्वाभावसत्त्वात् ।

तदपरेऽऽचार्यास्तु इत्त्थं प्रतिपादयन्तियत्- हेतुवावच्छेदकतात्वावच्छिन्न प्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदक रूपे स्वावच्छिन्नानुयोगि-ताकपयीप्तिकावच्छेदकताक हेतुतावच्छेदकसम्बन्धावच्छिन्न निरूपकताधिकरणतावन्निष्ठ निरूपित निरुपकता वच्छेदकतात्वावच्छिन्न प्रतियोगिताक पर्याप्त्यनुयोगितावच्छेदकत्वं नास्तीति प्रतीति सिद्धाभावस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सा मान्यतोऽधिकरणतानिरूपित निरुपकतावच्छेदकता, स्वावच्छिन्न प्रतियोगिताक पर्याप्त्यनुयोगितावच्छेदकत्वं नास्तीति प्रसिद्धाभावस्य निवेश प्रवाहेनैव निर्वाहः स्यादेवेति काऽऽवश्यकता तदुभयाभावनिवेशस्ये ति हृदयंगमप्य तन्निवेशो व्यर्थ इति स्वीकुर्वते तर्क ताण्डव निष्णाताः।

परन्तु स्वरुपतो तदव्यक्तेः भानाङ्गीकारे विषयिता सम्बन्धेन वह्नित्व ज्ञान साध्यकेवह्नि हेतुके महानसीयवह्नि विषयक ज्ञान स्यापि तत् यदेनोपपादयितुं शक्यतयाऽत्याप्तिः सुतरां समापतेत् । अतएव साम्यन्यतोधिकरणता निरूपित निरुपकगवच्छेदकतात्वावच्छिन्न प्रतियोगिताक पर्याप्त्यनुयोगितावच्छेदकत्वं नास्तीत्यभावस्य विद्यमानत्वादित्यतो तदुमयाभावनिवेशस्यावश्यकतयाऽव्याप्तिवारणं कर्तुं शक्नोतीति तस्यावश्यकत्वं मन्ये।

सामान्यस्याऽप्रत्यासत्तित्वे महानसीय वह्नि सामानाधिकरण्य ग्रहवेलायां लौकिकसन्निकर्षाणां विरहेण प्रत्यक्षाऽसम्भवतयोपनायकज्ञानाभावात् देशान्तरीय धूमे उपनयासंभवेन सामानाधिकरण्यस्य प्रागनुभवात् कुतः संमवति परामर्श इत्यादि शङ्काव्याजेन कथमेका व्याप्तिरिति परामर्शीयसिद्धान्त ग्रन्थः कथं संगच्छेत। अतएव शिरोमणिः वस्तुतस्तु ग्रन्थं नैसर्गि करीत्या समुत्त्थापयति । धूम व्यापक वह्निसामानाधिकरण्यस्य समान्तरादिरासमादि साधारण्येन धूमाधिकरणे धूमत्वस्यैव वा व्याप्तित्वं किंवा तदपरैवेतिविचारणीयमेव ।

सामान्यलक्षणायाः प्रत्यासत्तित्वानम्युपगमे तथाचैकाव्याप्तिरिति ग्रन्थस्य तात्पर्यंविज्ञाय रासभादिसाधारण्येन तथाविधवोधानुदयात् - धूम व्यापतकवह्निसमानाधिकरण रासभवान् पर्वत इति प्रज्ञान वैशिष्ट्येनानुमितिः सम्पद्यते ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नच तथापि महानसीयधूमनिष्ठवह्निसामानाधिकरण्यस्य स्वसमानाधिकरणधूमत्ववत्ता सम्बन्धेन पर्वतीय धूमे मानं भवेदेवेति निश्चप्रचम्। तेन एकैवेत्यादिग्रन्थस्य धूमत्वघटित सम्बन्धमर्यादया दृष्टान्तीय हेतु निष्ठ साध्यसामानाधिकरण्यस्य पक्षवृत्तित्वं प्रतिपादनेन तत्रस्थ हेतौ व्याप्तिज्ञानोपपादकत्वान्नासंगतिरितिवाच्यम् । साक्षात् सम्बन्धेन व्याप्तिप्रकारक ज्ञानस्यानुमितिकारणत्वादन्यथातिप्रसंगदोषस्य सुस्थिरत्त्वमेव समापतेत्। अतएव शिरोमणिः प्रस्तुतसन्दर्भसमाहित विषयं प्रतिपादयन् कथयतिधूमलिंगकानुमितिजनकव्याप्तिर्यदि धूम व्यापक वह्निसामानाधिकरण्य रूपाभवति चेत् रासभादिसाधारण्यतया सुतरां तथा त्वा पत्तिः सुस्थिरैर्वोत निश्चयं मन्ये ।

अतएव तथोक्त सामानाधिकरण्यावच्छिन्नप्रकारकज्ञानत्वरूप कारणतावच्छेदकावच्छिन्नस्यरासभविषयकपरामर्शस्थले तस्य विद्यमानतया तत्रानुभित्यनुपपत्त्याऽम्वयव्यभिचारःस्यादेवेति निश्चयः ।

नच धूमादिलिंगकानुमितौ धूमव्यापक वह्निसमानाधिकरण धूमादिभत्ता निश्चयत्वेनैव परामर्शस्य हेतुत्वेन प्रतिपादिततया रसभादिसाधारण्येनापि न क्षतिरितिवाच्यम् । अनुमितिजनकतावच्छेदकस्याव्याप्तिपदार्थत्वेन धूमत्वस्य तत्रनिवेशेतद्घटित स्यैव व्याप्तित्वेन सर्वथा सामञ्जस्यं प्रतिभाति। अनेनेत्त्थं सिद्धयति यत् धूमनिष्ठधूमव्यापकवह्निसामानाधिकरण्यं स्वेतेरभिन्नं धूमनिष्ठ धूम व्यापक वह्निसामानाधिकरण्यात्। अत्र धूम निष्ठत्वानुपादाने रासभ निष्ठ धूमे व्यापकवह्निसामानाधिकरण्य- स्यापि पक्षान्तर्गततया तत्र हेतोरभावेन भागासिद्धिः समापतति। पक्षतावच्छेदकावच्छेदेन हेतोरभावः भागासिद्धिः। एवं च साधनांशे तदनुपादानेरासमन्निष्ठ धूम व्यापक वह्नि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सामानाधिकरण्येऽपि तादात्म्येन हेतोः विद्यमानत्वेनपि हेतोःविद्यमानत्वात् तत्र साध्याऽसत्त्वेन व्यभिचारः समापतेत्।

विशिष्टसत्तानिष्ठविशिष्टसत्ताव्यापकद्रव्यत्वसमानाधिकरण सतावान् गुण इति परामर्शात् गुण्डेऽपि द्रव्यत्वानुमितिः स्यादेवेति निश्चयं प्रत्येर्मि।

मद्यप्यत्र प्रभाविषयकलेन परामर्शजन्यत्वं वरीवृत्तीति तत्र प्रभात्वभित्यापादकत्वेन व्याप्तिलभ्यते, तेन तत्र व्यभिचारः प्रतीयेत, वह्निव्याप्य धूमवान् पर्वत इत्याकारक प्रभाविषयकत्वेन प्रमापरामर्शादपि वह्नित्वेन घट विषयकानुमितेरपि प्रभात्वं भवेदपि तस्य साधुत्वमिति नैव व्याख्यातुं शक्नोति ।

प्रमासजातीयत्वं च- तादृशप्रमीयविद्येयता विशिष्ट विधेयताकत्वमिति लभ्यते । तद् घटक वैशिष्यस्यञ्च- खावच्छेदक धर्मावच्छिन्नत्व-स्वनिरूपितोद्देश्यतावच्छेदकधर्मावच्छिन्नद्देश्यतानिरुपितत्त्वस्वावच्छेदक-सम्बन्धावच्छिन्नत्वैतत्रितय सम्बन्धेन। तथा च वह्नित्वेनघटानुमितावपि तस्य विद्यमानत्वेन नास्ति व्यभिचारावकाशः प्रतिभाति। एवं च प्रभासजातीयत्वविरह वैशिष्टस्य मर्यादायां द्रव्यत्व विषयिणी नानुमितिः कदा चिदपि प्रामाण्य पदवीं प्राप्नुपादिति ममेयं मतिः।

अन्येतु वह्निव्याप्य धूमवान् पर्वत इतिज्ञाने वह्निनत्वेन घटाव गाहनं कुर्यादितिव्याचक्षते । तथा च तादृशपरामर्शस्याप्य प्रभात्वेन व्यभिचार इति प्रतिपादयन्ति ।

सामानाधिकरण्य विशिष्टं धूमत्वं व्याप्तिरित्यत्र वैशिष्स्यं च सामानाधिकरण्य सम्बन्धेन । अनयापद्धत्या सामानाधिकरण्य विशिष्ट

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धूमत्वस्य व्याप्तित्वं चाङ्गीकुर्वते चेत् प्रकारतावच्छेदक प्रकारक ज्ञानमर्यादया धूमत्वविशेष्यक साध्यसामानाधिकरण्यप्रकारकज्ञानस्यहेतुत्वं भवेदिति तात्पर्यमधिकृत्यतत्प्रकारक पक्षधर्मताविषयकज्ञानत्वेनानुमिति-कारणत्वमस्तीति विदुषां विचार पन्था:।

केचन विद्वांसस्तु व्याचक्षते तदित्थं यत् -व्यक्तिज्ञानमन्तरा जातिभानस्याऽसम्भवत्वेन धूमत्वविशेष्यक सामानाधिकरण्यप्रकारता निरूपित विशेष्यताशालिसम्पन्नस्यापि धूमे वह्निसामानाधिकरण्यस्य प्रकारमर्यादा-वैशिष्टतया मानस्य प्रतीयमानतयापि धूमत्वावच्छिन्ने तां रीतिमाकलय्य तादृश सामानाधिकरण्यनिष्ट प्रकारकत्वस्य कथं व्यवच्छेद: भवितेति नितरामार्थसमाज संव्याप्ततत्वेन तथाताहश सामानाधिकरण्य विशिष्ट-धूमत्वाश्रयधूमवान् पर्वत इत्याकारक ज्ञानस्य कारणत्वेन प्रतिपाद्यमान-तथापि तादृशपक्षवैविध्यसम्पन्नतयापि गुरुत्व दोषसमाक्रान्तत्वेन तां रीतिं लघुत्वमूलकत्वेन युक्तिसमाकलितत्वेनच तादृश सामानाधिकरण्य विशिष्टवद् धूमवान् इत्याकाकारक ज्ञानस्यैव कारणत्व प्रावल्यतया तन्मार्गसञ्चरणशीलानां तादृशज्ञानस्यैवौचित्यं सर्वसम्मतत्त्वेन स एव पन्था: लघीयानिति विदुषां निर्विवाद सिद्धोऽयं पन्था: दृष्टि पथे पथिकायते। नात्रकेषांबुद्धिगन्वीत वतां वृद्धगुरुणमिपि वैमत्यंलोचन गोचरतां समभ्युपैति। एवमपि नीलोघट इत्याकारक ज्ञानस्य पारतन्त्र्येणाऽभेद संसर्गेण नीलविशिष्ट घटत्वस्य प्रकारत्वेनापिस्वरूपत: सतिसम्भवेऽपि भाने धूम व्यापक वह्नि समानाधिकरण विशिष्ट धूमत्वस्य भान स्वरूपतएव सम्भवतीति विदुषां विचार पक्षं हृदयंगमय्य तन्निषेध मुखेनैव ते विषया: यथा यथं सन्निरूपिता: वृद्ध गुरुवर्यै:।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अपरेतु तदित्त्थं लाघवंप्रतिसन्धानमुखेनैव न्यमान्त्सुः किल-धूमव्यायकवह्निसमानाधिकरण धूम वान् पर्वत इत्याकारज्ञानस्य लघुत्वेन सामानाधिकरण्यसम्बन्धावच्छिन्नतादृश सामानाधिकरण्य प्रकारता निरूपित धुमत्वनिष्ठनिखच्छिन्नविशेष्यत्वावच्छिन्नविशेष्यताशालिनिश्चयत्वेन कारणत्वम्। तथासति समुचितकार्यकारणभाव निर्वचनेन नास्तिदोषाव-काशलेशः। प्राक्तनीयवह्निसामानाधिकरण्यत्वेन सामान्य लक्षणया सकलवह्नि सामानाधिकरण्योपस्थितिसम्भवतया पर्वतीयवह्निसामानाधिकरण्यस्यापि ज्ञानेनैव तस्यापि पर्वतीय धूम नितरामन्वयेन नकापिवाधा दृष्टिगोचरा भवति । कथं तत्र वाधकविरहात्।

न च महानसीय वह्नि सामानाधिकरण्यस्यापि तादृश स्मरण विषयीभूतस्य ग्रन्थस्याऽसंगति रिति वाच्यम् । तथा सामान्य लक्षणास्वीकारस्यगिमुपमत्वेन तत्प्रतिपादन स्यौचित्याऽसम्भूत्रात् ।

एवं च तादृश सामानाधिकरण्य विशिष्टधूमत्वस्य व्याप्तित्वाभ्युपगतो निरर्थक इतिवाच्यम्। पक्षधर्मांशे विषयतयानुमितिजनकतावच्छेदकस्यैव व्याप्तिपदार्थतया तादृशविशिष्टधूमत्वस्यैव व्याप्तिपदार्थत्वादिति न्यगादिपुः।

अयंवृक्षः कपि संयोगी एतदवृक्षत्वादित्यत्रा व्याप्ति निरासाया-समानाधिकरणान्तम् । तथा निवेशेसति हेत्वधिकरणे एतदवृक्षे कपिसंयोगाभाववृक्ष प्रतियोगिसामानाधिकरणतया नाव्याप्तिशंकावतारः। एवं च केषां विचारे इदं संयोगि द्रव्यत्वादित्यत्राव्याप्तिशंकां निराकर्तुं तथोयादानभावश्यकमिति । तादृशसंयोगस्य शाखाद्यवच्छेदनवृत्तित्वदर्शनात् । वृक्षत्वावच्छेदेन तत्सामान्याभावस्य विद्यमानत्वेनकापिशंका जागरिता भवति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अपि हेत्वधिकरणे निरवच्छिन्नत्व प्रवेशादेवाव्याप्तिवारणं स्यादेवेति किमर्थं प्रतियोगितव्यधिकरणप्रवेश इति कथनं नोययुक्तमिति संत्यं प्रतिभाति।

हेत्वधिकरण निरूपित कालिकसम्बन्धावच्छिन्नवृत्तितावच्छेदकी-भूतानुयोगितायाः वह्न्यभवस्य विद्यमानतया वह्निमान धूमादित्यादावव्याप्तिः। यदिनिर्खच्छिन्नवृत्तित्वंनाङ्गोकुरुते चेत्- कालिकसम्बन्धावच्छिन्न गोत्वाभावस्य स्वरुपसम्बन्धेन साध्यत्वे गोत्वादिहेतावव्याप्तिः स्यादिति निश्चयः गोत्वनिष्ठ समवाय सम्बन्धावच्छिन्ननिरवच्छिन्न वृत्तितावच्छेदकस्य तदभावे सत्त्वेन प्रतीयमानत्तात् । तेन साध्यतावच्छेदकसम्बन्धेन स्वप्रतियोगिभत्ता बुद्धे विरोधिताघटकसम्बन्धन हेत्वधिकरण निरुपित वृत्तिताया निवेशनायत्वादिति।

गुणवत् संयोगवद्वा द्रव्यत्वात्, वह्निमान् धूमात् संयोगवान् एतत्कालत्वात् कयालं घटवत् घध्वंसादित्यादौ सुतरामव्याप्ति-निरासायाऽसमानाधिकरणात्तनिवेशस्यावश्यकत्वमिति निश्चप्रचम् ।

अथैवमपि विशिष्टसताभाववान् गुणत्वादित्यादौ साध्याभावस्य सत्तारूपत्वेन गुणे निरवच्छिन्नवृत्तित्वेन लक्षणघटकत्वेन तमादायाऽव्याप्तिं निराकर्तुं प्रतियोगिवैयधिकरण्यप्रवेशस्यावश्यकत्वादिति निश्चयं मन्ये।

साध्याभावस्य द्रव्यत्वरूप कल्यनेन हेत्वधिकरणावृत्तित्वात् ।

अथ च कालिक सम्बन्धावच्छिन्नाभावत्वावच्छिन्नप्रतियोगिताकाभावस्य स्वरूपेण साध्यतायां गगनत्व हेतावव्याप्तिः, साध्यभावस्य हेत्वधिकरणे सत्त्वेन तादृशप्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके विद्यमानत्वात्। तन्निरासाय हेत्वधिकरणनिरूपित वृत्तितावच्छेदकी भूतानुयोगिता निरूपित प्रतियोगितानवच्छेदकतयासाध्यतावच्छेदके विवक्षणीयतयाऽव्याप्तिवारणं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भवेदेवेत्यतो साध्यभावस्य जन्ये विद्यमानतया साध्याभावात्मकानुयोगितायां तादृशरूपेणानुयोगितायां तन्निष्ठावच्छेदकत्वस्याऽसत्त्वेन लक्षणाघटत्वात्।

इच्यं च हेत्वधिकरणे वृत्तित्वं यूद्धर्मावच्छिन्नप्रतियोगिताका-भावत्वावच्छिन्नं भवतितादृशधर्म भिन्नत्वस्य साध्यातावच्छेदके विवक्षणीय-त्वेन नास्तिदोषावसरः समुपसर्पति । अतएव विशिष्टसत्ताभावत्वावच्छिन्न प्रतियोगिताकाभावत्वावच्छिन्नेनैव गुणनिरूपित वृत्तित्वमुपजायते । तथा च-

अतएवात्यन्ताभावप्रत्यक्षे प्रतियोगितावच्छेदकस्य तद्विशिष्टस्य योग्यत्वं कारणं भवेदेवेति निश्चयं मन्ये। हेतुनामुना गुरुत्ववान्नास्तीति प्रतीत्या शब्दवान्नास्तीति सर्वदाभावानां प्रत्यक्षत्वापत्तिः नैव दृष्टिगोचराभवति। अन्यथा योग्यतायाः प्रतियोगितामात्रे तन्त्रत्वादेव प्रयोजकत्वमिति भाषन्तेतरांवृद्धाः सिद्धान्ततत्त्वमर्मज्ञाः।

अतएव प्रतियोगितावच्छेदकविशिष्टस्ययत् किञ्चिद् प्रतियोगिनोऽ-अत्यन्ताभाव प्रत्यक्षे तस्यैव तन्त्रत्वेन कारणत्वं समुपजायते । अन्यथा गुणादावपि संयोगसामान्यभावस्यतादृशप्रत्यक्षं न कदाचिदपि सम्भवति। अतः शिरोमणिरपि तमेव पक्षं दृढी कुरुते।

इत्थं प्रकारेण द्रव्ये संयोग सामान्याभावे प्रमाणाभावतया तादृश पक्षस्यैव प्रमाण्यवमगन्तव्यमिति विदुषां राद्धान्तः।

संयोगसामान्याभाव प्रत्यक्ष मात्रं प्रति वृक्षत्वावच्छेदेन शाखाद्यवच्छेदेन वा प्रतियोगिमत्त्वज्ञानस्य प्रतिबन्धकाभावतया वृक्षः संयोगसामान्याभाववान् इत्याकारकं प्रत्यक्षं नैवसम्पद्येत् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एवं च द्रव्यविशेष्यक संयोगाभाव प्रकारक लौकिक प्रत्यक्षस्य काऽऽपत्तिः सम्भवति च तदा वृक्षे कस्यापि संयोगस्य विद्यमानत्वेन कुतोन प्रत्यक्षं जायेत । यदिनाम प्रत्यक्षविषयत्वेसति द्रव्यं संयोगाभाववत् स्यात् तेन संयोगाभावप्रकारक लौकिक प्रत्यक्षात्मक विशेष्यतावत्त्वमपि तत्र भवेदेवेति सत्यमेव । लौकिक प्रत्यक्ष विषयत्वं गुणादौ प्रसिद्धतयापिसाऽऽपतिः सुस्थिराभवेवेति निश्चिनोमि ।

अतःतत्र कीदृशः प्रतिबध्यप्रतिबन्धकभावः स्वीकार्यः विद्वद्भिः।

संयोगाभाव प्रत्यक्षंप्रति संयोगज्ञानत्वे कारणत्वं विद्यते तेन वृक्षे संयोग प्रत्यक्षदर्शायां गुणादावपि संयोगसामान्यास्य प्रत्यक्षं नैव जायेत । किं वा द्रव्य विशेष्यक संयोग सामान्याभावप्रकारक प्रत्यक्षस्यदुर्ज्ञेयतया कथमापत्तिः संगता भवेदिति। परन्तु - लौकिक सन्निकर्षजन्य विशेष्यता-सम्बन्धेन संयोगसामान्याभावप्रकारकप्रत्यक्षंप्रति लौकिकसन्निकर्षप्रयोज्य विशेष्यतासम्बन्धेन संयोगविषयकोपलब्धेः प्रतिबन्धकत्वेन चोक्ता पत्तिः सुस्थिराभवेदेवेति निश्चयः।

न च तथापि तदविषयकोयलब्धेः परमेश्वरप्रत्यक्षसाधारणत्वेन तस्य सर्वदा द्रव्ये वर्तमानतया कथं तस्यापत्तिरिति वाच्यम् । जन्य प्रत्यक्ष नित्यज्ञान साधारणानुगत विषयिता निरूपकत्वस्यभानाभावतया संसर्गसम्भवादिति निश्चयं मन्ये। लौकिकसनिनकर्षप्रयोज्यविशेष्यतायाः सर्वयापीश्वरज्ञान निरूपकत्वस्याऽसम्भवतया नहि परमेश्वरज्ञानस्यसंसर्गत्वं सम्भवतीत्यतो नोक्तापत्तिः सुस्थिरास्यादिति ।

अन्येषां विचारे तत्पुरुषीय संयोगाभावत्वावच्छिन्न लौकिकप्रकारताशालि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रत्यक्षंप्रति तत्पुरुषीय संयोगत्वावच्छिन्न लौकिक प्रकारता शालिज्ञानत्वेन प्रतिबन्धकत्वस्य सर्वथा सर्वदानुभव सिद्धतया तादृश प्रतिबन्धकतायाः विशेषष्यत्वं एवं प्रतिबध्यतायाः स्वविषयीभूत संयोगवत्त्वस्य तादृशसम्बन्ध्यतायाः स्वविषयीभूत संयोगवत्त्स्य तादृशसम्बन्धवत्वं निर्दिशति समालोचकः। किं चात्र प्रतियोगिग्रहोत्पत्तिदशायां तादृश प्रत्यक्षस्य पूर्वं प्रतियोग्युपलब्धिरूपप्रतिबन्धक विरहावस्थायां तादृश प्रत्यक्षस्य दुर्वारत्वमेव सम्पद्यते। अतएवोक्तं तर्कालंकारेण यत् प्रतियोग्यपलम्भ सामग्रया एव दोषत्वेनोयगभात्। प्रतियोगिन उपलब्धि यया इति व्युत्त्यत्या तस्यै वेति तात्पर्यम्। संयोग सामान्याभावस्य प्रत्यक्षे कार्याधिहेतुत्वोयगमतया पूर्वेक्त दोषाणाभवकाशो नास्तीति प्रत्येतव्यः।

कारणत्वं चात्र- खाधिकरणत्व-स्वपूर्वत्वाधिकरणक्षणद्वयावच्छिन्न स्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकधर्मवत्त्वम्। तेन नावकाशः पूर्वोक्तदोषाणाम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एभिर्प्रणामकदम्बैः द्रव्ये संयोग सामान्याभावं सम्पादयितुं प्रयतते। तत्र प्रमाणं तु -चेत्त्थं वरीवर्तियत् - यो यदीययावद् विशेषाभाववान् स तत्सामान्याभाववान्'' अनया व्याप्त्या द्रव्येयावद् विशेषाभावं साधयति। यो यज्जातिसमानाधिकरणोभयावृत्तिधर्माववच्छिन्नयत्सम्बन्धावच्छिन्न प्रतियोगिताकयावदभाववान् सतज्जात्यवच्छिन्नप्रतियोगिताकाभाववान्। अनेनानुमानेव द्रव्ये संयोगसामान्याभावं सम्पादयति। अतएवाऽनुमानेस्मिन् स्वरूपासिद्धिः नैव दृष्टिपथे पथिकायते। कथंतु हेत्वभाववान् पक्षः स्वरूपासिद्धिः तथाच यक्षेस्मिन् साधनस्य वर्तमानत्वेन नास्ति स्वरूपासिद्धिरम्युगन्तव्येति केनापि विदुषा। सिद्धिसाध्यनमपि दृष्टि पथे मसमागच्छति। जातिपदोपादानेन गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वा-नङ्गीकारातया व्यगिचारदोषस्यावकाशोयि नास्ति।

अतएव संयोगत्वसमानाधिकरण धर्मस्यसत्त्वगुणादेः समवाय सम्बन्धावच्छिन्नतद्धमावूच्छिन्नप्रतियोगिताकयावदाभावस्य सर्वदाऽविद्यमानत्वेन वृक्षे स्वरूपासिद्धिः नैव हेत्वामासः प्रतिभाति उभयावृत्तित्व विशेषणेन सत्तायाः गुणत्वस्य चोमयवृत्तित्वेन न कदाचिदपिदोषः सम्भवति।

एतावता व्याख्यानेन विज्ञायते यत् वृक्षे संयोग सामान्य भावे न काण्यिवाधा दृष्टिगोचरयते। तथाच- वृक्षः समवायसम्बन्धावच्छिन्न संयोगत्वावच्छिन्नप्रतियोगिताकाभाववान् संयोगत्वजाति समानाधिकरणो-भयावृत्ति धर्मावच्छिन्न समवाय सम्बन्धावच्छिन्न प्रतियोगिताकयावद-भाववत्वादित्यनुमानेन संयोगसामान्याभावस्य द्रव्ये सिद्धिर्भवति ।

संयोगत्वसमानाधिकरणोभयावृत्तिधर्मस्य तदीयसंयोगावच्छिन्न प्रतियोगिताकाभावस्यवृक्षेवर्तमानत्वेन संयोगसामान्याभावः सिद्धयति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अतएवोभयावृत्तित्वविशेषणस्य सार्थक्यं सञ्जातमेवेति निश्चयं प्रत्येमि।

नन्वत्र धर्मेकिमर्थंचोभयावृतित्त्वविशेषणम् ? तदनुपादानेकाक्षतिरितिचेन्न। स्वरूपसम्बन्धात्मिकायाः प्रतियोगितायाः तथानेनमेदेन भिन्नतया तादृशाभावीय प्रतियोगितायां चोमयावृत्तित्वस्य हेत्वधिकरणवृत्तित्वेन पक्षेऽविध्यमानतया पुनरयि स्वरूपासिद्धिदोषस्य तादवस्थ्यात्। अतएव पक्षे हेत्वभावतया स्वरूपासिद्धिदोषमयाकर्तुं तद् विशेषणस्य सार्थक्यं-सुष्यष्टमेवेतिनितरांसाधीयः।

एवंचोमयावृत्तित्वस्यस्वावच्छेदकवत्त्वसम्बन्धेन प्रतियोगितायां प्रवेशेन नावकाशः पूर्वोक्तदोषस्येतिसत्यभामाति, किन्तु तादृशनिवेशेन गुरुतर-प्रवेशजन्यदोषस्यध्रौव्यमेवेति। अतएव तदपेक्षया लघुत्वेन पूर्वोक्तनिवेश एव लघीयान् ।

परन्तु पूर्वक्षणवृत्तित्वविशिष्टतादृशसंयोगाभावेऽपि तादृशसंयोगभावस्य विद्यमानतया चोभयावृत्तित्वविरहात् तादृशाभावस्याऽप्रसिद्धतया नाव-काशः पूर्वोक्तदोषाणामिति तात्पर्यं नितरामिति।

न च स्वविशिष्ट प्रतियोगितावत्त्वसम्बन्धेन नितरामनुयोगितायां तन्निवेशेननहिपूर्वोक्तदोषः, वैशिष्टयञ्च स्वनिरूपितत्व स्वनिष्ठानुयोगि-त्वानिरूपितत्त्वोभय सम्बन्धेन। तथा च तत्संयोगाभावीय तत्संयोगनिष्ठ-प्रतियोगितातादृशीति, तथा च तादृशतया नाप्रसिद्धिरितिवाच्यम्। एतादृश गुरुतर प्रवेश जन्य निवेशस्य सुतरां गौरव ग्रस्ततया तादृशपरिष्कारस्य प्रवेशाऽनर्हत्वात्। लाघवाऽनवकाशादिति तादृशनिवेशस्याऽनौत्वत्यमेवेति।

तर्कालंकारोणाभिहितं यत् उभयावृत्तिनिवेशमन्तरा नहि ताहशस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निरकरणं भवेदिति विचिन्त्यतादृश निवेशः पारमावश्यकः प्रतिभाति। अत्रकिमुयावृत्तित्वमिति-

तथा च— पूर्वोक्ततर्कालङ्कारकृतोभयावृतित्त्वं च- यद्युमयत्वाश्रय निरूपित वृत्तित्वाभावस्तदा तादृश संयोगत्वे तु तत्संयोगघटोभयत्वाश्रय निरूपितवृत्तित्वस्यैव वर्तमानत्वेन तदभावस्यसत्त्वप्रसंगस्य दुर्धरत्वात् । एवमाधेयत्व सम्बन्धावच्छिन्न प्रतियोगिताकोभयत्वावच्छिन्नाभावस्य तदर्थत्वेनाऽऽधेयता सम्बन्धेनोभयवत्तायाः तादृश संयोगत्त्वेऽसत्त्वेनोभयत्वा-वच्छिन्नाभावस्य विद्यमानत्वेन न काप्यनुपपत्तिरितिसत्यंभाति । स्व वृत्तित्व स्वेतरवृत्तित्वोभय सम्बन्धेन तदन्यत्वमेव प्रतिपादयन्तिकेचित् । अन्येषां विचारेतु- भेदविशिष्टान्यत्वमेवतत् । वैशिष्टयंच- स्वप्रतियोगिवृत्तित्व, स्वानुयोगि-वृत्तित्वोभय सम्बन्येन । न च तथापि घटीयसंयोगोभयाभावस्य मेदस्यवा केवलान्वयित्नेन वा तद्विशिष्टस्यैव तादृशसंयोगत्वे विद्यमानत्वेन तदन्यत्वासम्भवेति न वक्तव्यम् । भदविशिष्टान्यत्वमित्यत्र भेदे तादृश प्रतियोगिताविशिष्टान्यत्वनिवेशस्यौचित्यदर्शनात् । तत्रवैशिष्टस्यच-स्वाश्रयवृत्तित्व एवं स्वानाश्रयवृत्तित्वोभयसम्बन्धेन, तथाचोभय तादृशत्वाभावतया गृहीतुमशक्यत्वादिति ।

सम्बन्धस्यैकत्व विवक्षायां तु संयोगसम्बन्धवच्छिन्न प्रतियोगिताक संयोग सामान्याभावस्य केवलान्यवयित्वेन सिद्धसाधन दोषस्यानसरः नैव समुपर्पति । अथ जातिपदानुपादाने कम्बुग्रीवादिमत्त्वात्मक रूप गुरुधर्मस्य तत् समानाधिकरणोभयावृत्तितादृशघटत्वावच्छिन्न प्रतियोगिताक यावद् विशेषाभावति घटे विशिष्टभूतलादावपि साध्स्यावर्तमानतया नास्ति व्यभिचारस्यवसरः समापतति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एवं च यद्धर्मसमानाधिकरणोभयावृत्तिधर्मावच्छिन्न यत्सम्बन्धावच्छिन्न प्रतियोगिताक यावदभाववान् सतद्धर्भावच्छिन्नस्यैव प्रतिपादनत्वेन तत्रतात्पर्यमिति नावसर:प्रतिभाति ।

तद्धर्मवत्ताच–

स्वावच्छिन्नप्रतियोगिताकाभाववत्त्वसम्बन्धेन । तादृशसम्बन्धेन कम्बुग्रीवादिमत्त्वरूपधर्मस्यकुत्रास्यविद्यमानतयातदभावस्य केवलान्वयित्वेन तदधिकरणेघटशून्यभूतले हेतोः विद्यमानतया व्यभिचार:। अपरे आचार्यास्तु प्रतिपादयन्ति तावदित्थंयत्- योयज्जाति समानाधिकरणोभयावृत्तिधर्मावच्छिन्न-प्रतियोगिताकाभवत्वानुयोगिताक पर्याप्तिकतयायावत्वावच्छिन्नाभाववान् स तद्धर्मावच्छिन्नाभाववान् इत्यर्थस्यैव प्रतिपादनेनैवाऽदोष:। कथं तु न्यूनवृत्तिधर्मस्य पर्यप्त्यनुयोगितावच्छेदक त्वानम्युणगमतयानकोर्पिदोष: समम्युपैति ।

आहोस्वित्- य: स्वनिष्ठाधिकरणतानिरूपित निरूपकतावदन्यावृत्ति यज्जातिसमानाधिक्रणोभयावृत्ति धर्मावच्छिन्न प्रोतियोगिताकाभावत्वेन स: तद्धर्भखच्छिन्नाभाववान् इत्यर्थाङ्गीकार तया नास्तिदोवावसर: संभवति ।

एवं च कम्बुग्रीवादिभत्त्वं कम्बुग्रीवादिव्यक्तिरेव सोपि तादृशावयव संयोगविशेष:कापाले विद्यतएवेति निश्चय: । तथा च कम्बुग्रीवादिभत्त्व सामानाधिकरण्यस्य तद्घटे नितरांविद्यमानत्वेन कथं व्यमिचार इति वाच्यम्। स्वसमवायिसमवेतत्त्व सम्बन्धेन कम्बुग्रीवादिभत्त्व सामानाधिकरणस्य तद् घटत्वे विद्यमानतया नस्तिदोभाषावसर: समम्युपैति ।

नचात्रोभयावृत्तित्वपदोपादानेऽपि तथोभयावृत्तिधर्मे जातिसामानाधिकरण्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

घटक जत्यधिकरणवृत्तित्वं स्वरूपेणैववक्तव्यम् परमावश्यकमेवेति सत्यमाभाति। तदभावे कालिकेन तद्रूपत्वादेरपि संयोगत्वादेरपि तदधिकरण-वृत्तित्व विरहादिति वाच्यम्। उभयावृत्तित्वपदंव्यर्थमेवेत्यतोतथाऽनवकाशात्। एवं सत्तागुणत्वादेः स्वरूपेण जात्याधिकरणवृत्तित्व- विरहेण तादृशदोषस्याऽनवकाशात्।

सत्त्वगुणत्वाद्यवच्छिन्नत्येत्रादिपदोपादानतया सत्त्वगुणत्वाद्य-वच्छिन्नाभावमादाय स्वरूपास्तिाद्धिवारकस्योभयावृत्तिपदस्य व्यभिचारावारकत्वेन वैयर्थ्यमितिवाच्यम्। असिद्धिवारकस्यापि विशेषणस्य सार्थकत्वमिति। अतएव शब्दमण्याऽऽलोके पक्षधरमिश्रादेरपि तत्र सम्मतत्वमेवास्तीति। तत्र वैयर्थ्यच स्व समानाधिकरणं यत् प्रकृत साध्य व्याप्यतावच्छेदकधर्मान्तरं तद्घटित्त्वमेव। हेतुनामुना नीलधूमत्वादेः वैयर्थ्याऽसम्भवः। नीलघूमत्वस्य धूमत्वानतिरिक्तया धूमत्वेतादृशधर्मान्तरा-भावात्। अतःस्वावच्छिन्नाविषयकप्रतीतिविषयतान्वच्छेदकत्व रूपं यद्युच्यते तर्हि स्वपदेन केवलं धूमत्वमादाय तादृशदोषस्यविद्यमानत्वात्। अतःतादृशं-परिष्कारं परित्यज्यस्वाव्चिछन्नुयोगिताकपर्याप्तिकावच्छेदकताकनिरूपकताक विषयिताशून्यं यत् किञ्चित्प्रतीतिविषयताव्चछेदकं साध्यव्याप्यातावच्छेदकं स्वाश्रयसमानाधिकरणं यत्तदवच्छिन्नविषयिताशून्यप्रतीतिविषयिता निरूपकतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगिता वच्छेदकत्वमेव। अतएवैतादृशपरिष्कारेण नावकाशतद्दोषस्य। अतएवनीलधूमेत्यत्र शुद्धधूमत्वपर्याप्तनिरूपकतावच्छेदकतायाः नीलादिसहित धूमत्वपर्याप्तनिरूपकतावच्छेदकताभिन्नत्वेन दोषामावेऽपि महानसीयवह्निसाध्यकधूमहेतावपि वैयर्थ्यापतिः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अतएव नित्यत्वसाध्यकामुनानेशब्दो नित्यः सामान्यवत्वेसति विशेषगुणान्तराऽसमानाधिकरणवहिरिन्द्रियग्राह्यत्वात् । अथ्र शब्देतरार्थकस्याऽन्तरपदस्य शब्दमण्याऽऽलोके सार्थकत्वं मिश्रैः न्याय शिरोमणिभिः समर्थितम् ।

एतेन विज्ञायते यत् - मीमांसकाः चेत्त्थं प्रतिपादयन्ति यत् - शब्दानां नित्यत्वमेव वर्तते । तैः वर्णत्मकशब्दस्यनित्यत्वस्वीकार्यतया शब्दत्वसामानाधिकरण्येननित्यत्वस्येष्टत्वेन ध्वन्यात्मक शब्दस्याऽनित्यत्वेनापि न कोपिदोषः समागच्छेत् । एवं तत्र ध्वनिभिन्नत्वमपि विशेषणमर्यादया प्रदानं परमावश्यकमेवेति तात्पर्यमिश्राणां सम्मतमिति विज्ञेयम्।

अन्यथा ध्वन्यात्मक शब्दे साधने विद्यमानत्वेन-मीमांसकानां विचारे नित्यत्वरूप साध्ये नितरामविद्यमानत्वेन व्यभिचारामत्तेः।

ध्वन्यात्मक शब्दे हेतोः विद्यमानत्वेन च तत्र ध्वंसे शब्दभिन्न विशेषगुणाऽसमानाधिकरण्यस्यच वहिरिन्द्रिय ग्राह्यत्वस्य च विद्यमानतया व्यभिचारनिरासाय सामान्यवत्त्वभित्युक्तम् । वहिरिन्द्रियग्राह्यत्वस्य च शब्दभिन्नविशेषगुणस्य च विद्यमानतयानित्यत्वाभावेनच व्यभिचार निराकरणाय विशेषगुणान्तराऽसमानाधिकरणगुणेत्युक्तम् । मनसा क्रियायां सामान्यवत्त्वस्य विशेषगुणान्तरासामानाधिकरण्यस्य विद्यमानत्वात् तत्र नित्यत्वाभावतया व्यभिचारापत्तिः । तेन वहिरिन्द्रियग्राह्यम् ।

अन्येषां विचारेतु सामान्यलक्षणाजन्य प्रत्यासत्तिंस्वीकृत्य चेतसः क्रियायां व्यभिचारंनिरसितुं वहिरिन्द्रियपदस्य लौकिकविषय त्वार्थकतयाऽऽत्मनः एव दृष्टान्तत्वेन प्रदर्शनमावश्यकमस्ति। अथच

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तादृश शब्दे भागासिद्धिवारणाय वहिरिन्द्रियजन्य प्रत्यक्ष विषयतावच्छेदकत्वमेवेति तस्यार्थोवाच्य:। तेन गुणद्रव्यत्वादिकमादाय नात्म मन: संयोगे भअ्यत्रापि च व्यचारापत्ति:। अत: सामान्यवत्त्वेसति विशेष गुणान्तरासमानाधिकरण वृत्ति वहिरिन्द्रियजन्य विषयतावच्छेदकधर्मवत्त्वस्यापि निवेश: परमावश्यक एवेति निश्चय:तेन गुणत्वद्रव्यत्वयो: वहिरिन्द्रियजन्यप्रत्यक्ष विषयतावच्छेदकत्वस्य विद्यमाननत्वेऽपि विशेषगुणमन्तरासमानाधिकरणवृत्तित्वाभावेऽपि विशेषगुणान्तरा समानाधिकरणवृत्तित्वाभावेऽनास्ति व्यभिचारावकाश: संभवतीति तर्कालंकाराणामाशय:।

केचन विंद्वासस्तु तदित्थं व्याचक्षते यत् - प्रतिपादित भागासिद्धिवारणाय सामान्यवत्त्वेसति वहिरिन्द्रियग्राह्यत्वादित्यादि पदस्य वहिरिन्द्रियग्राह्यतावच्छेदकजातिमत्त्वार्थकत्वेतात्पर्यतयाऽऽकाशादबपि द्रव्यत्व जातिंस्वीकृत्य तन्निरसितुं तदिन्द्रिय ग्राह्यतानवच्छेदकत्वं विशेषणं दातव्मेवेति विज्ञायते ।

विभिन्नदोषझंझावातोत्त्थानतयाऽसिद्धवारकविशेषणरहितंकल्यान्तरं प्रोवाच यद्वेति तर्कालंकार:। तथा सति-

यद्धर्मावच्छिन्नप्रतियोगित्वसमानाधिकरणोभयावृत्तिधर्मावच्छिन्ना पिछेदकताकप्रतियोगिताकाभाववान् स तद्धर्मावच्छिन्न प्रतियोगिताकामाववान् इत्यर्थस्वीकारेण संयोगत्वावच्छिन्नप्रतियोगित्वनिष्ठावच्छेदकताक प्रतियोगिताकामावस्यसंयोगत्वावच्छिन्नप्रतियोगितावान्नास्तीत्याकारकस्य तदन्तर्गतत्वेन वृक्षे अविद्यमानतया स्वरूपीसिद्धिरित्यतोभयावृत्तिपदमुपात्त-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मितिनावकाशः पूर्वोक्त दोषस्येति विज्ञायते । अतएव नासिद्धिः नवाव्यर्थविशेषणमिति ।

मान्यास्तु गुरवस्तदित्त्थं समाकलयन्ति यत् - यद्धर्मावच्छिन्न प्रतियोगितात्वावच्छिन्नत्वाभावत्वव्यापककूटत्वावच्छिन्नत्वस्यैव हेतुत्वेन व्यापकत्वनिवेशस्यनिष्प्रयोजनत्वेतादृशापेक्षयावैलक्षण्यपरकत्वादेव नावकाशः वैयर्थ्यस्येति प्राच्यविदुषांविचारसरणिः।

हेतुनामुनानास्ति स्वरूपासिद्धिः, नवाव्यर्थविशेषणमपि। अतएवासिद्धिवारकविशेषणस्याऽपिसार्थक्यमिति विज्ञायतेमान्येन गुरुचरणेनेति।

एवं च न्यूनवृत्तिधर्मवत्त्वमेव खीकुर्वतां विदुषां विचारस्त्वित्त्थं वरीवर्तियत् - विशेषपदस्येति ताद्दशत्वंचाङ्गीकृत्य न्यूनवृत्तित्वघटितमेवोत्त्थापनं कुरुते ग्रन्थकारः- तथा च-

यद्धर्मन्यूनवृत्तिधर्मावच्छिन्न यावदभाववान् स तद्धर्भावच्छिन्नाभाववान्'' अयमेवार्थः स्वीकर्तव्यः समैः। तथा च- संयोगत्वन्यूनवृत्तिधर्मावच्छिन्नस्य तदवृत्तिवृक्षान्यसमवेतत्वावच्छिन्नभावस्यतदन्तर्गततया वृक्षादावपि स्वरूपासिद्धिदोषाऽऽक्रान्ततया तादृशोपादानस्यानुपादेयत्वमिति ग्रन्थकाराणां तात्यर्यमिति नितरामवगच्छामि।

विशेषयदस्यन्यूनवृत्तित्वधर्ममेव स्वीकुर्वतां नितरामाचार्याणां विचार पक्षं समुद्मासयन् तं निराचिकीर्षया समुत्त्थापति यद्धर्मन्यूनवृत्तीति ।

न्यूनवृत्तित्वं च स्वसमानाधिकरणत्वेसतिस्वसमानाधिकरणभेद प्रतियोगितावच्छेदकत्वम् । सत्तात्वस्य न्यूनवृत्तित्वमपाकर्तुं स्व

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सामानाधिकरण्यमेवेति विशेषणम् । गुणत्वस्य न्यूनवृत्तित्वं निराकर्तुं स्वसमानाधिकरणेतिदल्लाभावश्यकमेव । घटावृत्ति संयोगस्य वृक्षभिन्न समवेतत्वस्यचाभावतया संयोगत्वन्यूनवृत्तित्वेन तादृशाभावस्य हेत्वन्तर्गतत्वेन वृक्षे तथा च- संयोगत्वन्यूनवृत्तिर्योधर्मः तदीय संयोगत्वम्, तदवच्छिन्नप्रतियोगिताकयावदभाववान्योस्ति सः संयोगत्वावच्छिन्न प्रतियोगिताकभाववान् इति संजाततया कल्यान्तरमुत्थापयितुं भूमिकां रचयति योयर्द्धेमेति ।

पक्षतावच्छेदकविशिष्टान्यत्वस्य न्यूनवृत्तिधर्मेप्रवेशतया घटावृत्तिसंयोगत्वस्यवारणतया वृक्षान्यसमवेत्त्वमित्युक्तं तर्कालंकारेणेति कथितम् ।

न च वृक्षान्यासमवेतत्वस्य वृक्षत्वस्य वृक्षवृत्तिरूपादावेव सत्त्वेन न कदाचिदपि संयोगत्त्व समानाधिकरण्यमिति वाच्यम् । वृक्षद्वयसंयो-गान्तर्भावितयैव तस्यविद्यमानतया तस्य वृक्षान्यासमवेतत्त्वेनतदभावात् । सामान्यव्याप्त्यसामान्यरूपेण तस्य सिद्धत्वेनापिसंयोगसामान्याभावत्वेन तदसिद्धयानाभीष्टसिद्धिरितिवाच्यम् । सामान्यरूपेण व्याप्तिज्ञानस्य विशेष-रूपेण पक्षधर्मताज्ञानस्य कारणत्वात् । तेनेत्थं विज्ञातव्यभितिसमेन तथा च-

यज्जातिसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नप्रतियोगितानवच्छेदक तज्जात्यवच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नसमानाधिकरणंसंयोगीय विशेषाभाव कूटवान्यावतपइत्यात्मकपरामर्शवलादेव पादपःसंयोग सामान्याभाववान् इत्येवानुमितिः विद्वज्जनैः समादृतेति तात्पर्यं विज्ञायते।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सर्वावयवावच्छेदेन वृक्षादौ गगनस्य संयोगव्याप्यवृत्तित्वे न तदीय संयोगास्यापि व्याप्यवृत्तित्वंसंगच्छते। तेन वृक्षत्वावच्छेदेन संयोगाभावइव विशेषाभावस्य तदन्तर्गततया गगन संयोगाभावाभावतया स्वरूपासिद्धेवर्तमान तया सर्वावयवावच्छेदेन वृक्षादौलघुत्वेन गगन संयोगस्यसर्वावयवा-चछेदेनाकाशसंयोगस्यैकतया तत् प्रतिपादनस्यौचित्यं सर्वसम्मतमिति विज्ञातं भवति। एवं च तादृशभावस्याभावतया संयोगयावदविशेषाभावस्य पक्षे विद्यमानत्वेन पक्षे स्वरूपासिद्धिरिति वाच्यम् ।

तादृश संयोगंप्रति समवायेनवृक्षत्वेनवृक्षस्य तादात्म्येन कारणत्वे समागच्छतिऽन्वयव्यभिचारः स्यात् - अतएव शाखावृत्तिकपिसंयोगाभावादतो नितरामवच्छेदकतासम्बन्धेन तत्संयोगं प्रतितादात्म्येन कारणत्वंवाच्यम्। एवन च-

गगन संयोगस्यसकलवृक्षावयवावच्छिन्नत्वेनतंप्रति तन्दवयवत्वेन कारणत्वेऽनन्तकार्यकार्यकारणापेक्षयावृक्षत्वेनतद्भिन्नत्वेनवा कारणत्वेलाघव-मितिविचिन्त्यअतिप्रसंगभंगाय परं व्यभिचार निरासायाऽवच्छेदकता सम्बन्धेन तादृश संयोगस्य मूले विद्यमानत्वेनापितत्र तादात्म्येन शाखात्मक कारणस्य नितराभविद्यमानत्वेन व्यतिरेक व्यभिचारः समापतति। अतएवातिप्रसंग भंगाय शाख्याद्यवयवावच्छिन्न कपिसंयोगं प्रति तदवयवत्वेन कारणत्वस्यावश्यकतया वृक्षे व्याप्यवृत्ति गगन संयोगस्यांविद्यमानत्वात्।

अथ च निर्धर्मिकानुमानस्य कदाचिदपि प्रामाणसंगतत्वं नावलोक्यते प्रामाणिकैः। पक्षताशून्यस्यानुमानं नावलोक्यते कुत्रापि केनापि च। तेन पक्षतायाः विचार सरणिः मणिकास्यस्वतन्त्रैवस्ति इति नायरोक्षंप्रेक्षावतां तार्किकणांसमुपजायत इति। यत् तत्पदपठितानुमानस्याऽप्रमाण्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्वादित्यात्मकानुमानस्याऽदर्शनात् । विपरीतवाधकतर्कविरहात् । अतएवोभयाऽवृत्तिपदस्योपादानंसार्थक्यं प्रयाति। जात्युपदोपादानेन गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वेन यादृशधर्मावच्छिन्नाभावस्याऽप्रसिद्धत्वेनापि प्रतियोगितावच्छेदकत्वाभावत्वेनापि नावसरःसमुपसर्पति। जातिपदोपादनमप्यावश्यकमेवेति साधीयान् पन्थाः विलसति। जातिपदानुपादाने कम्बुग्रीवादिमत्त्वस्यावच्छेदकत्वे तत्समानाधिकरणोभयावृत्ति घटित धर्मस्य तादृश प्रतियोगिताकयावदविशेषाभावस्य भूतलादौ साध्यस्याविद्यमानत्वात् समागच्छत्येव व्यभिचारः।

तादृशधर्मस्य गौरवग्रस्तत्वेन तादृशधर्मावच्छिन्नाभावस्या प्रसिद्धत्वादिति।

न च तथापि तादृशधर्मस्याऽप्रसिद्धत्वेनापि साध्याभाववद् वृत्तित्वव्यभिचारस्याप्यप्रसिद्धत्वेन कथं व्यभिचारावकाश इति वाच्यम् । यद्धर्मोभयासमानाधिकरणोभयावृत्तिधर्मावच्छिन्न यत्सम्बन्धावच्छिन्न प्रतियोगिताकायावदभाववान् सः तद्धर्भावच्छिन्नभाववान् इत्यनुभानेन तत् सिद्धेः। तद्वत्त्वं च स्वावच्छिन्न प्रतियोगिताकाभाववत्त्वसम्बन्धेन । एवं चैतादृश संसर्गेणकम्बुग्रीवादिमत्त्वरूप धर्मस्या कुत्रा यसत्त्वेन तादृशामावत्वात् सुतरां समागच्छति व्यभिचारावसरः। अन्येषां विचारेतु व्याप्यत्वसम्बन्धेन यज्जातिसमानाधिकरणोभयावृत्तिधर्मावच्छिन्न प्रतियोगिताकाभाववृत्तित्वनिवेशवलात् व्यभिचारावसरःनैवास्ते। व्याप्यत्वं च-

स्वाभावदवृत्तित्व सम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकातक प्रतियोगिताक भेदवत्त्वरूपा, तादृशाभावाप्रसिद्धावपितादृशाभावत्ववृत्तित्वेनापि तदग्रहणस्या वश्यकत्वेन यद्धर्भपदेन कम्बुग्रीवादिभत्वभादाय व्यभिचारनिरासाय

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तदुपादानभावश्यकमितितथोपादादानंकृतं ग्रन्थकरारेणेति।

अथ तथापि कम्बुग्रीवादिभत्वं च कम्बुग्रीवादि भद् व्यक्तिरेव, सचावयव संयोग विशेषस्तु कपाले दिद्यते, तथा च कम्बुग्रीवादि मत्त्वस्य तादृशघटत्वे विरहेण कथं तर्हि व्यभिचार इतिवाच्यम् । स्व समवायि समवे तत्त्व सम्बन्धेन कम्बुग्रीवादिमत्त्व सामानाधिकरण्यस्य तादृशतद्-घटत्वे विद्यमानत्वेन नावकाशः दोषस्येति सार्वजनीनोयं पन्थाः प्रतिभातीति।

नन्वत्र योपज्जाति समानाधिकरणोभयावृत्तिधर्मावच्छिन्न यत्समबन्धा-वच्छिन्न प्रतियोगिताक यावदभावेत्यत्र किमर्थं यावदयदमिति सत्यं प्रतिभाति। यत्किञ्चिद् घटाभाववति भूलते धटभावस्य विद्यमानत्वेन् व्यभिचारः समापतत्येवेति निश्चयः। तदुपादानेऽपि तादृशाभावपदेन नील पीतादिविशेषाभावस्य हेत्वन्तर्गतत्वेन घट विशेषेघटविंशेषाभावस्या-ऽवर्तमानत्वेन व्यभिचारस्य तादवस्थ्यमेवेति निश्चयं प्रत्येमि।

सत्तावान्नास्ति गुणत्ववान्नास्तीत्यभावमादाय स्वरूपेण सत्त्व गुणत्वाद्यवच्छिन्नस्य सुतराम प्रसिद्धत्वेन स्वरूपासिद्धरेभावात् उभयावृत्ति-त्वपदं व्यर्थमेवेति, व्यभिचारावारकत्वात् । यथा व्यभिचारवारकस्योपयोगित्वं विद्यते तथाऽसिद्धिवारकस्योपयोगित्वं वर्तत् ऐति निश्चयः। अतए तादृश-विशेषणस्यसार्थक्यंमिश्रसम्मतत्वमेवेति निश्चयः।

वैयर्थ्यं च- स्वावच्छिन्नविषयक प्रतीति विषयतावच्छेदकं स्वसमानाधिकरण प्रकृत साध्यव्याप्यतावच्छेदक धमान्तरा घटितत्वे सतिस्वावच्छिन्नाविषयक प्रतीति विषयतानवच्छेदकं यत् तद् घटकत्वमेवेत्यतो तस्यापि वैयर्थ्यं साधीय एवेत्यतोभयावृत्तित्वस्य वैयर्थ्यं संगच्छतएवेति निश्चयं प्रतीमः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यद्यप्यत्र निष्प्रयोजनकत्वमेवोच्यते तदा स्वरूपा सिद्धिवारकतया तस्य सार्थक्यं संभवति। एवमपि यदि च यद्धर्मसमानाधिकरणधर्मावच्छिन्न प्रतियोगिताकाभावत्वावच्छिन्नानुयोगिताकपर्याप्तिककूटत्वं यद् विशेष विषयकत्वं तदेव वैयर्थ्यमिति नैव साधुत्वमावहति। पर्वतो वह्निमान् नील धूमादित्यस्य नीलत्व विशिष्टस्य नील धूमत्वस्य धूमत्वानतिरिक्ततया धूमत्वे तादृशधर्मान्तरविरहात्।

परिस्थित्यामस्यामसिद्धिनिराकरण विशेषणस्य सार्थक्यमस्तिनवेति विचार मीमांसायांविदुषोच्यते यत् कल्यान्तरमनुसरता तर्कालङ्कारेण यद् वेति- तथा च यो यद्धर्मावच्छिन्न प्रतियोगिताधिकरणोभयावृत्ति धर्मावच्छिन्नावच्छेदकता निरूपित प्रतियोगिताकाभाववान् विद्यते स तद्धर्म निष्ठावच्छेदकतानिरूपित प्रतियोगित्वाभावविशिष्टः तथा च-

संयोगत्वनिष्ठावच्छेदकतानिरूपिताया प्रतियोगित्व निष्ठावच्छेदकता तन्निरूपित प्रतियोगिताकाभावस्य संयोगत्वनिष्ठावच्छेदकतानिरूपित प्रतियोगिताकाभावस्य संयोग निष्ठ प्रतियोगितावान्नास्तीत्याकारकस्य तदन्तर्गतत्वेन वृक्षेऽविद्यमान त्वेन समागच्छति स्वरूपासिद्धिरतः प्रत्येक पदस्योभयावृत्तित्वार्थकत्वं संगच्छत ऐति निश्चितमेव। अतएव पूर्वानुमाने नासिद्धिः नापि विशेषणस्यवैयर्थ्य समायतति।

अथापि यद्धर्मनिष्ठावच्छेदतायां समावायसम्बन्धावच्छिन्नत्वमपि प्रवेश्यम्। एवं प्रतियोगित्व निष्ठावच्छेदकतायामपि स्वरूपसम्बन्धा-वच्छिन्नत्वस्यापिप्रवेशः सुतरामावश्यकमेवास्तीति विज्ञेयम्।

तथापि तत्र कथं चिदपि तुष्यदुर्जनन्यायात् यदि स्वरूपासिद्धिः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संभवति चेत् यद्धर्मावच्छिन्नप्रतियोगितायां यद्धर्मेतरानवच्छिन्नत्वमपि देयमेव। एवं च स्वरूपासिद्धिवारक विशेषणस्य निवेशेनापि पुनरपि स्वरूपासिद्धिः भवेदेवेति, तथा च तं निराकर्तुं स्ववृत्त्यभाव निरूपित प्रतियोगिता निरूपित स्वरूप सम्बन्धावच्छिन्नावच्छेदकता सम्बन्धेन किंवा तादृश-स्वरूपसम्बन्धेन प्रतियोगिवृत्तिविशिष्टभेदप्रतियोगिता निरूपितावच्छेदकत्व-स्याभावस्य प्रतिपाद्यमानतयाजावकाशः स्वरूपासिद्धेः। पक्षे हेत्वभावस्यैव स्वरूपासिद्धत्वमित्यवमेयम् ।

गुरवस्तु- यद्धर्मावच्छिन्नप्रतियोगितात्वावच्छिन्नाभावत्वव्यापक कूटत्वावच्छिन्नमेवेत्यस्यैव हतुत्वमेवेति ज्ञातव्यम् । अतएव व्यापकता निवेशेन तादृशाभावस्य वैलक्षण्येन नास्य वैयर्थ्याकाशः वरीवृतीति।

अतएव नास्ति स्वरूपासिद्धः समागच्छत्यवसरः। नैव विशेषणस्य वैयर्थ्यम् । तेनासिद्धिवारकविशेषणस्यापिवैयर्थ्यंसमागच्छति। गन्थकारोक्तासिद्धिवारकविशेषस्यसार्थक्यमस्त्येवेति गुरुचरणानां सं वादोस्तीति निश्चयं प्रतीमः।

मान्यास्त्वित्त्थं व्याचक्षते यत् - असिद्धिवारक विशेषणस्यैवैयर्थ्यमस्ति नेतिपक्षमाकल्यतां तर्करसिकानां विदुषां विचारपक्षेतादृश विशेषणस्य विवाद ग्रस्तमूलकत्वेनार्थसमाजग्रस्ततया तादृशविशेषणशून्यं कल्यान्तरं समादरतया व्याचष्टे तर्कालङ्करः यद् वेति। अतः यद्धर्मनिष्ठाव्चछेदकता निरूपितप्रतियोगित्व समानाधिकरेणाभयावृत्तिविशिष्ट धर्मावच्छिन्ना-वच्छेदकताकप्रतियोगिताकाभाववान् सतादृशतद्धर्मावच्छिन्न प्रतियोगिता-काभाववान् इत्यर्थस्यैव स्वीकार्यतया पूर्वोक्तदोषावरसः नैव दृष्टिपथे समापतति। अतः पक्षेस्मिन् ग्रन्थकारस्य नास्ति विमतिः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तथा च- संयोगनिष्ठसंसर्गता निरूपितावच्छेदकता निरूपितावच्छेदकता विशिष्टप्रतियोगितानिरूपकाभावस्यसंयोगविशिष्टप्रतियोगिता निरूपकस्य संयोगविशिष्टप्रतियोगित्ववान्नास्तीत्याकारकाभावस्य तदन्तर्गतत्वेन तादृशाभावस्य वृक्षेऽविद्यमानत्वेन स्वरूपासिद्धिः तेन तन्निरासाय प्रत्येकपदस्य तदुभयार्थकत्वं सर्वदासुसंगत मेवेति सत्यं प्रतिभाति।

एवं च - संयोगत्ववृक्षत्वान्यतरावच्छिन्नप्रतियोगित्वनिष्ठा वच्छेदकतानिरूपित प्रतियोगिताकाभावस्य वृक्षेऽविद्यमानत्वात् स्वरूपासिद्धिरतो यद्धर्मावच्छिन्नप्रतियोगितायांयद्धर्मेतरानवच्छिन्नत्वं प्रवेश्यम्। तेन स्वरूपासिद्धिः नावलोकयते । एवं च नास्ति स्वरूपा सिद्धिः नैव व्यर्थ विशेषणत्वं नैव स्वरूपासिद्धिः। व्यापकत्वं वृत्त्यभाव प्रतियोगितावच्छेदकत्वसम्बन्धेना ।

एवं च संयोगत्वस्य न्यूनवृत्तिर्योधर्मः सः तत्तत्वंयोगत्वमेव, तादृश धर्मावच्छिन्नप्रतियोगिताक यावदभाववान् सोहि संयोगत्वावच्छिन्न प्रतियोगिताकाभाववानिति तात्पर्यं चोररीकृत्य कथितानुभाने वृक्षादौ स्वरुपासिद्धतया नोपादानावसरः समुपसर्पति । तेन न्यूनवृत्तित्वस्य गुणत्वादावपि निरासाय स्वसमानाधिकरणपदस्य सार्थकमस्त्येवेति तर्कालङ्कार विचार पन्थाः।

न्यूनवृत्तित्वञ्च- स्व समानाधिकरणत्वेसति स्व समानाधिकरणवृत्तिभेद प्रतियोगितावच्छेदकत्वमेवेति सुतरां संसिद्धमेवेति तेषां विचार पक्षः प्रतिभाति।

यद्यप्यत्र स्वरूपासिद्धिनिवारकविशेषणाऽप्रवेशे लघुत्वमेवेति विद्यतएवेति वाच्यम्, न्यून वृत्तित्वस्यैव स्वरूपासिद्धि निरास प्रयोजकत्वात्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परिस्थित्यामस्यां स्वप्रतिग्यधिकरणवृत्तिलेसतिस्वानुयोगिवृत्तित्वोभय सम्बन्धेन भेद विशिष्टान्यत्वमेवेति तदुभयावृत्तित्वमेवेति मान्यानां विचार पन्थाः। तादृशापेक्षया स्वसमानाधिकरणवृत्ति मेद प्रतियोगितावच्छेदक-त्वात्मकत्वमेवेति न्यून वृत्तित्वं कथनीयमिति तेषामाशयः। अन्येनत्वत्थं व्याचक्षते यत् - स्वाधिकरणवृत्यभावीय प्रतियोगित्व सम्बन्धावच्छिन्न प्रतियोगिताकाभाववत्त्वमेव व्यापकत्वं व्याख्येयं तर्करसरसिकैः।

व्यापकत्वं च स्ववृत्यभावीयप्रतियोगिताव्चछेदकत्वसम्बन्धेन । तथाचोक्तसम्बन्धेन प्रतियोगितात्वाधिकरणाभावस्याप्रसिद्धावपि द्रव्यत्वत्वावच्छिन्नप्रतियोगितात्वसमानाधिकरणस्यतयोक्त सम्बन्धेन घटाभावस्य प्रसिद्धत्वेनापि प्रतियोगित्वसम्बन्धेन द्रव्यत्वत्वावच्छिन्न प्रतियोगितात्वसमानाधिकरणस्यघटादावपि सत्त्वेन द्रव्यत्वत्वावच्छिन्न प्रतियोगित्वसमानाधिकरणभावीय प्रतियोगित्वसम्बन्धेन तादृश संयोगत्वावच्छिन्न प्रतियोगितात्व समानाधिकरणाभावीय प्रतियोगित्व सम्बन्धेन तादृश संयोगत्वावच्छिन्न प्रतियोगित्वाभावस्यकेवलान्वयित्वेन वृक्षे विद्यमानतया तादृशसम्बन्धेन वृक्षादावपि तादृशसंयोगत्वावच्छिन्न प्रतियोगितात्वव्यापकत्वस्य सम्भवतया नावकाशः दोषस्येति निश्चयं मन्ये। अन्येतु यद्धर्मनिष्ठाव्चछेदकता निरूपित प्रतियोगितात्वावच्छिन्नाधिकरण-वृत्तित्वाभावात्व व्यापककूटत्वावच्छिन्नत्वस्यैव हेतुत्वेन तथा व्यापकत्वनिवेशवैलक्षण्यतया तादृशाभाव निवेशस्य नितरामौचित्यतया न तत्पक्षस्वीकारेऽपि नास्तितेषांवैयर्थ्यावकाश इति विदुषां मान्यगुरुचरणानां विचार पन्थाः।

नव तथापि वृक्षान्यासमवेतत्वस्य वृक्षावृत्तित्वेन नतस्य संयोगत्व

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सामानाधिकरण्ये वरीवर्ति, इत्यतोवृक्षद्वय संयोगात्मभावेन विद्यमानत्वात् तेषां वृक्षान्यसमवेतत्वं सम्भवतीत्यतो नावकाशः कस्यापि दोषस्येति निश्चयं प्रत्येमि।

एतावता पूर्वोत्तरवचनविन्यासेन विज्ञायते विदुषा यत् सामान्यतया व्याप्तिज्ञानस्य विशेषरूपेण पक्षधर्मेविज्ञानतया व्याप्तिहेतुत्वेनसर्वथा समादरणीयमेवेतिसार्वजनीनः। तथा च-

यज्जाति समानाधिकरणोभया वृत्ति धर्मावच्छिन्न प्रतियोगिताक यावद भावसमानाधिकरणाभावप्रतियोगिताकनवच्छेदकतज्जात्यवच्छिन्न प्रयियोगिताकाभावत्वावच्छिन्न समानाधिकरण संयोगीय विशेषा भावकूटवान् वृक्ष इत्याकारकारकपरामर्श प्रतीतेः, वृक्षःसंयोग सामान्याभाववान्- इत्याकारकानुमितिः सर्वसम्भतेति निश्चयं सर्वदा प्रत्येमि।

विशेष पदस्य न्यूनवृत्तित्वमभ्युपगच्छतां विदुषां विचारे तादृश पक्षस्य वैशिष्टमुपन्यस्य तन्मतं दूषयितुं प्रयतते कि योयद्धर्मन्यून वृत्तीति। तथाच संयोगत्वन्यूनवृत्तिर्योधर्मस्तत् तत्तत्संयोगत्वं, तदवच्छिन्न प्रतियोगिता- कयावदभाववान् योस्ति स संयोगत्वावच्छिन्नप्रतियोगिताकाभाववान् इत्यर्थतयैव स्वरूपासिद्धयैव नैव पूर्वोक्त दोषस्यौचित्यं तर्क सतम्ममिति प्रामाणिकानां विचारसरणिः।

न्यूनवृत्तित्वं च- स्वसमानाधिकरणत्वेसति स्वसमानाधिकरण भेद प्रतियोगितावच्छेदकत्वम्। सत्तात्वस्य न्यूवृत्तित्वमयाकर्तुं स्वसमानाधिकरणत्व विशेषणं नितरामुचितमेवास्ते। एवं च गुणत्वस्य न्यूनवृत्तित्वं निराकर्तुं विशेष्यदलं परमावश्यकमिति। घटावृत्तिसंयोगत्वस्य वृक्षान्य समवेतत्वस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

च घट वृत्तिसंयोगे विरहेण संयोगत्वन्यूनवृत्तित्वेन तदवच्छिन्नाभावस्य हेत्वन्तर्गतत्वेन वृक्षेऽभावतया स्वरूपासिद्धिदोषाकान्ततया तादृशानुमान-स्वैचित्यं नावलोक्यतेतार्किक वर्येण।

एतावता वचनविन्यासकदम्बेन विज्ञायतेयत् वृक्षादौ सर्वावयवावच्छेदेन लाघवतया एक एव संयोगः गगनादेःविद्यमान एव तथा च तदभावस्याभावतया संयोगयावद्विशेषभावस्य पक्षे विद्यमानतया पुनरपि स्वरूपासिद्धिदोषः विद्यतएवेतिसत्यं प्रतिभाति, परन्तु तादृशाति प्रसंगनिरासाय तादृशसंयोगंप्रति तत्तदवयवत्वेन कारणत्वस्यौचित्यतया वृक्षत्वावच्छेदेन गगन संयोगस्यविद्यमानत्वात् । एतेन विज्ञातं भवति यत् अनुमानस्थले व्याप्तिज्ञानप्रतिबन्धकत्वेन कस्यापि दोषस्य दूषकताबीज मिदमस्ति यत्-

व्योप्तिज्ञानविरोधित्वेनैवोपाधेः दूषकता वीजं वरीवृतीति। अत्र विरोधित्वं नैव साक्षात्- समुपजायते, परन्तु सत्यपि तादृश निश्चये व्यभिचारानुमा-पकत्वेनैव विरोधित्वमुपजायते। धूमवान् वह्नेरित्यादौतु- आर्द्रेन्धन संयोगस्यैवोपाधित्वेन धूम व्यभिचारी वह्निः प्रस्तुतस्थले आर्द्रेन्धन संयोगस्य धूमव्यापकत्वेन तादृश व्याभिचार निश्चयस्य प्रतीतिप्रमाणाभ्यां संवलितत्वेन साध्यव्यभिचार निश्चयस्य हेतौ विद्यमानत्वेन व्याप्ति ज्ञानं प्रतिबन्धक वचनमिदंसार्वजनीनम्।

हेतुनाऽमुना विदाङ्कुर्वन्ति विद्वदवरेण्याः- किलं संयोग सामान्याभाव संयोग विशेषाभावयोः व्याप्तिनिश्चयस्य स्वीकार्यतयासामान्यतया तादृशोपाधिनिश्चयस्यविरोधित्वं प्रतीतिप्रमाणाभ्यां सर्वदासंवलितंनेवेति विदुषां निश्चयः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्यथा तद् विपरीत धर्मिक महानसीयवह्निव्यापकनिश्चयस्य वह्नित्वेन धूमत्वेन च विरोधिता व्याप्तिबुद्धौ भेदेवेति धीमतां निर्णयः।

यद्यत्र सामान्यतया कपिसंयोगाभाववति निर्वच्छिन्नवृत्तिकत्व विशिष्टकपिसंयोगीय यावद् विशेषाभाववत्त्वस्य व्यभिचारित्वेन गुणे तादृश संयोगाभावस्य व्याप्यवृत्तित्वेन व्याप्यवृत्तेरवच्छेदकत्वानङ्गीकारतया यत्किञ्चिदवच्छेदेन साध्य व्यापकत्वं कथं संगच्छेत । अतः निर्वच्छिन्न वृत्तिकत्व विशिष्टस्यैव विवक्षणीयत्वेन व्याप्य वृत्तिपदार्थस्य नावच्छेदक त्वमिति ज्ञातव्यं समैः।

निर्वच्छिन्नवृत्तिकत्वविशिष्टसंयोगयावदविशेषाभावस्यैव तावद विवक्षणीय मितिवोध्यम् । तस्य हेतौव्यापकत्वमुपजायते, तत्र निरवच्छिन्न वृत्तिकत्वविशिष्टसंयोग यावद् विशेषाभावस्य तत्र विरहेण साधनाव्यापकत्वं संगतभेवेति वेदितव्यमिति । न च तथापि कपिसंयोगाभावविशिष्टेवृक्षे निरवच्छिन्नवृत्तिकत्वविशिष्टतादृश यावद्विशेषाभावस्याऽवर्तमानत्वेन साध्याऽव्यापकत्वमुपाधेः विद्यत एवेति वाच्यम् । तथाप्रवेशेन कपिसंयोगाभावस्य जातिमात्रावच्छिन्नप्रतियोगिताकाभावस्य तेनैव रूपेणनिरवच्छिन्नवृत्तिकत्व विशिष्टतदीयपावद्विशेषाभावस्यऽविद्यमानतया साध्य विशिष्टोपाधेः व्याप्तिमंगत्वमेव समापतेत् ।

एवं चाभिघातत्वविशिष्ट संयोगसमान्याभावस्याविद्यमानयता वृक्षे निरवच्छिन्नवृतिकत्वविशिष्टयावद्विशेषाभावस्याऽसत्त्वादेव साध्यव्यापकत्वमस्त्येवेत्युपाधेः विद्यत एवेति युक्तियुक्तमेवेति साधीयान्- विचारः ग्रन्थकाराणामिति । किन्तु गुणविभाजकजातेः साध्यविष्टहेतोः तथा त्वेनैव प्रवेशः। एवं चाभिघातत्वस्य संयोग विमाजकातया गुण

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विभाजकत्वविरहात् तादृशावच्छिन्नाभावस्य साध्यानन्तर्गतत्त्वेन नैव व्याप्तिमंगापत्तिः लोचन गोचरतां समभ्युपैति ।

गुणविभाजक जातित्वं च- गुणत्व व्याप्यत्वेसति गुणत्वव्याप्या व्याप्यजातित्वमिति। तत्त्वं च- गुणत्व समानाधिकरण भेद प्रतियोगितावच्छेदकजातिमदन्यत्वम् । जाति मत्त्वं च- स्व सामानाधिकरण्य स्व समानाधिकरण भेद प्रतियोतितावच्छेदकत्वोभय सम्बन्धेन ।

वास्तविकंतु-

गुण संसर्गवोधीयोद्देश्यतावच्छेदकत्वमेव गुणविभाजकत्वमेवेति वोध्यम् ।

अपरेतु चेत्थं ब्रुवते यत् - कम्बुग्रीवादिमत्त्वं स्वीकृत्य व्यभिचारं दूरी कर्तुंजात्युपादानस्यौचित्यं स्वीक़रोति । तथाचावच्छेदकतासम्बन्धावच्छिन्न प्रतियोगिताकसंयोगाभावाधिकरणस्य तादृशस्य शाखामूलादिरूपस्यावच्छेद्यत्व सम्बन्धेन तादृश प्रतियोगिताकाभाव विशिष्ट यावत् संयोगाभावविशेषाभाववत्त्वमुपाधिः समवगन्तव्येति निश्चीयते तार्किक चणैः। एवं तद्विशिष्ट यावदविशेषाभाववत्त्वमुपाधिरिति प्रतिपादयन्ति विद्वासः। तन्न मद्रकरम् ।

योयद्धर्मस्यावच्छेदकः स तदभावस्याऽवच्छेदक इतिव्याप्तिरीतिमनुसृत्यवृक्षत्वादेः तदमा वावच्छेदकत्वं स्वतएवसिद्धमिति सत्यं वचः प्रति भाति। अतएवशिरोमणिः प्रतियोग्यनवच्छेदकतया वृक्षत्वस्य तदभावावच्छेदकत्वं भवेदेति निश्चयत्वेन गुणाद्यनवेच्छेदक प्रमेयत्वस्यापि तदभाववच्छेदकत्वेन तत्प्रसंगत्वं भवेदेवेतिवचनविन्यास प्रतीतिवलादेवतथात्वापत्तिः भवेवेदेवेति निश्चयः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

घटपूर्वषर्तित्वस्य भिन्नत्वेऽपि प्रतिदण्डत्वस्य तस्यैवावच्छेदकत्वं सुसम्पन्नमेवेति निश्चयं मन्ये। अतएव तस्यैवावच्छेदकत्वमिति निश्चयः।

अन्येतु घटादौ समुत्यत्तिकालावच्छेदेन गुणाभावः प्रलयकालादावच्छेदेन आकाशादौ सामान्याभावोविद्यते एवेति निश्चयः। धूमाधिकरणे दहनाभावः संमवत्येवेति निश्चयं मन्ये। नितम्ब प्रदंशावच्छेदेन हुताशनाभावः नतु शिखरे'' इत्यादि प्रदेशावच्छेदेन संयोगेन द्रव्यस्यापि नितान्तमव्याप्यवृत्तित्वं जायतएवेति निश्चयः। पूर्वोक्तवाक्यादेव शिखरावच्छिन्नपर्वतनिरूपितवृत्तित्वाभाववाहुताशनः, पर्वतवृत्ति हुताशनस्य तदवच्छेदकत्वाभावावच्छिन्न शिखरमिति वोधस्य प्राणाणिकतया प्रथमान्तार्थ मुख्यविशेष्यकशाब्दबोधनुरोधात् वहन्यभाववान् पर्वत इति वोधस्य स्वाभाविकत्वमितिव्रूते प्रामाणिकः।

तथा च–

यदवच्छेदेन यत्सम्बन्धाभाववान् तस्य तदवच्छेदेन तत्सम्बन्धावच्छिन्नत दभाववान् इति व्याप्तिप्रतीतिवलादेव शिखरावच्छेदेन संयोगेन तदभावस्य सिद्धिरिति विज्ञायतेऽस्माभिः।

एवं देशकालावच्छेदेन तदभावस्य प्रतीयत्वेन तादृश साध्यकस्थलेऽव्याप्तिनिरासाय प्रतियोगिव्यधिकरणस्योपादानं नितान्तभावश्यक मेवेति साधीयान् पक्षः प्रतिभाति।

अतएव तादृशस्थलानुरोधेन प्रतियोगिव्यधिकरणस्यप्रतिपादनं समुचित मेवेति सम्यक् विज्ञायत एवेति निविवादसिद्धोयं पन्थाः।

अत्रेदं चिन्त्यते विशिष्टसत्ताभाववान् गुणत्वात् इत्यादिस्थले

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

साध्याभावस्य सत्तात्मकत्वेन गुणादावपि निरवच्छिन्नवृत्तित्वस्य वर्तमानत्वेनाव्याप्तिरित्यतो सुतरामव्याप्तिरित्यतो मूलोक्त प्रतियोगिवैयधिकरण्यप्रवेशस्यौचित्यं स्वाभाविकमेवेति सत्यंवचोविधानं प्रतिभाति। कथं तु-

साध्याभावस्य द्रव्यत्वात्मकत्वे हेत्वाधिकरणत्वात्। एवं तथाऽभावस्य कालिकेन योऽमावस्तस्य स्वरूपसंसर्गेण साध्यत्वे गगनत्वस्य हेतुत्वे समापतति सुतरामव्याप्तिः। साध्याावस्याभावत्वस्वरूपत्वेन हेत्वधिकरणतया विद्यमान प्रतियोगितावच्छेदकत्वस्य तदवच्छेदके वर्तमानत्वेन तथात्व प्रसंगस्य ध्रौव्यत्वमेव सम्पद्यते। तेन हेत्वधिक्ररण निरपित वृत्तितावच्छेदकी मूतानुयोगितानिरूपितावच्छेदकानुयोगिता निरूपित प्रतियोगितावच्छेदकाभाव त्वेन तादृशावच्छेदक विवक्षणेनैवाऽव्याप्तिवारणंस्य स्वाभाविकत्वेन तथात्वं भवेदेवेति समुचितं भवत्येवेति सत्यम्। किन्तु साध्याभावत्वरूपानुयोगितायां तथा च तादृश वृत्तितावच्छेदकस्य तत्राऽसत्त्वेन लक्षण घटकत्वात्। यद्यापि धूमाभावत्वाभावसाध्यक वहन्यादि हेतौ साध्याभावस्य धूमाभावत्वरूपतया हेत्वधिकरणाऽयोगोलक निरूपित वृत्तितावच्छेदकस्य वर्तमानतया धूमाभावाधिकरणनिरूपितत्त्वस्य धूमाभावाधिकरणं निष्ठप्रतियोगितायां विद्यमानयताऽव्याप्तिः स्यादितिवाच्यम्। तथानुयोगिताविशिष्टप्रतियोगितानवच्छेदकत्वस्य विवक्षणीयतयानस्तिदोषावकाशः, सत्यमिदं वचनं विभाति। एव तत्रवैशिष्स्यञ्च-स्वनिरूपितत्त्वस्वाश्रय निरूपितत्त्वोभयसम्बन्धेन, तथा च तादृश प्रतियोगितायां धूमाभावत्वात्मकानुयोगिता रूपितत्वस्य विद्यमानत्वेऽपि स्वाश्रय धूमाभाव निरूपितत्वाभावात्। तादृशसाध्याभावस्य तल्लक्षणाधटत्वेनाऽव्याप्त्यभावात्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एतादृश परिष्कार विवक्षणेनापि तादृशान्यतरस्य कालिकसम्बन्धावच्छिन्न प्रतियोगिताकाभावस्या स्वरूपसम्बन्धेन साध्यत्वे तथात्मत्वहेतावव्याप्तिः। तथाहि- साध्यनिष्ठप्रतियोगितायां तथात्वदर्शनेनाऽव्याप्तिः प्रसंगस्यतादवस्थ्यमेवेति तथ्यं वचः समुचितमेवेति साधीयान् पन्थाः विलसति ।

हेतनाऽमुना पूर्वोक्त सम्बन्धमपहायस्वनिरूपितत्व- स्वभिन्नानुयोगित्वानिरूपितत्वोभयसम्बन्धेनानुयोगिताविशिष्टप्रतियोगिताविशिष्ट प्रतियोगितायाः निवेशेनैव तद् वारणं परमावश्यकमेवेति साधीयः वचनम्।

वास्तविकंतु- हेत्वधिकरणवृत्तित्वं यद्धर्मावच्छिन्न प्रतियोगिताकाभावत्वावच्छिन्नं भवति तद्धर्मभिन्नत्वस्य साध्यतावच्छेदके विवक्षणेनैव नैव पूर्वोक्त दोषाणामवकाशः संभवति । तथा च विशिष्टसत्तात्वाभावत्वावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नाधिकरणक तादृश गुण निरूपित वृत्तित्वं निवेश्यम् ।

अत्र निवेश प्रकारस्त्वित्त्थं ज्ञतव्यम् समेनेति- तद्यथा-

हेत्वधिकरणनिरूपितवृत्तितानिरूपिताभावत्वनिष्ठावच्छेदकतानिरूपिताभावनिष्ठावच्छेदकतानिरूपितप्रतियोगित्वनिष्ठावच्छेदकता निरूपितावच्छेदकत्वनिष्ठावच्छेदकतानिरूपितनिष्ठत्वसम्बावच्छिन्नावच्छेदकतावद् भिन्नत्वं साध्यतावच्छेदके प्रवेश्यमित्यतो नावकाशः पूर्वोक्त दोषाणामित्याशयः विशिष्ठसमालोचकानां विमर्शः।

एतेन विज्ञायते यत् वृक्षावृत्तिः संयोगसामान्याभावस्तु प्रतियोग्यधिकरणावृत्तित्वादित्यनुमानेन संयोगत्वावच्छिन्न प्रतियोगिताकाभावस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हेत्वधिकरणावृत्तित्वेन लक्षणाघटकत्वात् नाव्याप्ति दोषावकाशः दृष्टि गोचरतां प्रयाति। अतएव पूर्वप्रतिपादितानुमाने स्वरूपासिद्धिदोषस्योद्भावनं विद्यत्ते।

तथा च संयोगसामान्याभावः प्रतियोग्यधिकरणवृत्तिः एक कालावच्छेदेन यद्देशावच्छेद्यप्रतियोग्यधिकरणवृत्तिरहितत्वादिति विचारपरकत्वेन तदुपमिति समादरणीयचरणानां तात्त्विक विमर्शः लोचन पथे पथिकायते । एवञ्च परिस्थित्यमस्यां गुणवत् संयोग वद्वा, द्रव्यत्वात् एवं वह्निमान् धूमात् घटध्वंसादित्यादिस्थले समागताव्याप्तिनिरासायाऽसमानाधिकरणान्त विशेषणस्य प्रयोजनं परमावश्यकमेव मूलकृतां वर्ततइति निश्चयं वेद्मि।

शिरोमणि विचारे व्याप्यवृत्ति साध्यके साध्यसाधन मेदेन तद् स्यौचित्यदर्शनात् किं प्रयोजनं तस्येति सुतरांसिद्धमेवेति निश्चयं प्रत्येमि।

वृक्षः नित्यगुणत्वादित्यादि स्थले तस्यावश्यककत्वस्य विवादास्यदतया तस्यौचित्यं समुपयादयितुं सर्वथैवेत्युक्तं ग्रन्थकृतेति।

व्याप्यवृत्तिसाध्यकस्थलेऽपि प्रतियोग्यसामानाधिकरण्याप्रवेशे सत्तावान् जातेरित्यादावव्याप्तेः, तथा च हेत्वधिकरणे स्पन्दादौ समवाय सम्बन्धावच्छिन्न प्रतियोगिताकाभावस्य सत्ताभावस्य कालिकादिसम्बन्धेन तत्र वृत्तित्वात् सुतरामव्याप्तिः। तन्निराकर्तुं यद्यमावे हेत्वधिकरण वृत्तित्वस्याभावीय विशेषणत्वेन नावकाशः पूर्वोक्त दोषस्येतिसत्यभावाकिन्तु द्रव्यत्वाभावनान् सत्त्वादित्यादावति प्रसंगस्य तादवस्थ्यमेवेति युक्तियुक्त मेवेति तथ्यं वच भावत्कम्, तथाप्यद्य विशेषणतासम्बन्धेन, द्रव्यत्वात्मक साध्याभावस्य वृत्तित्वा भावत्वेन तादृशदोषस्य तुतरांमसिद्धत्वात् । द्रव्य-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भेदत्वप्रकारकप्रमीयविशेष्यत्वाभावस्य द्रव्यत्वानतिरिक्तत्वेन पुनरापि पूर्वोक्ता-दोषस्यविद्यमानत्वात् । तथाप्यमावस्याभावस्य व्यतिरिक्तत्वेन पूर्वोक्ताति व्याप्ति निराकरणस्यौचित्यं विद्यतएवेति युक्त्या सिद्धमिति-वाच्यम् ।

भावाभाव साधरणस्य भावस्य निर्वचन विरोधापत्तेः। अभावाभावस्या-तिरिक्तत्वेऽपि साध्याभावस्य तृतीयाभावत्वेन परिणतस्य घटत्वाभाव स्वरूपत्वेन स्वरूपसम्बन्धेन हेत्वधिकरणत्वेन वृत्तित्वस्य यर्यवसानात्।

अत्र तत्त्वविदा विदुषा प्रतिपाद्यते यत् -सामानाधिकरण्य प्रत्यासत्त्या तादृश प्रतिबन्धकतावच्छेदक सम्बन्धस्य समवाय रूपतया संयोग निष्ठ संसर्गतानिरूपितावच्छेदकता निरूपित प्रतियोगिताकाभावस्य साध्यत्वे वह्न्यवयवस्य हेतुत्वे तादृश वच्छेदकीभूत समवाय सम्बन्धेन वाहन्यभावाभावात्मकस्य वह्न्यात्मकस्य साध्यत्वे हेत्वधिकरणे विद्यमानतया सुतरामव्याप्तिःस्यादेवेति निश्चिनुमः।

किन्तु प्रकृतसाध्यतावचच्छेदकसम्बन्धावच्छिन्न साध्यता व्चछेदकावच्छिन्न प्रकारतानिरापित्त बुद्धित्वावच्छिन्नप्रतिबन्ध्यता निरूपित प्रतिबन्धकतावच्छेदकी भूत प्रकारता वच्छेदक सम्बन्धेन तथात्वे कार्ये कारण भावपितादृश दोषस्य निरासेऽपि वक्ष्यमाण दोषोक्तस्यप्रध्रौव्यापत्तेः।

एवञ्च समवायसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य विशेषणता विशेष सम्बन्धेन साध्यत्वेत्तादृश बुद्धिविरोधिताघटक सम्बन्धमादाय प्रमेयत्वरूप साध्याभावस्य हेतुसमानाधिकरणत्वेन सुतरामव्याप्तिः सञ्जायते। हेतुनाऽमुना तन्निरसितुंसाध्यतावच्छेदक सम्बन्धानुधावनं परमावश्यकं प्रतिभाति ।

तथापि घटाभावस्य स्वरूपसम्बन्धेनसाध्यत्वे गगनत्वादि हेतौ

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वाभाविकीरीतिमनुसृत्य सुतरामव्याप्तिदोषस्योद्धारः गगनकुसुमायमान-भिवाऽऽभाति । घटत्वाभावस्यतादृशस्याभावाभावाभावत्वकल्यनानुसारात्। तन्निरसितुं साध्यतावच्छेदक सम्बन्धेनस्वप्रतियोगिभत्त्वबुद्धेः विषय विधया प्रतिबन्धकतावच्छेदक संसर्गेण हेत्वधिकरणवृत्तित्वाऽभावस्य विवक्षणेन नास्तिदोषावकाशः सम्भवति। अतएव द्रव्यत्वाभाववान् जातित्वादित्यादि-स्थले विशेषणता विशेष सम्बन्धावच्छिन्न जातित्वावच्छिन्न प्रतियोगिताकाभावस्य विषयविधयाप्रतिबन्धकतावच्छेदकस्वरूप सम्बन्धेन हेत्वधिकरण वृत्तित्वस्य विवक्षणत्वेन तादृशाभावस्य प्रसिद्धत्वेननावकाश; समायतितदोषावकाश इति वृद्धाः।

अत्र कालिकसम्भ्धेनआत्मत्वाधिकरणेस्पन्दादौ समवाय सम्बन्धावच्छिन्न प्रतियोगिताकाऽऽत्मत्वाभावस्य केनापि सम्बन्धेन वृत्तितया तदभावीय प्रतियोगितायाः नितरामात्मनि वृत्तित्त्वेन तदधिकरणे तदात्मनि कालिक सम्बन्धावच्छिन्न प्रतियोगिताकाभावस्य र्वमानत्वेन तादृश दोषस्य तादवस्थ्यमित्यतो तद् सम्बन्धावच्छिन्न त्वोपादानस्याऽऽवश्यकत्वमिति विज्ञायते ।

सत्तावान् जातेरित्यादौ पुनरप्युपादेयमिति सर्वजनसिद्धोयंपन्थाः प्रतिभाति। कथं तु सत्त्ववति स्यन्दादौ समवायसम्बन्धावच्छिन्नसत्ताभावस्य कालिकादिसम्बन्धावच्छिन्नतयातत्रविद्यमानत्वेन तस्य व्याप्यवृत्तित्वाधिकरण-वृत्तित्वस्यसम्बन्धसामान्येन प्रविष्टत्वेन तन्निराकरणोपायः सुतरामन्वेष्टर्व्य मिति निश्चप्रचम् ।

अतःएव व्याप्यवृत्ति साध्यकेऽपि प्रतियोगिवैयधिरण्य विशेषणोपादान भावश्यकमिति विदुषां विमर्शः-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्यथा- अयमात्मा ज्ञानादित्यत्र आत्मत्वाधिकरणे आत्मनि समान कालीनत्व सम्बन्धेनात्मत्वाभावस्य सम्बन्धित्वेन व्याप्यवृत्तित्वानुपपत्ति प्रतिसन्धानेन हेत्वाधिकरणवृत्तित्वमाय सम्बन्धिभिन्नत्वेनापि विशेषणं देयमेवेति ग्राह्यम् ।

अन्यथा ज्ञानाधिकरणे तत्रैवात्मनि समानकालीनत्वसम्बन्धेनात्मत्वाभावमादायाऽव्याप्यत्यायत्तेः। सत्यंमिदं वचनं स्वीकुरुतेमान्योहि जनः।

इत्यादिकारणकूटेन प्रतियोग्यसामानाधिकरण्योपादानमावश्यकं प्रतिभाति। प्रतियोग्यसामानाधिकरण्य घटितंलक्षणमुचितमेवेति गुरुचरणः। प्रयोजनमिदं सुविचार्य तद् घटितं लक्षणं वास्तविकत्वेन नितरां साधीयः। अतएव मणिकारेण न्यगादितद्धटितं लक्षणं समुचितमेवेति। स्वप्रतियोगितावच्छेदकावच्छिन्नाधिकरणवृत्तित्वस्य तत्र विशेषणत्वे कपिसंयोगी एतद् वृक्षत्वादित्यत्र तादृशकपिसंयोगाभावस्य स्वप्रतियोगितावच्छेदकावच्छिन्नाधिकरण वृत्तित्वाद् तन्निराकरणं भदेवेवेति त्रिकालसत्यमाभाति। प्रतियोगिताव्च्छेदकावच्छिन्नत्वं च प्रतियोगितावच्छेदकताघटक सम्बन्धेनेति विज्ञातव्यम् । तदनिवेशे कालिकसम्बन्धेन धूमत्व विशिष्टतया धूमाभावस्य प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यत्वेन लक्षणाघटकत्वेन व्यभिचाररिणि स्वाभाविक गत्याऽतिव्याप्ति शंका जागरितेति निश्चयः।

अत्र केचन विद्वांसस्तु प्रतिपादयन्त्वित्त्थयत् - प्रतियोग्यसामानाधिकरण्यमेवेति साधीयः, यत् एतन्निवेशेनैवतन्निर्वाहः भवेदेवेति निश्चयप्रचम् । किन्तु- प्रतियोगितावच्छेदकावच्छिन्नत्व पर्यन्तमपि निवेशः सुतरांसंसिद्धएवेति विज्ञायते । विशिष्टसत्तात्वादिना जात्यादिरूप हेतुसमानाधिकरण

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रतियोगिव्यधिकरणाभावप्रतियोगित्वसम्भवतयापि गुणादावपिगुणकर्मान्यत्व-विशिष्ट सत्तात्वविशिष्टवैशिष्स्यावगाहाद्यनुमितिवारणंसंभवति । विशिष्ट सत्तावान् जाते रित्यत्र जात्याधिकरण गुणादिवृत्तिविशिष्ट सत्ताभाव प्रतियोगिताश्रय शुद्धसत्ताधिकरणत्वस्यैव गुणे वर्तमानत्वात् तादृशाभावान्तर मादायातिव्याप्तिवारणं भवेदेवेति निश्चिनोमि। परिस्थित्यामस्यां प्रतियोगितावच्छेदकावच्छिन्नात्वप्रवेशे विशिष्ट सत्ताभाव प्रतियोगितावच्छेदकं यद्विशिष्टसत्तात्वं यत् तादृशाच्छिन्नानधिकरणत्वस्य विद्यमानतया गुणेसाध्याभावस्यापि प्रतियोगिव्याधिकरणत्वेन वर्तमानतया नातिव्याप्तिशंकावतारस्यदर्शनंनैव दृष्टिगोचरतां समभ्युयैति। अतएव ग्रन्थकार विचारचर्चामालक्ष्य प्रतियोगिव्यधिकरण निवेशस्यौचित्यं नितरां समीचीनमिति। नावकाशस्य शंकावतारस्य किमपिप्रयोजनं नैवलोचनपथे पथिकायते ।

प्रतियोगिव्यधिकरण प्रवेशाप्रवेश विचारमाकलय्यातिव्याप्त्यत्याप्ति दोषनिरासाय यादृशनिवेशप्रवेशस्यौचित्यं समुपपाद्य स्वयमेवमणिकारग्रन्थ-स्यामथाव धारणत्वेन प्रतियोगिताऽनवच्छेदकत्वानुसरणस्यौचित्यं प्रतिपादयन् तर्कालंकार मणिसूत्रे तावदनावश्यक निवेशं समुयपाद्य व्यर्थमेवेति सदाऽनवच्छेदकत्वानुसरणस्यैचित्यप्रतिषेधमुखेन मणिसूत्रे तावदर्थान्तर-कल्पनाजाल प्रसारस्यौचित्यं पश्यन्नपि नञ् व्यत्यासोपि प्रमाण परिपुष्ट एवेति सिद्धतयाऽपि बृद्धानां वचन विन्यास मार्ग मनुसरन् तमेव पक्षं दृढ़ीकर्तुं मणिकारसूत्रस्यैव स्वाभाविकमर्थं परित्यजन् नितरामर्थान्तर कल्पनाजालप्रसादंतावदनावश्यकत्वेनवास्तविकविचारएव साधीयान् विचारावसरःसमुपसर्पति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अतएव नूनं विचारावसरः मणिकारस्य विचार प्रमाणमेवेति निश्चयः। अतएव नातिभारः कार्यकारणस्यविद्यते । येन प्रकत विषये ससङ्कोचमासादयेत् । अतएव सर्वतन्त्रस्वतन्त्राणांम् प्रातः स्मरणीयपूज्यपादानां विचारसम्मतिः सदासमादरणीय एवेति निश्चयं मन्ये।

अतएव महाचार्योऽपिसदा स्वकीर्यविचारकुसुमकुसुमाकरं व्युत्पत्तिवादे प्रत्यपीपदत् यत्-

नहि कस्यचिद् विपरीतलेखनं युक्तिवलांद वस्तुसिद्धौ वाधकं भवतीति प्रतिपादनात् ।

हेत्वधिकरणवृत्त्यभावस्य प्रतियोग्यसामानाधिकरणत्वेन विशेषणत्वे- प्रतियोगिनो यदधिकरणं तदविरुद्धंभिन्नंमधिकरणं यस्याभावस्य तादृशोऽभावः विवक्षणीयः- तथा च प्रतियोगिव्यधिकण- हेतुतावच्छेदक सम्बन्धावच्छिन्न हेतुतावच्छेदकावच्छिन्न हेत्वधिकरण वृत्त्यभाव प्रतियोगितानवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्न साध्यसामानाधिकरण्यं व्याप्तिलक्षणं संजातमिति। कपिसंयोगी एतद्वृक्षत्वादित्यत्राऽव्याप्ति दोषावसरः नैव समुपसर्पति । तथा च हेतुतावच्छेदकैतद्वृक्षत्वावच्छिन्नहेतुतावच्छेदक स्वरूपसम्बन्धावच्छिन्नैतादृश वृक्षत्वाधिकरणै तद् वृक्षवृत्तिर्योमूलावच्छेदेन शाखीयकपिसंयोगाभावस्तत् प्रतियोगितायाः कपिसंयोगे साध्ये विद्यमानत्वेऽपिनाव्याप्ति दोषस्यावसरः समुपसर्पति ।

अतएव तस्मिन्नेव वृक्षे तादृश शाखायां कपिसंयोगस्य वर्तमानत्वमस्ति। कपिसंयोगाभावो न प्रतियोगितव्यधिकरणः, किन्तु तादृशोदासीन भूतलीय घटाभावएव प्रतियोगिव्यधिकरणः, तादृश घटाभाव प्रतियोगितानवच्छेदकं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यत् साध्यतावच्छेदकं कपिसंयोगत्वंतदवच्छिन्न कपिसंयोग सामानाधिकरण्यं तादृशवृक्षे सत्त्वेन लक्षण संगतिः।

प्रतियोग्यसमानाधिकरण्यं च- प्रतियोगितावच्छेदकावच्छिन्ना सामानाधिकरण्यमिति वोध्यम् । तथा च- गुणकर्मान्यत्व विशिष्ट सत्तावान् जातेः एवं भूतत्त्व मूर्तत्वोमयवान् मूर्तत्वादित्यादौ नातिव्याप्ति- शंकावसरः समुपगच्छति।

एकधर्मावच्छिन्नप्रतियोगितायाःप्रतियोगिव्यक्तीनां भेदेऽपि तादृशस्यैकत्वमितिनियमात्वह्निमान् धूमादित्यादौ साध्यतावच्छेदक सम्बन्धेन प्रतियोगिवैयधिकरण्यमात्रोपादाने वह्नयभाववमादायाऽव्याप्त्य संभवात्, ततश्चातिव्याप्ति निरासस्यैव प्रयोजन मधिगम्य गुणकर्मान्र्यत्व विशिष्ट स्तातवान् जातेरित्यादिस्थले नितरामतिव्याप्तिशङ्का प्रतिषेध मुखेनैव तद्वारणस्यैवावश्यकत्वव्याजेन तर्कालंकारेण प्रत्यपादि तस्य वैफैल्यमिति कथनं साधीयः।

अन्यथा प्रतियोगिभेदेन प्रतियोगिता मेदस्य तथात्वेनापि तादृश यत्किञ्चित् प्रतियोगिताश्रयीभूत महानसीयवहन्यभावानधिकरणत्वस्य पर्वते विद्यमानत्वेनापि तादृशस्यलक्षण घटकत्वमिति विदुषां विचारपक्षएव साधीयान् ।

वहन्यादि सामान्याभावं स्वीकृत्य नाव्याप्तिशंका कलंकयङ्कं प्रक्षालयितुं प्रतियोगिव्यधिकरणस्य परिष्कारं सम्पादयेतुं प्रयतते ग्रन्थंकारः।

एतावताप्रबन्धेन प्रतियोगिव्यधिकरणस्यावश्यकत्वं प्रदर्श्य तत्परिष्कारस्यौचित्यमपि निर्देष्टुं प्रयत्मानो शिरोमणिः स्वकीय व्याख्यान कौशलेन सार्वभौमविचारपक्षंपरिच्छेतुं निर्दिशति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्येषां विचारेतु स्वरूपसम्बन्धेन भूतत्व मूर्तत्वोभयस्थले-विशिष्टत्वातिरिक्तत्वेऽपि तदुभत्यस्य स्वाभाविकगत्या प्रतियोगितव्यधिकरणस्य विशिष्टाभावस्य प्रतियोगितावच्छेदेर्कमेयत्वस्य प्रतीयमानत्वेन नातिव्याप्तिशंकावसरः प्रतीयते। यतोहि विशिष्टाभावस्य तदुभयत्वावच्छिन्नाभावानतिरेकात्।

एवं तदुमयत्वस्य हेतुसमानाधिकरणविशिष्टात्मक प्रतियोग्यसमानाधिकरणतादृशाभावप्रतियोगितावच्छेदकत्वेननातिव्याप्तिशंकावतारः समागच्छति लोचन पथे विद्यते, तथा प्रतियोगितावच्छेदकावच्छिन्नत्वानुपादाने यदभावीय यादृशप्रतियोगिताश्रयानधिकरणं हेत्वधिकरणं तदभावीय तादृश प्रतियोगितानवच्छेदकत्वस्यैव वक्तव्यतया द्वित्वावच्छिन्नाभाव प्रतियोगीति प्रतीयमानतया तादृशोभयाभावीय प्रतियोगितायास्तादृशत्वाभावेन विशिष्टाभावीय प्रतियोगितायाः लक्षणघटकत्वेन तदनवच्छेदकत्वस्योभयत्वेन तादृशत्वेन विद्यमानतयाऽतिव्याप्तिशंकायाः तदवतारात्।

समनियताभावयोरैक्येनापि तत्प्रतियोगितानांभेदात्। उभयत्वंहि नैव विशिष्टादनतिरिक्तत्वं सञ्जायत एवेति निश्चयं मन्ये। विरुद्धयोः घटपटत्वयोः सामानाधिकरणाविरहेऽपि तदुभय व्यवहार विषयातावच्छेदकस्य प्रत्यक्षतया तादृशप्रतीतेःप्रमाणसिद्धत्वेन तस्यौचित्यात्।

न च तथापि व्यासज्यवृत्तित्वेनैव तादृशोभयत्वस्य साध्यत्वेमूर्तत्वस्य व्यभिचारित्वेनापि नैवजायते। एकप्रतियोगिमत्त्वेऽपि तदुभयाभावस्य प्रतियोसिामानाधिकरण्यत्वेनापि मूर्तत्वाधिकरणेतादृशोभयाभावस्य प्रतियोगित्यधिकरणत्वाभावतया साध्याभावस्य व्यभिचारित्वात्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भूतत्वमूर्तत्वोभयवान् मूर्तत्वादित्यत्र हेतुमत्त्वाव्च्छेदेन तादृशस्थल एवाव्याप्तिरित्यतोनैतल्लक्ष्यमित्याशयेन प्रतिपादितम्।

तथात्वेऽपि उभयत्त्वेनरूपेण तत्रासत्त्वादिति। अतएव शिरोमणिः- नात्रोभयमितिप्रतीतेदुर्वारत्वात्। उभयत्वावच्छिन्नाभाववद् वृत्तित्वस्यमूर्तत्वे- सत्त्वेनस्वतःव्यभिचारेस्तु स्पष्टमेवेति। अत्रेदं किमपिचिन्त्यतेयत् प्रतियोगिव्याधिकरत्वं किमुच्यते- यदिनाम प्रतियोग्यनधिकरणवृत्तित्वं तदावृक्षःकपिसंयोगी एतद् वृक्षत्वादित्यत्रतथैवाऽव्याप्तिः समापाति, कपिसंयोगानधिकरणेगुणादौ विद्यमानस्याभावस्य वृक्षे मूलावच्छेदेन विद्यमानत्वात्। प्रतियोग्यधिकरणावृत्तित्वमुच्यते तदा संयोगीसत्त्वादित्यादाव- व्याप्तिः- साध्याधिकरणे गुणादौ वर्तमानस्य संयोगाभावस्य तदधिकरणवृत्तित्नातिव्याप्तिः। तनिरासाय प्रतियोग्यधिकरणवृत्तित्व विशिष्टस्य तादृशाभावे विवक्षणीयत्वेन नावकाशः, तथातिव्याप्तेः। अनेन प्रश्नोत्तर भावेन विज्ञायतेयदस्माभिः प्रतियोग्यनधिकरणीभूत हेत्वधिकरण-वृत्तित्व विशिष्टाभावस्य विवक्षितत्वात्। अतएव लक्षणस्वरूपमिदमेवोच्यते यत्- स्वप्रतियोग्यनधिकरणीभूत हेतुतावच्छेदकसम्बन्धान्यसम्बन्धानवच्छिन्न तादृशसम्बन्धान्भावच्छिनन प्रतियोगिताक पर्याप्त्यनुयोगितावच्छेदक रूपवृत्ति प्रतियोगिताकाभावत्वावच्छिन्नाऽऽधेयता निरूपिताधिकरणता- वन्निरूपिततवृत्तितात्वेर धर्मानवच्छिन्न वृत्तितात्वावच्छिनन प्रतियोगिताकामा- वोव्याप्तिरिति पर्यवसन्नमिति।

प्रतियोगिता बेककावत्छेदक विशिष्टाधिकरणत्वेन हेत्वधिकरणत्वं कथनीयमित्यतो द्रव्यं गुणकर्मान्यतविशिष्टसत्त्वादित्यादौ विशिष्टः- शुद्धान्नतिरिच्यत, इतिनियममाकलय्योभयोरैक्यतया शुद्धसत्ताधिकरण-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गुणादिनिष्ठाभावप्रतियोगित्वेऽपि नाव्याप्तिशंकालेशःविज्ञायते । हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वमपि हेत्वधिकरणे विशेषणं देयमेव। अन्यथा समवायेनाधिकरणतदवयवनिष्ठभाव प्रतियोगित्वेनापि वह्नेः नाव्याप्तिशंकावसरः समुपसर्यति ।

प्रतियोग्यधिकरणत्वं च प्रतियोगितावच्छेकावच्छिन्नाधिकरणत्वंवाच्यम् । तेन विशिष्टसत्तासाध्यकस्थले विशिष्टसत्ताभाव प्रतियोगिसमानाधिकरणत्वेपि नातिव्याप्तिशंकावतारः।

प्रतियोग्यनधिकरणत्वंच साध्यतावच्छेदकसम्बन्धेनज्ञातव्यम् । तथा च ज्ञानवान् सत्तादित्यादौ सत्ताधिकरणे घटे विषतया ज्ञानाधिकरणत्वेऽपि-नातिव्याप्ते शंकावसरः समागच्छेदिति विदुषां विचार सरणिः।

किंतावत् प्रतियोगिव्यधिकरणत्वम्- अथात्र प्रतियोगिव्यधिकरणत्वस्य विचारंविनानहि प्रतिपादितस्थले दोषाणां परिहारः संभवति ।

प्रतियोगिव्यधिकरणत्वं च-

प्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वंवाच्यमित्यनेनैव विशिष्ट-सत्तावान् जातेरित्यादौ जात्यात्मक हेत्वधिकरणे गुणादौवर्तमानः विशिष्ट-सत्ताऽभावः तत्प्रतियोगिनिशुद्धसत्तायाधिकरणे गुणादौ विद्यमानत्वेनापि नातिव्याप्तिः। अत्र साध्यतावच्छेदक सम्बन्धेन प्रतियोग्यनधिकरणत्वं ज्ञातव्यम् । अतएव ज्ञानवान् सत्त्वादित्यत्र सत्ताधिकरणे घटादौ विषयता सम्बन्धेनज्ञानाधारत्वेऽपि नाऽव्याप्ति दोषावकाशः सञ्जायते । तदवस्थायां वह्निमान् धूमादित्यत्र समवाय सम्बन्धेन वह्निविरहसत्तैवनातिव्याप्ति शंका जागरिता जायते।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अत्रेदं चिन्त्यते किल प्रतियोगिव्यधिकरणत्वंकिमिति समुत्थितायां जिज्ञासायामुच्यते ।

प्रतियोगितावच्छेदकावच्छिन्नस्य यस्य कस्यचित् प्रतियोगिनोऽनधिकरणत्वं किं वातत्सामान्यस्यानधिकरणत्वं विवक्ष्यते, आहोस्वित् यत्किञ्चित् प्रतियोगितावच्छेदकावच्छिन्नानधिककरणत्वं वेत्यत्र प्रथम निवेशे कपिसंयोगी एतद्वृक्षत्वादित्यत्र कपिसंयोगाभावाप्रतियोगिताव्चछेदकावच्छिन्नस्य-वृक्षावृत्तिकपिसंयोगस्याऽनधिकरणे वृक्षे सत्त्वेनाऽव्याप्ति शंकाविद्यत एवेति निश्चयं मन्ये ।

द्वितीय कल्पे प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः, स्तस्याभावस्य पूर्वक्षणवृत्तित्वस्वाभावात्मकप्रतियोगिसमानाधिकरणत्वात् ।

प्रथमकल्पेकेनाप्युपायेनाऽव्याप्तिवारिते द्वितीयकल्पे स्वाभाविकगत्या सर्वत्र प्रतियोगिव्यधिकरणाभावस्याऽप्रसिद्धत्वेनाऽसम्भवः। क्षण मेदेनविषयमेदस्य सुतरां सिद्धत्वात् । कथंतु-

वहिन्मान् धूमादित्यत्र पूर्वक्षणवृत्तित्वविशिष्टाभावात्मक प्रतियोग्यधिकरणत्वं पर्वतादेः वरीवृतीति सुतरां सत्यमाभाति, परन्तु साध्यतावच्छेदकसम्बन्धेन तादृशप्रतियोग्यनधिकरणत्वमस्त्येवेति सार्वजनीनः, तथा सत्यापि प्रतियोगिव्यधिकरणाभावाऽप्रसिद्धिरित्यतोऽव्याप्तिदोषः समुदेति निश्चयंप्रत्येमि। तावतापि घटाभावे यः वहन्यभावस्तस्यघटाभवात्मकत्वेन तादृशाभावस्य घटाभावस्याऽन्यदीयोऽपि भवति प्रतियोगीतादृशावस्थायांतदधिकरणे पर्वते प्रतियोगिव्याधिकरणाभावस्योकत्क्रमेऽप्रसिद्धत्वात् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रतियोग्यधिकरण हेत्वधिकरणाऽप्रसिद्धत्वं जायत एवेति निश्चीयते तार्किक चणैः। अत्र केचन विद्वांसस्तु इत्थं मन्यन्तेयत्- अभावाधिकरणकाभावस्य नाधिकरणात्मकत्वंसञ्जायते, किन्तु सोपि भिन्नैवाऽऽस्ते नतु तत्स्वरूपत्वं प्रवदन्ति मनीषिणः। तेषां विचार मार्गे घटाभावस्य यथा प्रतियोगी घटः नतथा वह्निः किन्तुघटएवेति निश्चयः। तथा च-घटात्मक प्रतियोग्यनधिकरणीभूत हेत्वधिकरणवृत्तित्वविशिष्ट घटाभावीय प्रतियोगितानवच्छेदकसाध्यतावच्छेदकवह्नित्वावच्छिन्न वह्निसामानाधिकरण्यस्यधूमेवर्तमानत्वेन लक्षणसमन्वयस्य समावेशः वर्तत एवेतिनिश्चयतया नावकाशः कस्यापि दोषस्येति वक्तिचेत् तदा समाकथिते द्वितीयकल्पे नितरामव्याप्तिदोष प्रसारस्तु भवेदेवेति तार्किकाणां विचारसरणिः।

कथं तर्हि द्वतीयकल्पे नैसर्गिक गत्याअव्याप्तिदोषः संभवति। तद्यथा-

ह्रदः धूमाभाववान् वहन्यमावादित्यत्र हेत्वधिकरणे जल ह्रदे तथाकथितरीत्य तृतीयक्षण वृत्तित्व विशिष्ट घटाभावस्य प्रतियोगिनः प्रथमक्षणवृत्तित्व विशिष्ट घटाभावाभावः तस्य साध्यतावच्छेदक सम्बन्धेन अधिकरणभेदेनतदमिन्नतया हत्वधिकरणत्वेनतस्यैवजायमानतया समागताऽव्याप्तिशंकां परिच्छेत्तुं तस्य हेताव्याप्तिरित्यतो पूर्वोक्त निवेशस्य सार्थक्यमस्त्येवेति निश्चयः। अतएव तृतीयकल्पएवन्याय्यः। प्रतियोगितावच्छेदकावच्छिन्नामधिकरणत्वं न्याय्यः। तेन प्रतियोगिनिघटे पूर्वक्षणवृत्तित्व विशिष्टे वर्तमानपूर्वक्षणवृत्तित्वविशिष्टावेवतत्रभवतः, तादृश धमीवच्छिन्नहेत्वधिकणरवृत्तित्वविशिष्टेवर्तमनै विद्येते यं कमपि धर्ममादाय-तदवच्छिन्नघटानाधिकरणहेत्वधिकरणवृत्तिघटाभाव प्रतियोगितानवच्छेदकधूमाभावत्वावच्छिन्नधूमाभाव समानानाधिकरण्यस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वह्न्यभावेसत्त्वानलक्ष्ये तल्लक्षण समन्वयोवोध्यः। तृतीयेतु कपिसंयोगाभाववान् आत्मत्वादित्यत्राऽव्याप्तिदोषस्यंसाधुत्वभस्त्येवेति निश्चयः। आत्मवृत्तित्व-विशिष्टस्य कपिसंयोगाभावाभावस्य गुणत्वस्वरूपत्वेन तत् प्रतियोगिता-वच्छेदकं गुणसामान्यभावत्वं तदवच्छिन्नानधिकरणे हेत्वधिकरणे तत्र वृत्तित्वादव्याप्तिरिति चेन्मैवम् ।

यादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकरणे हेतुमतस्तादृश प्रतियोगितानवच्छेदकत्वं विवक्षणीयमित्यदोषः। एतावता परिष्कारेणे-ल्लिखितस्थलपूर्वोक्तदोषाणाभवकाशोनैव सम्पद्यते । कथंतु यद्धभावच्छिन्न-प्रतियोगितायाःअनधिकरणं यत् हेत्वधिकरणं सञ्जायते तादृश-हेत्वधिकाणवृत्यभावीय प्रतियोगितानवच्छेदकं यादृश साध्यतावच्छेदकं तादृश साध्यतावच्छेदकावच्छिन्न साध्य सामानाधिकरण्यं व्याप्तिलक्षणं विवक्षणीयम् । कपिसंयोगाभाववान् आत्मत्वादित्यादौ नाव्याप्तिशंकावसरः प्रतिभाति। गुणसामान्याभावत्वावच्छिन्नानधिकरणे वृत्यभावीय प्रतियोगिताऽनवच्छेदकंयत् साध्यतावच्छेदकं कपिसंयोगाभावत्वं तादृशसाध्यतावच्छेदकावच्छिन्न साध्यसामानाधिकरण्यस्यहेतौ जायमान तया लक्षण समन्वयोऽवसेयः। एवं क्रमेण तत्तत्साध्यकस्थले तयारीत्यालक्षण संगमनप्रकारोऽवगन्त्यव्यः। अमुना प्रकारेणोल्लिखितस्थले तत्तत्प्रतियोगिता-श्रयपूर्वक्षणवृत्तित्वविशिष्टघटाभावीयप्रतियोगित्वं चाङ्गीकृत्ययादृश प्रतियोगित्वपदेनोपपाद्य लक्षणसंगतिः विधेयाः।

लक्षण प्रकारस्त्वित्थं विज्ञातव्यः-

यादृश प्रतियोगितावच्छेदकावच्छिन्नधिकरण वृत्तित्वविशिष्टधर्मावच्छिन्न प्रतियोगिताकाभावीय प्रतियोगितानवच्छेदक विशिष्ट साध्यतावच्छेदकावच्छिन्न

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

साध्यसामानाधिकरण्यं व्याप्ति लक्षणं पर्यवसन्नमित्यवसेयम् ।

किंवा साध्यसमनियतप्रतियोगिताविशिष्टसाध्यसामानाधिकरण्यं व्याप्तिरितिविज्ञातव्यमेवेति पर्यवसीयते ।

वैशिष्टस्यश्च स्वज्ञामानाधिकरण्य स्वावच्छेदकसम्बन्धावच्छिन्नत्व स्वानवचछेदकानवच्छिन्नत्व, स्ववृत्तित्वैतच्चतुष्टय सम्बन्धेन।

एवञ्च कालो घटवान् महाकालत्वादित्यत्र हेत्वधिकरणस्य महाकालस्य जगदाधारत्वेन समस्ताभावस्यसाध्यतावच्छेदकसम्बन्धेन प्रतियोग्य-धिकरणत्वेन समापततिनैसर्गिकगत्याऽव्याप्तिः। तन्निरायाय महाकालभेद-विशिष्ट घटाभावः प्रतियोगिव्यधिकरणः संभवति। महाकाले नास्ति महाकाल भेदत्वं तेन नावकाशः दोषाणाम् । घटाघारत्वेनापि महाकाल भेदविशिष्ट घटानाधारत्वात् ।

वास्तविकंतु—

प्रतियोगितावच्छेदक सम्बन्धेन प्रतियोग्यनधिकाणीभूत हेत्वधिकरण-वृत्यभाव प्रतियोगिता सामान्ये यत् सम्बन्धावच्छिन्नत्व यद्धर्मावच्छिन्न-त्वोभयाभावस्तेन सम्बन्धेन तद्धर्मावच्छिन्न हेतुव्यापक साध्यसामानाधिकरण्यं व्याप्तिरितिलक्षणं सञ्जातमू । लक्षण समन्यव प्रकारस्त्वित्त्थं वोध्यम्-

महाकाले हेत्वधिकरणे महाकालवृत्तित्वविशिष्टघटाभावीय प्रतियोगितायां कालिकसम्बन्धावच्छिन्नत्वाभावात् अतोभयाभावसत्त्वेन तेनोक्तस्थले नाव्याप्तिशंकालेशः।

अत्र प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणीभूत

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हेत्वधिकरणवृत्तित्वविशिष्टप्रतियोगितासामान्ये यद्धर्भावच्छिन्नत्वशिष्टि हेतुव्यापकतन्निष्टसाध्यसामानाधिकरण्यंव्याप्तिरितिलक्षण शरीरे सति वह्निमान् धूमादित्यत्र समवायसम्बन्धावच्छिन्न प्रतियोगिताकाभावमादायाऽव्याप्तिः समापतत्येवातो यत्सम्बन्धावच्छिन्नत्व पदोपादानम् । तथा निवेशेसञ्जाते यत्सम्बन्धावच्छिन्नविरहादेव दोषावकाशः नावलोक्यते ।

प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यनाधिकरणांभूत हेत्वधिकरण वृत्यभावीयप्रतियोगितासामान्येयत्सम्बन्धावच्छिन्नत्वाभावस्तत् सम्बन्धावच्छिन्नहेतुव्यापकसाध्य सामानाधिकरण्यं व्याप्तिः। तथा च—

पर्वतोवह्निमान् धूमादित्यत्र हेत्वधिकरणे संयोगसम्बन्धावच्छिन्न प्रतियोगिता सामान्येसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वसत्त्वेनतादृशाभाव विरहादेव तत्र व्यापकत्वासत्त्वेनाव्याप्तिशंकावतार;। तदुपादाने च घटनिष्ठ-प्रतियोगितायां तदसत्त्वेन संयोगेनवह्निव्यापकसाध्य सामानाधिकरण्यस्य विद्यमानत्वेन लक्षणंसंगतिः।

एवञ्च कालोघटवान् कालपरिमाणादित्यत्र संयोगसम्बन्धावच्छिन्न प्रतियोगिताकाभावमादाय तदृश प्रतियोगिता सामान्ये कालिकासम्बन्धा-वच्छिन्नत्वस्याविद्यमानतयातत्प्रयुक्तोभयाभाव सत्त्वात् कालिक सम्बन्धेनघटत्व व्यापकत्व लाभात् लक्षण समन्वयः। पर्वतोधूमवान् वह्नेरित्यादौ तथाति व्याप्तिनिरासाय सामान्य पदोपादानं परमावश्यकं विभाति। तथा सति धूम निष्ठप्रतियोगितायां तादृशोभयाभावस्याविद्यमानत्वात् व्यापकत्वाभावतया नातिव्याप्ति शंकालेशः। तेन तादृश प्रतियोगितात्व- व्यापकत्वविशिष्टोभया भावस्यैव धटितत्त्वेनैव दोषावकाशशंकानैव युक्ति- युक्ता प्रतिभाति। तदुभयोपदस्य सार्थक्य माभाति। सम्भवति लघौघर्मे तावदवच्छेदकत्वे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सम्भवतिसति गुरुत्वघटितस्य तदवच्छेदकत्वं नैव- स्वीकुरुते। अतएव प्रमेयवह्निमान् धूमादित्यत्र प्रमेयवह्नित्वावच्छिन्नत्वस्य गौरव ग्रस्तत्वेन प्रमेंयवह्नित्वावच्छिन्नत्वस्याऽप्रसिद्धतया तदुभयाभावाऽ-प्रसिद्धया तत्रत्यहेता वाव्याप्तिः। किन्तु कम्बुग्रीवादिमान्नास्तीति प्रतीत्या कम्बुग्रीवादिमत्त्वावच्छिन्न प्रतियोगितायाः तादृशविषयीकरणत्वेन तत्प्रतीत्या गुरुधर्मस्याव्वछेदक त्वंस्वीकुतेश्त्यतोन नावकाशः तादृशदोषस्येति विदुषा विचार सरणिः।

अत्रायं विशेषस्त्वित्त्थं वरीवृतीति यत् -लक्षणघटकव्यापकत्वस्य द्वौविध्यं वरीवृतीति यत् एकमत्यन्ताभाव घटितम् तदपरं मेदघटितम् । तत्राद्यंतु स्वसमानाधिकरणात्यन्ताभाव प्रतियोगितावच्छेदकधर्मवत्त्वम् । तदपरंतु स्वसमानाधिकरणवृतिभेदप्रतियोगिनववच्छेदकत्वम् अत्रेदं व्याप्तिलक्षणमत्यन्ताभावघटितत्वमेव स्वीकुरते। तथाचात्यन्ता-भावघटितलक्षणेत्वित्त्थं व्याप्तिस्वरूपमस्ति यत् - प्रतियोगि व्याधिकरण हेतुसमानाधिकरणात्यन्ताभाव प्रतियोगितानवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्न साध्यसामानाधिकरण्यंव्याप्तिः। अत्रावच्छेदकत्वं द्विविधम् । तत्राद्यंस्वरूप सम्बन्धविशेषः, तदभिन्नंतु-अनतिरिवृत्तित्वं यदभाव प्रतियोगितावच्छेदकत्वनिष्ठविशेष्यत्वसम्बन्धावच्छिन्नावच्छेदकताक प्रतियोगिताभेदविशिष्टाभावकूटवान् विद्यते सोहि तदभावीयप्रतियोगि-तानिरूपितस्वरूप सम्बन्धावच्छेदकतावानित्याकारिका ज्ञातव्या विदृद्धिः। स्वरूप सम्बन्धावच्छेदकत्वस्वरूपवादिना ज्ञानमेदेन विषयता भेदं स्वीकृत्य वह्न्यभाववान् हृद इत्याकारक निश्चयीय प्रतिबन्धकतावच्छेदकता वह्न्यभावद्येक विषयतायां स्वीक्रियते ।

अनतिरिक्तवृत्तित्व विचारानुसारेण- प्रतियोगित्व निष्ठतत्तदव्यक्तित्वा-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वच्छिन्नप्रतियोगिताकः। किंवा प्रतियोगितात्ववच्छिन्न प्रतियोगिताकाभाव विशेषाः अन्येषां विचारे त्वित्त्थंज्ञातव्यम् - यत् अन्यूनानतिरिक्तवृत्तित्वंवेति स्वीकर्तव्यम् । एवं प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वंवेति विज्ञातव्यमेव । अन्यूनानतिरिक्तवृत्तित्वञ्च-

प्रतियोगित्वव्यापकत्वेसति प्रतियोगित्वव्याप्यत्वम् । एवञ्च-प्रतियोगितावच्छेदकावच्छिन्नाभाववन्निरूपित वृत्तितानवच्छेदकत्वंवेति नैसर्गिकरूपेणावगन्तव्यम् । तथाच यद्धर्मविशिष्ट सम्बन्धि निष्ठाभाव प्रतियोगितानवच्छेदकम् ।

परन्तु कम्बुग्रीवादिमान्नास्तीति प्रतीतिप्रत्ययवलादेव कम्बुग्रीवादिमत्त्वात्मक गुरुधर्मस्यापि प्रतियोगितावच्छेदकत्वेनाति प्रसंगाद्यनापादके लघौधर्मे सम्भवतिसति गुरौ तदभावादित्यस्याऽप्रयोजकत्वेनापि स्वरूपसम्बन्धस्या-वच्छेदकत्वमपि तर्कसम्भतत्वेन लाघवगौरवविचारपक्षमवलम्ब्यगौरव ग्रस्तुत्वेनार्थ समाज ग्रस्ततया तस्यैवाच्छेदककत्वमिति साधीयान्विचार-पन्थाः।

सिद्धान्त तत्त्वव्यख्यान चतुराणां वासुदेवसार्वभौमाऽऽचार्याणां विचार पक्षमाकलय्य शिरोमणिः प्रतिषेध मुखेन तावदित्त्थंब्रूते यत् एकविशिष्टा-परत्वोभयत्वमेवस्वीकृत्य प्रतियोगिव्यधिकरणस्य सौलम्येन नास्तिकोऽपि दोषावकाशः समभ्युपैति, वैशिष्ट्यञ्च केवलादन्यंत्वेनेति वोध्यम् । तादृशत्वेन प्रतियोगिव्यधिकरणाभावः सुप्रसिद्ध एवेति सत्यमाभाति। एवञ्च भूतत्त्वमूर्तत्वोभयाभावः सुप्रसिद्धएेति निश्चयः।

तथा चोभयत्वस्यैतादृशविशिष्ट भिन्नत्वेनापिनैसर्गिकरीत्या

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितावच्छेदकमेवोभयत्वेन नाति व्याप्तिशंकावतार: समवलोक्यते, विशिष्टाभावस्योभयत्वावच्छिन्नत्वादिति साधीयान् पन्था: प्रतिभाति। तादृशोभयत्वस्य विशिष्टत्वेनोतिरिक्त त्वादितिवास्तविकमेवेति। तदुभयत्वावच्छिन्नाभावस्य वैशिष्ट्स्या-भावत्वावच्छिन्नत्व मेवास्तीत्यतो नावकाश: दोषाणाम् ।

घटपरत्वोभयत्वस्य तादृशोभयत्वेन तादृशाभावस्य प्रत्यक्षा विरोधित्वात् । नचातिरिक्तस्थले तादृशोभयाभावस्य विशिष्टाभाव भिन्नत्वेऽपि भूतत्व विशिष्ट मूर्तत्वाभावस्य तादृशोभयत्वावच्छिन्नाभावस्य प्रतियोगिताकत्वमेवास्तित्वं वर्तत एवेति निश्चिनोभि। सामनैयत्व-विशिष्टाभावयोर्लघुत्वेनैकत्वमस्त्येवेति कोपि तार्किक चण:। विशिष्टा-भावोभयाभावयो रैक्येनापि यद्धर्मावच्छिन्न प्रतियोगिताश्रयानधिकरणत्वं विशिष्ट हेत्वधिकरणस्य तादृश प्रतियोगितानवच्छेदकत्वस्य भूतत्व मूर्तत्वोभयत्वे नितरामनस त्वेनातिव्याप्ति दोषस्य संक्रान्तत्वमस्त्येवेति निश्चयं प्रत्येमि।

एवञ्च तादृशयो:विरुद्धत्वेन प्रतीयमानयो: सामानाधिकरण्येन तथात्वेय: तदुभयोसर्वथातिरिक्तमेवेस्ति तार्किक चारणांनां विचारसरणि:। विरुद्धाविरुद्धत्वेन भ्रमावस्थायामपि तादृशोभयत्वस्य प्रत्ययत्वेन प्रतिपादनात्।

भूतत्व मूतत्वोभयवान् मूर्तत्वादित्यत्र लक्ष्यत्वेनानुभवतयाऽव्याप्ति शङ्कापनयनप्रयासोनितरामनुचित एवेति तर्कालङ्कराणा व्याख्यान पन्था: प्रतिभाति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तथाचोमयत्वस्य मूर्तत्वस्य चेतसि विद्यमानत्वेऽपिहेतुमत्त्वावच्छेदेन साध्यतावच्छेदकावच्छिन्नवस्थले नाव्याप्ति शंकावतारः। भूतत्व भूर्तत्वोमयत्वेन रूपेणतत्राविद्यमानतया नैवास्ते दोष शंकाजागरिता विदुषां चेतसि सञ्जायते ।

नात्रोभय मिति प्रतीतेः दुर्वारत्वेन प्रतीयमानत्वादिति समभ्युपैत्ति। मणिसूत्रे प्रतियोगिताव्चछेदकावच्छिन्नत्वपदस्यसार्थक्यमस्त्येवेति चेतसि निधाय तत्प्रयोजनं वर्ततएवेति निश्चिनोमि। एतेन सिद्धयति तस्यावश्यकत्वम् । तदनुपादाने- यदभावीय यादृश प्रतियोगिताश्रयानधिकरणं हेत्वधिकरणं तादृशाभावीय प्रतियोगितानव्चछेदकं यत् साध्यतावच्छेदकं तदवच्छिन्न साध्य सामानाधिकरण्यं व्याप्तिरिति साधीयान विचार पक्षः प्रतिभाति।

किन्त्वत्रायमेकोद्वानविति प्रतीत्यनुरोधवशादेव द्वित्वावच्छिन्न प्रतियोगिताकामावीय प्रतियोगिताया, प्रत्येकस्मिन् विद्यमानत्वेनोभयाभावीय प्रतियोगितायास्तादृशाभावत्वेन विशिष्टाभावीय प्रतियोगिताया-स्तादृशाभावत्वेन विशिष्टाभावीय प्रतियोगितायाः तादृशलक्षण घटकत्वे तदनवच्छेदकैकत्वस्यैव विवक्षणीयत्वेनापि सुतरामतिव्याप्तिशंका ग्रस्तत्वेन तन्निराकरणेपायस्यावश्यमेवौचौत्यमेव ग्रन्थकारस्य प्रतिपादनमेव साधीयः संभवति। समनियताभावयारैक्येनापि तादृशप्रतियोगितानांभेदस्य ज्ञायमानत्वेनापि तस्यैव, प्रतीयमानत्वमेवेतिसत्यमाभाति। अतएवोभयत्वं हि नैव विशिष्टादनतिरिक्तत्वमिति स्वाभाविकमेवेति सत्यमाभाति।

अथात्रापि व्यासज्यवृत्तित्वेनापि तस्य साध्यत्वे भूर्तत्वस्य व्यभिचारित्वेनापि नतस्य संभवतिएकस्य तत्प्रतियोगित्वेनापि तदुभयाभावस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रतियोगिव्यधिकरणत्वाभावात मूतत्वाधिकरणे चतेसि तदुभया भावस्य नैव प्रतियोगिव्यधिकरणत्वं संगच्छते । अतएव प्रतियोगितावच्छेदकावच्छिन्न वैयधिकरण्य पर्यन्तानुधावनमपि सर्वथा सार्थक्यं प्रतिभाति।

एवं च प्रतियोग्यसामानाधिकरण्यस्याऽभावविशेषणत्वे मणि प्रतिपादित लक्षणेऽत्यन्त पदस्यावश्यकत्वमस्ति नवेतिविचार दशायां व्याचष्टे शिरोमणि: यत्-

लक्षण घटकात्यन्तपदं किमर्थमित्याशकायां निर्वक्तियत् -

अत्यन्तपदञ्चात्रात्यन्ताभावत्वनिरूपक प्रतियोग्यसामानाधिकरण्यस्यात्यन्ताभावत्वनिरूपक प्रतियोगितायाश्चलाभार्थ भेवेति प्रत्तमिति ग्रन्थकारेणति न्यगादि । तेन वह्न्यादि भेदमादायाऽव्यात्पिनिरासाय तदुपादानस्यौचित्यं परमावश्यकमाभाति। अन्यथाऽव्याप्तिशंकाऽपरिहार्या भवेदेवेति निश्चयं मन्ये। अतएवात्यन्ताभावत्वनिरूपकं यत् तत् प्रतियोगित्वाश्रय वैयधिकरण्य पदोपादानस्य सुतरां सार्थक्यं वरीवर्तीति निश्चयं मन्ये। तद वैपरीत्ये प्रतियोगित्यधिकरणाभावस्य सर्वस्याभावस्य स्वसमानाधिकरणाभावान्तर भिन्नत्वेन तादृश भेदस्य स्वस्वरूपानतिरिक्तत्वेन प्रतियोग्यसामानाधिकरण्यस्य दौर्लभ्यतया स्वाभाविकत्वेन तत्र लक्षणसंगमनप्रकारोपि दुर्लभएवेति सम्पद्यते । तेन तद् विशेषणस्योल्लेख: नैसर्गिक एवेति सत्त्यभाभाति।

एवञ्चानवस्थाभयेन प्रतियोग्यसामानाधिकरण हेतुसमानाधिकरणात्यन्ताभावेत्यत्रात्यन्तपदं नितरामावश्यकमावश्यकमेवेति समुचितमेवेति सत्यमा भाति। हेतुसमानाधिकरणाभावस्यैव प्रतिपादने तु अनवस्थाभयेन तादृशा भावस्य दौर्लभ्यमेवेति ध्रुवम् । कथंतु-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

घटाभावस्यभिन्नत्वे तदभेदस्यापि भिन्नत्वंभवेदेव। एवं तद् भेदस्यापि प्रतिपादितरीत्याऽनवस्थापात:। स्वात्मकस्य भेदस्य योहि प्रतियोगी जायते अभावन्तरम्। तत्र स्वस्थ घटाभावस्य भेदोस्ति तदभावात्मकाधिकरणाका-भावस्य तदधिकरणास्वरूपया तस्य योहि प्रतियोगीपराभावात्मक: तत्समानाधिकरणेत्वेन तस्य प्रतियोगी पराभावोऽपि विद्यतएवेति निश्चय:। परिस्थित्याभस्यां पटभावस्य प्रतियोगी यथा परतथा घएभावोपि तेन यटाभावात्मक प्रतियोगि समानाधिकरणत्वेन प्रतीयग्यधिकरणाभावस्या प्रसिद्धतया शिरोमणि: स्वकीयग्रन्थे अत्न्ताभावत्व निरूपकत्व प्रवेश: समुचित एवेति प्रतिभाति। तेन तादृशाभाववृत्यभावस्याऽभावधि-करणत्वाभावेन नहि तादृशत्वमिति तात्पर्यभाभाति।

एवं वहन्यभावसमानाधिकरणं यदभावान्तरं वपीवर्ति तादृशा भास्य तदभावा भिन्नत्वेन वहन्य भावाभावस्य प्रतियोगि घटाभावेपिसंजात एवेति निश्चयं वेवेद्धि।

किन्तु वहन्यभावाभावस्य प्रतियोगि तुल्ययुत्त्याघटाभावोपि संजातएवेति प्रतीतिसिद्ध:। अतएव भाववृत्तविशिष्ट भदेस्याभावानधिकरणात्मकत्वेऽपि तावदाभाव प्रतियोगिकत्वादेवतदधिकरणस्वरूपत्वं भवत्येवेति निश्चयं मनुतेशिरोमणि:।

अन्यथा तद्वैपरीत्ये तादृशाभाव प्रतियोगिकविशिष्टाभावस्य तदधिकरणस्वरूपत्वे जलहदवृत्तित्वविशिष्ट घटाभावस्य ह्रदे नास्तीति प्रत्ययापत्ते:। विशिष्टाभावस्य विशिष्टप्रतियोगिकत्वात्। किंवा विशिष्टाभावस्याधिकरणात्मकत्वेघटाभावस्यापि घटाभावप्रतियोगिक-त्वापत्ति:- सुस्थिरैवेति निश्चय:।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनेन हेतुनाविज्ञायतेऽस्माभिः यत् -घटाभावप्रतियोगिक पूर्वक्षणवृत्ति विशिष्टतादृशाभावभादाय तदात्मकत्वेन घटाभावेऽपिवर्तमानत्वात् ।

तेन तर्कालंकारोपि-

स्वसमानाधिकरणा भावान्तर भिन्नत्वेनाभावमात्राधिकरणकाभाव-प्रतियोगिकरणस्यापि विशिष्टाभावाधिकरणनात्मकत्वेपि तदधिकरण भिन्नत्वं मन्यत एवेति निश्चयः।

साध्यताघटकसम्बन्धेन प्रतियोग्यसामानाधिकरणस्य विवक्षणीयत्वे वह्निमान् धूमादित्यत्र घटाभावेऽपि विद्यमानत्वेन कदाचिदपि तावदप्रसिद्धजन्य दोषः नैव समागच्छति दृष्टिपथे कोषाभित्यवगच्छामि।

अतएव शिरोमणिः स्वरूपसम्बन्धेन तदभावस्य साध्यत्वे तदप्रसिद्धि दोषं विहाय दौर्लम्य मेवाऽगादीत् तादृशं वचन विलासमिति।

वृद्धानां विचारेतु- अत्यन्ताभावत्वनि निरूपक प्रतियोगिता-लाभायात्यन्तपदानुपादाने भाव साध्यकस्थले वह्निमान् धूमादित्यादिस्थले सदाव्याप्तिः स्यादेवेति किमर्थं स्थानान्तरानुधावनमितिसत्यं वचनं प्रतिभाति। किन्तु घटाभावादेरपि घटाभाववद् भिन्न भेदरूपत्वेन तादृश प्रतिपादने वह्नेरपि स्वरूप संसर्गेण तादृशत्वकथनात् तद्भेदेन प्रतिपादनत्वविरहात् । सत्यभेतत् । परन्तु तद्भेद प्रतियोगिक स्वरूप सम्बन्धेन तद्भिन्नत्व प्रतिपादने तद्भिन्न प्रतियोगितावच्छेदकत्वस्यांगीकारत्वकथनेन वह्नित्वस्यैव स्वीकारात् । तस्मादेव तादृश वचन स्यैवाम्युपगमत्वेन कथनं तर्कालंकाराणां विचार यन्थाः।

घटाभाववद् भिन्न भेदाम्युपगमे स्वाभाविक गत्याऽव्याव्याप्ति संजाते

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वृत्यनियामक सम्बन्धस्य प्रतियोगितावच्छेदकत्वाङ्गीकारादेव तादृश पक्षस्यौचित्य प्रावल्यतया तत् सम्भवात् ।

तात्पर्यभिदमाधृत्य स्थलान्तरानुधावनस्यैचित्यं स्वीकुरुते शिरोमणिः। तथात्व स्वीकारेऽपि घटाभाववह्नित्वोभयाभाव भिन्नं स्वीकृत्य तदादृशस्थले नैसर्गिक रीत्याऽव्याप्तिदोषप्रदानस्यौचित्यं स्वाभाविकमेवेतिवृद्धतार्किकाणां विचारः युक्तियुक्त एवेति साधीमान् विचारः प्रतिभाति। अथापि-

प्रतियोगितावच्छेदकतायां साध्यतावच्छेदकता घटकसम्बन्धावच्छिन्नत्व प्रवेशेनैव तन्निराकर्तुं शक्यम् । किन्तु तावतावचन विन्यासेन घटाभावचत्त्वस्य स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताक संयोगेन साध्यत्वे युक्तयऽऽव्याप्तिदोषस्य सुतरां सिद्धत्वमिति निर्विवादसत्यं विभाति।

स्वरूपेण साध्यत्वस्य तेनैव संसर्गेण साध्यतावच्छेदकत्वमिति-तात्पर्यमाघृत्य तत्कथनमिति विज्ञातव्यमितिशिरोमणेराशयः प्रतिभाति।

अथवा केचन वृद्धास्तु यक्षमिमं व्याख्याय पराभाववद्भिन्न भेदस्य भावप्रतियोगिकत्व प्रतिपादनात् नास्ति घटाभावात्मकत्व व्याख्यानस्यौचित्य प्रदर्शन परकत्वमेवेति तेषामुद्देश्यत्वभस्तीति प्राच्र्य विदुषां राद्धान्त इति निश्चयं प्रत्येमि ।

अतएव अत्यन्तपदस्य सार्थक्यं तत्प्रदर्शनद्वारकत्वेनैव स्वभेदस्य प्रतियोगित्वात् अभाव साध्यक स्थलेऽव्याप्ति दोष प्रदर्शन परकत्वमित्यभि प्रायेण प्रदर्शितवान् दीधितिकारः।

परन्तु तत्रापि सम्प्रदायविदां विचार पक्षभालक्ष्य प्रस्तुत सन्दर्भ सार वचनं सोदारतया सादरमब्रीत् ग्रन्थविचारसार पद्धतिः। अतएव

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तर्कालंकारोपितमेव पक्षं समालोचनदर्शितरीत्या वचन मिदमव्याहार्षीत्। इत्यनेन दुर्लभ शब्दोपि जगदीश तर्कालंकारेण समुदाहृतः।

अथ सम्प्रदाय इत्यस्वरसेन तत्र वीजमपि चिन्त्यमेव, तथहि समेषां गेतुसमानाधिकरणात्यन्ताभावानामत्यन्ताभावत्व निरूपकत्ववैशिष्टस्य प्रतिपादनवलेनैव पूर्वक्षणादिवृत्तित्वविशिष्ट स्वाभावात्मकतया तेन समं सामानाधिकरण्य प्रावल्येनाभाव साध्यकस्थले स्वाभाविकतयाऽव्याप्तिः स्थादेवोति सत्यभाभाति।

किन्तु- यादृश प्रतियोगितावच्छेदक विशिष्टानधिकरणं हेत्वधिकरणं विद्यते तादृशप्रतियोगितानवच्छेदकत्वप्रवेशेनैव पूर्वोक्तदोषाणां निराकरणं भवेदेवेति किमर्थमत्यन्त पदप्रवेशः मूले विहित इति नैव वक्तव्यं केनापि।

घटाभाव भेदनिरूपित प्रतियोगितायां साध्यतावच्छेदक सम्बन्धावच्छिन्नत्व विरह दशायां दोषाक्रान्तत्वादेव तन्निरास मार्गः नैव कल्याणमार्गः लोचन पथे पथिकायते ।

तादात्म्य सम्बन्धेन घटसाध्यक घटत्वहेतौ तादात्म्य सम्बन्धेन तादृशाभावस्यौचित्यतया तमेवाङ्गीकृत्य सर्वथाऽव्याप्ति प्रसंगस्य तादवस्थ्यमेवेतिसत्यं प्रतिभाति। तत्त्वविदां विदुषां विचारमधि-कृभेदत्वस्याऽखण्डोपाधित्वस्वीकारकृतां स्वनिरूपित प्रतियोगितायां साध्यतावच्छेदक सम्बन्धातिरिक्त सम्बन्धानवच्छिन्नत्वस्य निवेशेनैव नावकाशः-दोषाणामिति युक्तियुक्तं समुभ्युयैति। तथा च कत मत्यन्तपदस्य वैयर्थ्यमिति कथनं प्रामाण्य रसिकानांकृते नैव समुपयुक्तोभवति।

एं घटप्रतियोगिक संयोगसम्बन्धेन किंवा वह्नि प्रतियोगिक संयोगेन

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

साध्यत्वे वह्नेः नितराभव्यापतिदोषः समा पततव्येवेति सत्यम् ।

किन्तु-

साध्यतावच्छेदक सम्बन्धातिरिक्तसम्बन्धावच्छिन्नत्वसाध्यतावच्छेदक व्यापकत्वोभयाभावस्य प्रतियोगितायां प्रवेशेनैव पूर्वोक्तदोषस्य प्रतियोगितायां प्रवेशेनैव पूर्वोक्तदोषस्य नावकाशः दृष्टिपथे समभ्युपैति।

परन्तु चिन्त्यं वचः तदित्त्थं यत्-

तथोपादानेऽपि कालिक सम्बन्धेन घटसाध्यकस्थले तत्क्रियात्व हेतौ समापतति नैसर्गिकगत्या नितरामव्याप्तिदोषः स्यादेवेति वास्तविकं वचः नितरांप्रतिभाति ।

कथं तु पूर्वाभावाधिकरणकाभावस्य कालिकेन तादृशाभावस्य पटाभावस्वरूपतया तन्निरूपितसाध्यतावच्छेदकी भूत कालिकसम्बन्धा वच्छिन्नप्रतियोगितावच्छेदक पटाभावत्वावच्छिन्नाधिकरणतायाः विद्यमानत्वात् प्रतियोगि व्यधिकरणाभावस्याऽप्रसिद्धत्वादिति व्याख्यानं समुपवर्णयन्तितर्क रसिकाः।

एवञ्च घटत्वाभावाभाववान् गगनत्वादित्यादौ तथातिव्याप्तिवारण-स्यावश्यकत्वेन साध्यताघटक सम्बन्धेन साध्यवत्ताबुद्धि प्रतिबन्धक-तावच्छेदक सम्बन्धेन हेतुसामानाधिकरण्यस्याऽप्रसिद्धयाद्रव्यत्वाभाववान् जातित्वादित्यादावव्याप्तिप्रदोषस्य ध्रौव्यतयापि-

साध्यतावच्छेदक सम्बन्धेन स्वप्रतियोगिभत्त्ववुद्धेः विषय विधया प्रतिबन्धकतावच्छेदकसम्बन्धेन हेत्वधिकरणवृत्तित्वाभावस्य विवक्षणतया नास्तिदोषावकाशः संभवति यद्यपि सत्यं वचः प्रतिभाति। तथापि द्रव्यत्वाभाववान् जातित्वादित्यादौ विशेषणताविशेष सम्बन्धेन

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जातित्वस्वरूपाभावस्य प्रसिद्धत्वेन नावकाशः दोषाणां सञ्जायत इति विदुषां विचार पक्षः दृष्टिपथे समुद्भवति ।

वास्तविकंतु- साध्यतावच्छेदक सम्बन्धेन स्वाधिकरणवृत्त्यभावस्य तत्सम्बन्धेन तदवच्छिन्न प्रतियोगिताकाभावस्यैव प्रवेशः साधीयान् विचारः ज्यायान् । समवायादि सम्बन्धेनात्मकत्साध्यक ज्ञानवत्त्वादिहेतौ समवायेन तदधिकरणे तेनैव सम्बन्धेन तादृशाभावस्य येनकेनापि सम्बन्धसामान्येन तत्राप्यवृत्तित्वेन तादृश साध्यके नोपादानस्यावसरः समुचितः प्रतिभाति ।

अतएव तादृशसाध्यकस्थले नोपादेय मिति सत्यं विभाति। सत्तावान् जातेरित्यादौतु तदुपादानस्यौचित्यं नितरां समादरयोग्यमेवेति ज्यामान् यक्षः समुद्भवति । सत्ताधिकरणे स्यन्दादौ समवायःसम्बन्धावच्छिन्न सत्ताभावस्य कालिकादिसम्बन्धेन तत्रवृत्तित्व स्यौचित्यतया तादृशाभावस्य निरुक्त वृत्तित्व विरह एव सत्तादेः प्रतीयमानस्यौचित्यं विभाति।

व्याप्यवृत्तित्वघटक पदार्थस्य स्वाधिकरणवृत्तित्वस्य सम्बन्धसामान्यसम्मतत्त्वेन तादृश प्रवेशस्य समादरणीयतया तथोपादानमेव समुचितं विभाति।

अयमात्माज्ञानादित्यादावपि तदधिकरणे आत्मनि समान-कालीनत्वादिसम्बन्धेनात्मत्वाभावस्य सम्बन्धित्वेन व्याप्यवृत्तिनुप-पत्त्योत्वधिकरणवृत्तित्वस्यापि सम्बन्धि भिन्नत्वेवापि सोपि समादरणीयत्वं भजते । अन्यथा ज्ञानाधिकरणे आत्मनि समानकालीनत्व सम्बन्धे-नात्मत्वाभावभादायाव्याप्यतपत्तिः ध्रौव्येतितर्क रसिकानां वृद्धानां विचारः सर्वसम्मत एवेति प्रतिभाति। तात्पर्यमिदभवलम्बव्य व्याप्यवृत्तेरित्युक्तं साधीयः वचनं सर्वथेपि युक्ति युक्तं विभाति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तदापि च सम्बन्ध सामान्यावच्छिन्नत्वभवगन्तुं वृत्तितायां प्रवेशः तस्यैव परमावश्यक एवेति तार्किक चणः।

वास्तविकं तु- व्याप्यवृत्ति साध्यकेऽपि प्रतियोगि वैयधिकरण्यविशेषणोपादानस्य सार्थक्यमेवेति निरतरांज्यायान् विचार एव समादरणीयत्वं भजते । अन्यथा व्याप्यवृत्तेख्याप्यवृत्तित्व भ्रमदशायां तद् विधेयकानुमितेः नैव प्रमाण सम्मतत्वं संभवति । एतावतावचसा विज्ञायते विज्ञायते विदुषा यत् देशतो कालतोवा व्याप्यवृत्तिसाध्यके तस्यावश्यकत्वेन देयभेवेति युक्तमुत्यश्यामि। अव्याप्यवृत्तित्वभ्रमदशायां तावदनुमितिसमुत्पादनाम तन्निवेशस्यौचित्यं सर्वसम्मतमेवेति गरीयान् विचारः समुचितः। अस्मद् गुरुचरणानां विशिष्ट प्रतभिाविभा विभासितानां शअरीमतां प्रातःस्मरणीयानां कर्कश तर्क रस रसकिानां रतीश का महाभागानां व्याप्यवृमहोदय त्तित्वविचाकासारे श्रीमतः देवीकान्त मिश्र नैय यिकप्रवरस्य विचार प्रसंगे वदृधा न्यर्गादि गुरुचरण पाथोजैः विमलवचमभिदं सर्वदा सर्वथेति।

एतेन विज्ञायतेऽस्मभिः यत् -

यस्मिन् व्याप्य वृतौ कस्यापि नाप्य व्याव्यवृत्ति भ्रमस्तद् व्याप्यवृत्तिष्ठ तादृश साध्यकस्थलेनोपादेयमिति ।

वास्तविकंतु तत्रापितदुपादानस्यैचित्यं सर्वसम्मत मेवेति साधीयान् विचारः प्रतिप्रतिभाति।

समान धर्मावविच्छन्न प्रतियोगितायाः तादृवीविदुषां विचारे वह्निमान् धूमादित्यत्र साध्यतावच्छेद सम्बन्धेन प्रतियोगिवैयधिकरण्यमात्र प्रतिपादनेन वहन्यादि सामान्याभावं स्वीकृत्याव्याप्ति सम्भवस्याऽसम्भवतयाऽति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

व्याप्तिवारणस्यैचित्यं प्रतिपादनमेव साधीय इत्येन पक्षं निर्दिशति शिरोमणिः। अतएवतेनोतिपदं समुचितमिति।

प्रतियोग्य सामानाधिकरण्यं च प्रतियोगितावच्छेदकावच्छिन्नाऽसामानाधिकरण्यमित्यवधेयं नैयायिकैः। मनीषिप्रवरैः। तथा च गुणकर्मान्यत्वविशिष्ट सत्तावान् एवं भूतत्वम् र्तत्वोभयवान् मूर्तत्वादित्यादौ नावकाशः सुतरामतिव्याप्तेः। अथ तादृश प्रतियोगितायाः समत्वेनापि तादृशप्रतियोगिताश्रयो यथा महानसीयवह्निस्तथा पर्वतीय वह्निरपि संजात एवेति निश्चयः। तादृशानधिकरणत्वस्य पर्वते नितरामविद्यमानतया नाव्यप्ति शंकावतारः दृष्टिपथे समायाति।

विशिष्ट सत्तावान् जातेरित्यादौ जात्यधिकरण विशिष्टसत्ताश्रयस्य गुणे विद्यमानत्वात् तथाऽभावान्तरमादाय समापतिताति व्याप्ति निरासाय प्रतियोगितावच्छेदकावच्छिन्नत्व निवेशस्यावश्यकतया विशिष्ट सत्ताभाव प्रतियोगितावच्छेदकं यद्विशिष्टसत्त्वात्त्वं, तदवच्छिन्नानधिकरणस्य गुणे वर्तमानत्वेन तादृश साध्याभावस्य प्रतियोगिव्याधिकरणत्वेनापि अतिव्याप्ति शंकावतारस्यनाव लोक्यते तथावकाशः।

भूतत्वभूर्तत्वोभयवान् मूर्तत्पादित्यत्र मूर्तत्वाधिकरण मनोवृत्ति भूतत्व मूर्तसोभयाभाव प्रतियोगिताश्रयमूर्तत्वाधिकरणत्वस्य चेतसिसत्त्वेन तादृशोभयाभावस्य सत्त्वेन तथोभयामावस्य प्रतियोगिव्यधिकरणतयाऽतिव्याणत्य वकाशः नावलोक्यते कस्यामप्यवस्थायमिति समवगाभ्यते तर्किकचणैः।

किन्तु विशिष्टसत्त्वस्य व्याप्यवृत्तित्वेन तादृस्थले प्रतियोगिवैयधिकरण्याप्रवेशात् तत्कथनयुक्तमिति नैव वक्तव्यम् । जातिसमानाधिकरणाभाव प्रतियोगि साध्यकत्त्वरूपस्य वा व्यभिचारपदार्थस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तादृशज्ञानदशायां विशिष्टसाध्यकानुमिति प्रसंगस्य तादृशातिप्रसंगपदार्थतया विशिष्टसत्त्वस्य तादृश रीत्या व्याप्यवृत्तित्वाभाव प्रंसगस्योपादेयत्वमितिनिश्चयः।

विशिष्टसत्त्वस्यातिरिक्तत्वे तथाति व्याप्तिदोष स्याऽसम्भवतया नावकाशः दोशष्येति विचारः विदुषां मण्डले प्रसिद्धएवेतिसाधीयान् पन्थाः प्रतिभाति।

भूत्वत्व मूर्तत्वोभयवान् मूर्तत्वादित्यदि नाति व्याप्ति शंकावतारः। सार्वभौम विचारपक्षभाकृष्य पुनस्तत्रैव प्रतियोगिव्यधिकरणस्य सौलभ्यं भवेदेवेति स्वीकृत्य ग्रन्थमिमंसमारभते ।

अत्रोभयत्वञ्च- एकविशिष्टापरत्वम् । एतेन विज्ञातं भवति यत् - भूतत्व विशिष्टभूर्तत्वम् । अतएव तादृशोभयाभावस्य भूतत्व विशिष्ट मूर्तत्व प्रतियोग्यसामानाधिकरणत्व प्रत्ययेनैव नातिव्याप्तिशंका जागरिता। अत्रेदं विज्ञातव्यंकिल भूतत्व विशिष्ट मूर्त्तत्वस्य मूर्तत्वानतिरिक्तत्वेन तथाप्रतियोगि सामानाधिकरण्येनकथ मपि तादृशाभावस्य प्रतियोगि व्यधिकरणत्वमुपपद्यतइति सत्यं प्रतीयते । किन्तु तथा समुपपादने विशिष्टस्य प्रतिपादनभावश्यमिति भत्वा भूतत्व विशिष्ट मूर्तत्वमेव तथा वक्तव्यमेवेति साधीयान् विचारः समादरणीयः। तथा च तादृशाभावस्य सहजतएव प्रतियोगिव्यधिकरणत्वं भवत्येव नैवदोषावतार इति वाच्यम् । उभयत्वस्य विशिष्टावानतिरिक्तस्य नोभयत्वं भवेत् । नवा तदवच्छिन्नाभावत्वेन तादृशावच्छिन्नाभावंस्य क्वापि प्रतिपत्तुं शक्यम् ।

तथाच तादृशवैशिष्टय विरहोवस्थायां घटत्वपटत्वोभयत्वस्य तदुभयत्वेन तादृशाभावस्य प्रत्यक्षसिद्धत्वेव तथेति विज्ञातव्यमेवेति युक्तं प्रतिभाति। एवं तथान्यत्रोभयाभावस्य विशिष्टाभावभिन्नत्वेनापि भूतत्वविशिष्ट

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मूर्तत्वस्य । भावस्या भ यत्वावच्छिन्न प्रतियोगिताकत्वेन तस्यैकत्वंलाधवात् इति वाच्यम् । तथापि यादृश प्रतियोगिताश्रयानधिकरणत्वं तादृश प्रतियोगितानवच्छेदकत्वस्य तत्र भूतत्वभूर्तत्वेऽवर्तमानत्वेन अतिव्यापिदोषस्य जागरुकत्वं भवेदेवेति निश्चयः अतिव्याप्तिदोषस्येति।

न च तथापि भूतत्व मूर्तत्वोभयवान् मूर्तत्वादित्यत्रोभयत्वावच्छिन्नाभाववदवृत्तित्वस्य मूर्त्तत्वेविद्यमानत्वात् व्यभिचारस्य ध्रौव्यमेवेति सत्यं विभाति।

अतएव शिरोमणि तदुभयाश्रयत्वस्य विद्यमान त्वेऽपि तदुभयत्वेन रुपेण तत्राऽविद्यमानत्वात् । मूर्तत्वाश्रये मनसि तथोभयमिति प्रतीतेः दुर्वारत्वादिति मन्तव्यम् ।

प्रतियोग्यसामानाधिकरण्यस्य तादृशाभाव विशेषणत्वे प्रतियोगिव्यधिकरण घटितलक्षणे अत्यन्तपदानुपादानेऽपि लक्षणसमन्थयः स्यादेव किमर्थमत्यन्त विशेषणं विहितं ग्रन्थकारेणेति वक्तु नैव शक्यमिति।

वहन्यादिभेद स्वीकृत्य समागताव्याप्तिशंका प्रतियोग्यसामानाधिकरण पदेनैव वारणं भवे देवेति व्यर्थमेवात्यन्तपदभिवेति सुतरामशक्यमेव।परन्तु वहन्यादि भेदस्य तादृशं पक्षं चाङ्गीकृत्य समापतिता व्याप्ति तथातिव्याप्ति दोषस्य निराकरणं विधातं मूले तथात्यन्त पदं मणिकारेण प्रादापि।

अतएव तादृश पक्षं स्वीकुर्वता शिरोमपि ना भाववबोध पुरःसरं विवेचयता श्रीमता अत्यन्ताभावत्व निरूपक प्रतियोग्य सामानाधिकरण्यस्यात्यन्ताभावत्व निरूपक प्रतियोगितायाश्चलाभाय मूल लक्षणे मणिकारेणाऽत्यन्तपदं समुपपादि। अन्यथा सर्वस्याभावस्य स्वाधिकरणं वृत्तित्त्वाभावान्तरभिन्नत्वेन तादृश तद्भदस्य स्वस्वरूपा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नतिरिक्तत्वेन प्रतियोग्यसामानाधिकरण्यस्यदौर्लभ्यमेवसमागच्छति । अतएवाऽनवस्थादोषस्यप्रमाणिकत्वेन तादृशदोषदूषिततया तन्निरीक्षण-मुखेनैव तन्निरासायाऽत्यन्तपदं मणिकारेणप्रत्तम् । हेत्वधिकरणवृत्यभावस्य वहन्यभावसमानाधिकरणविशिष्टाभावस्यघटाभावभिन्नत्वेन तथा वहन्यभावाभावस्य यः कोपि प्रतियोगी घटाभावाऽपि प्रतियोगी भवत्येवेति निश्चयः। तेन भाववृत्तित्व विशिष्ट भेदस्याभावमात्रानधिकरणकत्वप्रत्ययतया तादृशाभावप्रतियोगिकत्वप्रतीत्या तदधिकरणत्वं संभवतीत्यतो समापतति तथाऽव्याप्तिदोषः।

घटाभावभेदस्याऽतिरिक्तत्वविचारपक्षेतादृश भेदस्यातिरिक्तत्वमुपजा-यतएवेति निश्चयः। एवं रीत्या तादृशभेदस्य तादृश क्रममर्यादया-अप्रमाणिककल्पना प्रसंगदोष संजातत्वेनैव समापातति अनवस्था दोषः। तथाच-

घटाभावात्मकेपिभिदः सोहि पटाभाव भेदः कथं तु -अभावमात्राधिकरणकाभावस्य तदधिकरण स्वरूपतया तस्य प्रतियोगी यथाघटाभावः तत्सामानाधिकरणत्वेन यथा घटाभावस्य प्रतियोगी घटस्तथा पराभावोऽपि संजात एवेति निश्चयतया तथाच पराभावात्मक प्रतियोगिसामानाधिकरण्यतया प्रतियोगिव्यधिकरणाभावस्या प्रसिद्धतया ऽत्यन्ताभावत्व निरूपकत्व प्रवेशस्य शिरोमणेः युक्तियुक्तत्वमेवसाधीयः।

एतेन विज्ञायते यत्–

हेतुसमानाधिकरणाभावस्य स्वात्मक प्रतियोगिसमानाधिकरणत्वेन तादृशाभावस्य दुर्लभत्वापत्तेः। अथचाऽव्याप्तिदोषस्य तादृशाभावस्य दुर्लेभत्वापत्ते। अथचाऽव्याप्ति दोषस्य ध्रौव्यतया तन्निराकर्तुं मणिकारः अत्यन्तपदं दत्तवान् । न च पर्वतान्यत्वाभावस्य वहन्यभावस्य च

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भावात्मकाभावस्य प्रतियोगिवैयधिकरण्यं सुलभमितिवाच्यम् । वहन्यभावाधिकरणाभावान्तरभिन्नत्वात् । वह्नयभावाधिकरणंयदभावान्तरं विद्यतेतादृशाभावस्यभिन्नत्वेनवहन्यभावस्य प्रतियोगिघटाभावोऽपिजातएवतेन पूर्वोक्तस्थले समापतति तथाऽव्यापप्तिदोषः। भाववृत्तित्वविशिष्ट भेदस्याभावमात्राधिकरणक त्वाभावेऽपि तता भावमात्र प्रतियोगिकत्वेन तादृशाधिकरणस्वरूपत्वं भवत्येवेति निश्चयः।

एवञ्चाभाव प्रतियोगिकस्य विशिष्टाभावस्यापि तथाधिकरणरूपत्वे ह्रदे ह्रदवृत्तित्वविशिष्ट घटाभावोऽपि तथात्वापत्तिं स्वीकरात्येवेति निश्चयः। विशिष्टाभावस्याधिकरणात्यकत्वे घटाभावस्य घटाभावस्य घटाभाव प्रतियोगिकत्वापत्तेः। कथं तु घटाभाव प्रतियोगिकस्य पूर्वक्षणवृत्तित्वविशिष्ट घटाभावाभावस्य घटाभावत्वेन प्रतीयमानत्वेनापि तदात्मकत्वादिति।

साध्यताघटकसम्बन्धेन प्रतियोग्यसमानाधिकरण्यस्य विवक्षणे वह्निमान् धूमादित्यत्र घटामावे सत्त्वेन नहिसर्वत्राप्रसिद्धिः संजायत इति सत्यमाभाति। परन्तु स्वरूप सम्बन्धेन तादृशाभावस्य साध्यत्वे संजाते तदप्रसिद्धं परित्यज्य दुर्लभत्वमेवेति प्रतिपादितमेवेति तेंन । वह्निमान् धूमादित्यत्र समवायसम्बन्धेन वहन्यभावमादायाऽव्याप्तिवारणाय पूर्वोक्त स्यैवसाधुत्वमुप जायतएवेतिनिश्चीयते ।

एवमन्यत्रापि वह्निमत्त्वप्रकारकप्रमाविशेष्यतावान् धूमादित्यत्राऽव्याप्ति-र्ज्ञातव्या। एवञ्च घटाभावानुयोगिक स्वरूप सम्बन्धेन घटाभाववद्भिन्न भेदस्य घटाभाववद् भिन्नमेदस्यापि घटाभाव स्वरूपत्वेन तत् प्रतियोगिताश्रयवहनेः पर्वते सत्त्वेन वह्निमान् धूमादित्यत्रापि प्रतियोगिव्याधिकरणाभावा प्रसिद्धिरिति सत्त्यमेवेति जानन्त्येवेति वृद्धाः। परन्तु स्वावच्छिन्नभिन्न भेदस्य स्वरूपत्वानङ्गीकारात् । विशेषरूपतया संसर्गत्वानम्युयगमात् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वस्तुतत्त्वमिदं व्याचक्षते गुरुचरणाः यत् - किल-

साध्यतावच्छेदकताघटकसम्बन्धेनस्वनिरूपित प्रतियोगितावच्छेदकतायां साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वस्य निवेशान्ना प्रसिद्धिरितिनैव मन्तव्यमितितार्किकैः। तथापि वह्नित्वप्रतियोगिक समवायेन वह्नित्वविशिष्टसाध्यकस्थले सर्वथाऽव्याप्ति निरासाय-

साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वस्य तदतिरिक्त सम्बन्धावच्छिन्नत्वस्य साध्यतावच्छेदक निष्ठत्वोभयाभावस्य विवक्षणीयत्वेन तादृशविषयितयाघटाभाववद्भिन्नमेदस्य स्वरूपमङ्गीकृत्याऽप्रसिद्धितादवस्थ्यमिति वाच्यम् । साध्यतावच्छेदकतावच्छेदक सम्बन्धावच्छिन्नावच्छेदकताक निरूपकताधिकरणत्वीय स्वरूप सम्बन्धेन प्रतियोगितावच्छेदकतावच्छिन्नाधिकाणत्वाभावस्य प्रवेशेन पारिभाषिकस्य तस्यैचित्यमपि नावश्यकत्वं समुपगच्छति। युक्ति युक्तमपि तत् साधीयः।

अत्र शिरोमणिः स्व पक्षं स्थापयितुं प्रयत्मानो किमपि तत्र वैशिष्टस्यं प्रयतते। मूललक्षणे प्रतिपादिताभावपदस्य संसर्गाभावपदेन प्रतिपाद्यमाने नैव पूर्वोक्त दोषावकाशः स्वप्रेऽपि संभवति चेत् सत्यं प्रतिभाति, किन्तु तथासति प्रलयावच्छेदन प्रलयेगोत्वावच्छिन्नध्वंसवत्त्वस्यतत्र प्रतीयमानत्ववशादेव नैवजागर्ति तथातिव्याप्तिशंकावकाशः।

अतएव ध्वंसस्यात्यन्ताभावत्वस्वीकारेऽपि महाप्रलयावच्छेदनापि गोर्नास्तीत्याकारक प्रत्ययस्य नैव कदापि काचिदपितथापत्तिःलोचन गोचरतां समभ्युपैति।

अत्रेदं किमपि चिन्त्यते यत् -

तथा ध्वंसस्य तादृश तद्यक्तिप्रतियोगिकत्वस्यतथानुभवसिद्धत्वेन न

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कदापि प्रतियोगितावच्छेदकत्वं संभवति । तथा च- सामान्यधर्मावच्छिन्न प्रतियोगिताकत्वस्यावगाहनं कुरुते तथात्यन्तावगाहनस्यापि तत्र प्रतीतिः समुत्पन्ना जायत एवेति निश्चयः, विदुषांतेनाधुनापि गौर्नष्ट इत्यात्मिका प्रतीतिरपि भवेदेवेति सत्यभभाति।

गोरस्तीति प्रत्यय काले गौर्नष्ट इति वुद्धेः तथाध्वंसस्य गोत्वावच्छिन्न प्रतियोगिकत्वप्रतीतिवलादेव तादृशप्रत्ययस्वीकारात। एवं समान जातीयेषु तादृशचरणवर्णध्वंसावगाहनत्वस्य नितरा मौत्सर्गिकस्य प्रतीयमानत्वदर्शनात् सामान्यधर्मावच्छिन्नप्रतियोगिकत्वस्य तत्र स्वीकार्यमेवेति भाषन्ते धीधनेशाः, तत्र तादृश प्रतियोगितायाः अतीता नागत समस्तनिखिलव्यक्ति साधारणत्वेनाऽविद्यमानस्य तज्जातीय सामान्य ध्वंस प्रतीते रनुभवसिद्धत्वेन तादृश ध्वंसे सामान्य धर्मावच्छिन्न प्रतियोगिताकत्वस्यौत्सर्गिकत्वेन स्वीकार्य मेवेतिसत्यं प्रतिभाति। अतएव संसर्गाभावमात्रे शिरोमणिनेत्यमिहितं स्वग्रन्थे।

यदा स्यन्दस्तदा ध्यणुकं यदाऽदृष्टं तदा जन्यं ज्ञानं दुःखंवेति समुदाहरणं प्रास्तौत् । इत्यादि स्थले संघटते अतिव्याप्तिः।

ध्यणुकादिपदार्थस्य द्यणुकादिरहित खण्डप्रलयादिनिष्ठध्वंसप्रागभाव प्रतियोगितानवच्छेदकत्वात् । नहि तयोः सामान्यभाववत्व स्वीकारदशायामपि एकविशेष प्रागभावकालेऽपि ध्वंसप्रागभावयोः तादृश समये नैव कदापि प्रतीतेः संभवः।

अथ कालो भोमान् गोत्वादित्यादौ सुतरामतिव्याप्तिदोषावकाशः समुपस्थितोभवति। कथं तु प्राचां विचारे गवात्यन्ताभावस्य गोध्वंस विरोधित्वात् । प्रलये गोध्ववत्त्वस्य वर्तमानत्त्वेन गवात्यन्तभावस्य विद्यमानत्वात् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यद्यत्र प्रतियोगिवैयधिकरण्यघटितव्याप्तिलक्षणेस्वनिरूपित प्रतियोगितायां साध्यतावच्छेदक सम्बन्धावच्छिन्नत्वप्रवेशवलादेव नायं दोषः समभ्युपैति चेत् सत्यमाभाति तदाऽत्यन्त पदं व्यर्थमेव। यथोहि घटाभाव भेद निरूपित प्रतियोगितायां साध्यतावच्छेदक सम्बन्धावच्छिन्नत्वाभावात् । तथापि तादत्म्य संसर्गेण पटसाध्यक स्थले पटत्वादि हेतो पूर्वोक्त संसर्गेण तादृशाभावस्यावश्यकत्वेन तत्रापि तमादाय वास्तविकत्वेन शाश्वतिकत्वेनाव्याप्ति प्रदानस्यौचित्यं सर्वसम्मतमेवेतिश्रेयान् पक्षः विलसति।

गुरुचरणास्तु- तादृशभेदत्वमङ्गीकुर्वतां विदुषां विचारपक्षे चाऽखण्डोपाधित्वस्य तथात्वाङ्गीकारे तादृश तन्निरूपित प्रतियोगितायां साध्यतावच्छेदक सम्बन्धेतरसम्बन्धान्नवच्छिन्नत्वार्थकत्वस्यैव वाच्यत्वेन नावकाशः दोषस्येति पूर्वोक्तस्य तिविचारं कथयामासुः। तर्हि कथमपि तथात्यन्तपदं नैव व्यर्थमिति तार्किकचणाः।

न च तथापि घटप्रतियोगिक संयोगेन घटादेः साध्यत्वे अव्याप्तिरिति वाच्यम् । साध्यतावच्छेदकसम्बन्धान्यसम्बन्धावच्छिन्नत्व तादृशा वच्छेदकत्व व्यापकत्वविशिष्टोभयाभावस्य पूर्वोक्तप्रतियोगितायां प्रवेशेन नावाकाशः दोषाणाम् ।

अथ तन्निवेश पक्षेऽपि कालिक सम्बन्धादिना वहन्यादि साध्यक तत् क्रियात्व हेतुत्वेसुतरामव्याप्तिः समापतत्येवेति निश्चयं मन्ये। तादृश पटाभावे विद्यमानस्य कालिक सम्बन्धावच्छिन्न प्रतियोगिताकाभावाभावस्य तथा तादृश पटाभावस्य तत्स्वरूपत्वेन तन्निरूपित साध्यताव्चछेदकीभूत कालिक सम्बन्धावच्छिन्न प्रतियोगितावच्छेदक तादृशावच्छेदक पराभावत्वा-वच्छिन्नाधिकरणतायाः वर्तमानत्वेन प्रतिव्यधिकरणाभावस्याऽप्रसिद्धिरिति काक्षतिरिति चेत् सत्यम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परन्तु- यस्तुभयोः समोदोषः परिहारस्तयो सम इत्यादिवचन प्रमाण्यात् । हेतुतावच्छेदकावच्छिन्नाधिकरणतानिरूपितवृत्तितावच्छेदकीभूतानुयोगिता निरूपित साध्यतावच्छेदक सम्बन्धावच्छिन्न प्रतियोगितावच्छेदकावच्छिन्नाभधिकरणत्वस्य विवक्षणीयतया नावकाश पूर्वोक्त दोषाणामिति साधीयान् पन्थाः दृष्टि पथे समागच्छति।

अथ हेतुसमानाधिकरणात्यान्ताभावत्वनिरूपणेन पूर्वक्षणवृत्तित्व विशिष्टस्वाभावात्मकप्रतियोगिनासह सामानाधिकरण्यतथाऽभावसाध्यकस्थलेऽव्याप्तिः स्यादेवेति सत्यमाभाति। परन्तु- यादृश प्रतियोगितावच्छेदक विशिष्टानधिकरणं हेत्वधिकरणं तादृश प्रतियोगितानवच्छेदकत्वप्रवेशता तद्दोषस्यनिराकरणत्वेनापि लाघव गौरव चर्चामधिकृत्य लघईमस्त्वेनात्यन्त पदस्यौचित्यमिति नितरां लघीयान् पन्थाः। अत्यन्त पदोपादांन समुचितं प्रतिभातीति युक्ति युक्तमुत्यश्यामि।

अथ केषां विचारे अत्यन्ताभावत्वनिरूपकप्रतियोगितानिरूपकत्व प्रवेशे पूर्वोक्तस्थले समागतातिव्याप्तिशंकांनिरसितुं शिरोमणिः कालो गोमान् गोत्वात् इत्यादौ तथातिव्याप्तिशंकां निराकुरुते। तथा च समवाय सम्बन्धावच्छिन्न प्रतियोगिताक गवात्यन्ताभावेन सह विरोधित्वं जायते । तेन प्रकृते कालिकसम्बन्धावच्छिन्न प्रतियोगिताकात्यन्ताभावस्य विरोधित्वं समुपयुज्यतनवेति वाच्यम् । गोर्ध्वसाधिकरणेसास्नादौ समवायेन गौर्नास्तीतिबुद्धे ध्वंसेनैव सञ्जाते तत्र समवायेन गवात्यन्ताभावस्य विद्यमानत्वे मानाभाव इथ्याकारक प्रमाणभूत सम्बन्धान्तरत्वं समुपपाद्य कालिक सम्बन्धावच्छिन्न प्रतियोगिताकाभावेन सह तादृशविरोधसम्भवात् ।

न च तत्र दौशिक विशेषणतासम्बन्धेन गोध्वंसस्याधिकरणत्वं जायते तत्र तादृशात्यन्ताभावस्य विरोधितयातादृशकालिका सम्बन्धेन

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गोध्वंसाधिकरणे प्रलये तदत्यन्ताभाव सत्त्वे विरोधाभावात् कुतोऽतिव्याप्तिः सम्भवतीति वाच्यम् । प्राचीन विदुषां विचारे कालस्यापि दैशिक विशेषणता सम्बन्धेन तत्र गोध्वंसवत्त्वात् । अतएव त्वकसंयुक्तवेलायां विशेषणता समन्धेन वायुनशजन्य वायुनाश स्पर्शनाशस्य साक्षात्कारः शब्दानित्यत्व विचार प्रसंगे श्रीमद्भि मिश्रैः प्रत्यपादि। तर्हि कथमति व्याप्तिः सम्यद्यते। कथं तु कालिकसम्बन्धावच्छिन्नगवात्यन्ताभावस्य प्रलयवेलायां कालिकेनैव तत्र विद्यमानत्वात् ।

अतएव प्रतियोगि वैयधिकरण्यघटितस्य व्याप्यवृत्तिसाध्यकस्थलीय लक्षणे नितरामवश्यंतादृशाभावे दैशिकविशेषणता सम्बन्धेन हेतु समानाधिकरण्यधटितत्त्वेन तत्रातिव्याप्तिः संगच्छतएवेति निश्चप्रचम् ।

किन्तु पूर्वोक्त सम्बन्धावच्छिन्नप्रतियोगिताकत्ववालात् दैशिक सम्बन्धेन हेतुमन्निष्ठात्यन्ताभावस्य सुतरामप्रसिद्धत्वेन नातिव्याप्ति रिति व्याच्यम् ।

सृष्टिकाल वृत्तित्वावच्छेदेन तादृशगोत्वादे रत्यन्ताभावस्य तादृशस्य प्रतीयमानत्वात् ।

वास्तविकंतु–

प्रतियोग्यधिकरण वृत्तित्वमवश्यमेव सम्बन्ध विशेषवैशिष्टस्यघटितं स्वीकार्यमेवेति नितरांसाधीयान् पक्षः विलसति। अन्यथा घटाभावस्य कालिकादिना प्रतियोगी सामानाधिकरण्यादिग तादृशाभावस्याऽ-प्रसिद्धयानितरां तत्र तदापतिः स्वीकार्येति साधीयान् विचारः ग्रन्थकारस्य। तथा च कालो गोमान् गोत्वादित्यत्र नातिव्याप्तिशंकावसरः समुपसर्पति। न च तथासति घटभिन्नं पटत्वादित्यत्राव्याप्तिरेव जायेत् इतिव्याच्यम् । स्वप्रतियोगिग्रहविशिष्ट विरोधिताघटकसम्बन्धेनतयोक्तत्वादिति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एवं रूपवान् पृथिवीत्वादित्यादौ विषयितासम्बन्धेन रूपत्वविशिष्टाभावं स्वीकृत्य तत्राऽव्याप्तिं दूरीकर्तुं साध्यतावच्छेदकतायां साध्यतावच्छेदकता घटक सम्बन्धावच्छिन्नत्वस्यावश्यकतया तथा तादृश सम्बन्धेन समवायेन ध्वंसाभावस्याऽप्रसिद्धया पूर्वोक्त सम्बन्धेन तत्र गोत्वावच्छिन्नायावर्तमान तया नातिव्यापत्ति शंकावसरः समुपसर्पति।

किन्तु पूर्वोक्त प्रकारेणातिव्याप्तिनिवारितेऽपि द्यणुकवान् स्पन्दादित्यत्र तदधिकरणे खण्ड प्रलये द्यणुकस्याविद्यमानदशायामपि द्याणुकसामान्य ध्वंस प्रागभावयोरप्यसत्त्वाददतिव्याप्तिः: जायत एवेति सत्यं प्रतिभाति।

अतएवात्र महाप्रलये स्पन्दाभावस्य वर्तमानतयापि न कदाचिरपि संगच्छते व्यभिचारित्वमपि। तेन महाप्रलयकालात् प्राक काले द्यणुकाल गोत्वावच्छिन्न ध्वंसस्याधिकरणे स्पन्दस्य विद्यमान त्वे व्यभिचार निरूपकादिकरणभादाय गोसाध्यक स्पन्द हेतौ द्यणुकत्वावच्छिन्न ध्र्वसाभावस्य सत्त्वेन स्वाभाविक गत्या संभवत्यतिव्याप्तिः सुसंगतेति। खण्ड प्रलेये स्पन्दाधिकरणे सर्गान्तरीयं द्यणुक प्रागभावस्य तत्र विद्यमान तया द्यणुकत्वाच्छिन्नध्वंसाभावतया अतिव्याप्तिः जायतएवे ति।

न च तथापि खण्डप्रलये स्पन्दाधिकरणे नैव प्रमाण पूर्वकत्वं विद्यत इति वाच्यम् । व्राह्मणो वर्षशतमायुः'' इत्यागमस्य सत्त्वमेव मान् मिति वाच्यम् । नैव क्रियामन्तरा मुहतादि घटितवर्षस्य सम्भावनात्यादि वाक्ये प्रमाण पल्लवस्यैव मानतयाऽवगन्तव्यत्वेन प्रतीय मानत्वात् ।

अत्रेदमुच्यते केनापि यत्-

महाप्रलय पूर्वं तृतीय क्षणावच्छेदेन द्यणुकत्वावच्छिन्न प्रतिोगिताक द्वंसस्य विद्यमानतया नातिव्याप्तिः संघटते, किन्तु तदानीमपि चरम द्यणुक

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विनाशानुगुणस्य परमाणुस्पन्दस्य वर्तमानत्वेन तादृश कालोत्पदोत्तर संयोगेन प्रलयात् प्राक्षणावच्छेदेन पश्चात्तस्य विनाशशीलत्वात् ।

एवञ्चास्यां परिस्थित्यां जन्यं ज्ञानं अदृष्टात् - इत्यादिस्थले, तदीयं ज्ञानं अदृष्टादित्यत्रातिव्याशंका ग्रहग्रस्तत्वात् शिरोमणिमते द्यणुकत्वस्य द्यणुकाभावविशिष्टखण्डप्रलयनिष्ठध्वंसप्रागभावीय प्रतियोगितानवच्छेद-कत्वात् । अन्येषां विचारे तु द्यणुकस्याभावस्य प्रतीय मानतया खण्डप्रलये स्पन्दस्य वृत्तित्वे प्रमाणाऽसम्मततयाऽदृष्टानुसरणं विहितम् ।

नित्यज्ञानं स्वीकृत्य संद्धेतुत्वं निराकर्तु जन्येति पदं प्रत्तम् । तत्रापि नित्य सुखाभिव्यक्तिः मोक्ष इत्यभ्युपमते सद्धेतुमङ्गीकृत्यं नातिव्याप्तिशङ्कावसरः समुपास्थेतो भवतीति विचारपक्षं समुपेत्य तर्कालङ्गार विचारानुसारं स्थालान्तरानुसरणं समीहितम् । द्यणुकध्वंसस्यन प्रोतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यतयाद्यणुकध्वंसप्रागभावयोः द्यणुकत्वस्यैव प्रतियोगितावच्छेदकत्वेन पूर्वोक्तस्थले भवत्यतिव्याप्तिः समागच्छति। तादृशाभावयोः सामान्याभावत्ववादिभते एकविशेष प्रागभाव विशिष्टविशेषान्तरध्वंसांधिकरणे तादृशे काले सामान्यत्वेन ध्वंसप्रागभावयोः। न कदाचिदपि संभावनावरीवर्ति। अयमपि पक्षः केषाचिन्मतेसंभवति, परन्तु नायं विचारपक्षः प्रामाणिकः तार्किक विचार गोष्ठयाम् । प्रतियोगिमत्त्वस्ययथा तन्निष्ठत्वं समुपपद्यते तथा ध्वंसादिविचारेऽपि सत्त्वं सञ्जायत् एवेति निश्चप्रचम् । तत्रात्यन्ताभाववत्त्वेविरोधाभावत्वमेव संगच्छते।

ध्वंस प्रागभावयोरपि तादृशशात्यन्ताभाव विरोधित्वे प्रमाणाऽसत्त्वेन नितरामविरोधात् । अत्रेदं तत्त्वं विज्ञातव्येवाऽऽस्ते यत् तद् वैपरीत्ये तदात्यन्ताभावस्य कालमात्रावृत्तित्वप्रसंगधिया तथात्वंसमुपपद्येत एवेति विदुषां विचारपद्धतिः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ध्वंसत्त्वञ्च- अनुयोगिताविशेष एवेति ध्रौव्यमेवेति सत्त्यं विभाति। गगनाध्यभाव तादृश विशिष्टाभावस्यवा प्रलयकालध्यवच्छेदेन तत्र वृत्तित्वेऽपि नकापि हानिः दृष्टिगोचरतां समभ्युपैति ।

दैशिक विशेषणता सम्बन्धेन तादृशात्यन्ताभावस्य काल मात्रावृत्तित्वं तु प्राचीनैरपि स्वीकरोत्येवेति निश्चयः।

सदातनत्वव्यवहारमर्यादापि कालिक विशेषणता सम्बन्धेनैव तत्र सम्भवत्यपि पूर्वोक्त स्थले नैव दोषाकाशः शिरोमणिविचारे प्रतिभाति।

तादृशस्थले प्रतिबद्धय प्रतिबन्धक विचार पन्थाः सर्वैः स्वीकार्य एवेति प्रत्यक्ष सिद्धएवेतितार्किक तर्कसम्भतिः।

तथाहि- भूतलत्वावच्छिन्न विशेष्यतानिरूपित संयोग सम्बन्धावच्छिन्न तादृश गोत्वावच्छिन्न प्रकारताशालिबुद्धिं प्रति भूतल त्वावच्छिन्न विशेष्यता निरूपित संयोग सम्बन्धावच्छिन्न गोत्वावच्छिन्न प्रतियोगिताकाभाव-त्वावच्छिन्न प्रकारता शालिनिश्चयत्वेनैव रूपेण प्रतिबन्धकत्वाङ्गीकारे नास्ति पूर्वोक्त दोषावकाशः दृष्टि गौचरतां प्रयाति।

यदि च ध्वंस प्रागभावयोः प्रतियोगितावच्छेकसम्बन्धौ मन्यते तदोत्तर पूर्वकालावेव नान्यथा तादृशौ सम्बन्धौ भवतः। तेन पूर्वोक्ताभ्यास तादृश सम्बन्धाभ्यां प्रागभावध्वसंयोः तथारोपः प्रत्यक्ष हेतुः सन्निष्ठेत । हेतुनाऽमुना प्रकारेण समुल्लिखितस्थले तादृशाऽव्यति निरसितुं केनाप्युपापेन सम्भवेदिति विदुषां तात्पर्यं विज्ञातव्यभिति ग्रन्थकाराणां तात्यर्पमव धारणीयं वहुना प्रकारेण वहनेति।

तावदधुना स्वाश्रयोत्तरावच्छेदेनोत्तर कालिक सम्बन्धन्ध मर्यादातार तम्येन यदिघटवान् प्रतिभाति तदनन्तरभेवेति प्रतीति प्रमाणाभ्यां

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संवलितत्त्वेनैव घटवत्त्वेनोपलभ्येते तथा सति प्रतियोग्यारोपस्यैव कारणत्वमुपजायेत- नान्यथाप्रकारेण तस्योपपत्तिः संगच्छते। एवञ्चास्यां परिस्थित्यां तावदधुना स्वाश्रयोत्तर कालिक पूर्वकाल सम्बन्ध माहात्म्यने घटवत्त्वमपि प्रतीयेन तथाति पूर्वोत्तरकालयोः सम्बन्धटकत्ववशादेव तयोःसम्बन्धत्वमेवादातव्यमिति त्र्यासङ्काराणाभाशयः विज्ञजनेन चोहनीय इति। न कापिक्षतिरितिपक्षं स्वीकुरुते तस्यां वेलायां चक्रकादिरूपत्मकाऽन्योन्यायस्यदोषस्य वक्रत्वमेव समागच्छेदिति विवेच्योयां विषयः पुरतः तार्किकाणां सम्भवतीति कथञ्चिदपि अनुमातव्यएवेतिध्रुवम् ।

इत्यतो नियमाघटितत्वेन तल्लक्षणमनुमातव्यमितितर्कारसरसिकानां विमर्शः। तथा संसर्गाभावत्वप्रवेशवैलक्षणयुकथाकलाप वैशद्येन तथारीत्यासम्पादन्नेनावश्यकत्वप्रदर्शन मुखेन स्वाभाविकाऽव्याप्तिदोष-स्याग्रेसरत्वमेव दोष प्रदर्शन परत्वमुपपादन मेवेति तेषां तत्प्रदर्शनमेवाशयः शिरोमणेरित्यवधेयमेवेति । तथाऽव्याप्ति प्रदर्शन मुखेनैव तादृशाभावः स्वयमेवेति चोहनीयः।

एतेन विज्ञीयते शिरोमणिविचारकल्पे चक्रकादिषस्येमुदघाटन प्रदर्शन परकत्वं समुपपादय तन्निरासभागोंपि प्रतिपादनीय एवेति स्वकीयवैशिष्टं स्वीकुरुते । अतएव समस्त विचार कुसुमशेखरं चेतसि समवधाय चक्रकादिप्रसंग विशेष जालमालाभादधानः शिरोमणि विचार प्रसूनमाला मरीचिमालेव द्रष्टव्येति दीपशिखा कोमल कान्ति सदृशतया स्वविचार मालाक्षणि कल्पनं गौरव गुणग्रस्ततथा स्वकीयकमनीय कल्यनां प्रदर्श्य श्लाध्यत्वमेव प्रादर्शयत् । नान्यदविशिष्ट प्रयोजनभस्येति तदुमयोः तस्मादार्थसमाजग्रहसंकोचसांकर्यापेक्षया मणिग्रन्थस्यैव याथार्थ्यमतो यथाश्रुतमेव साधीयः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अत्र केषां धीमतां विचारपक्षमनुसृत्य स्वाश्रयोत्तं जन्यकालिक सम्बन्धेन घटवान् कोऽपि भविष्यति चेत्तदा तादनया तस्यो पलब्धिशेचत्तर्हि ध्वंसादि पदार्थस्य प्रत्यक्षवेलायां प्रतियोग्यारोपस्य कारणत्वं स्वीकार्य मेवेति निश्चयः। इत्थं चेतानीं स्वाश्रयपूर्वकालिक संसर्गण यदि भविष्यति घटवान् तदा घटवत्तया तदा समुपलभ्यतेतदवस्थायां प्रागभाव प्रत्यक्षेऽपि तथास्तरकाल पूर्वकालयोः सम्बन्धटकत्वेन तेषां सम्बन्धत्वं भवेदेवेत्यतो प्रागभावध्वंसयोः प्रत्यक्षहेतुत्वेन नाव्याप्तिरिति प्राचीन सम्भततयापि तत् प्रतिपादनं समुचितमित्यनेनापि वदतोव्याघातः भवेदेवेति वलीयान् पन्थाः। अतएव तर्कालङ्कार विचारानुसारण चक्रकादिदोषस्य संभवावर्तत एवेति निश्चयः।

तथा च—

स्वग्रहसापेक्षग्रहसापेक्षग्राहकत्वेनतथात्वमिति तत् प्रसंगः।

अत्र तत् पदेन व्याप्तिग्रह एव स्वीकार्यः। व्याप्ति ग्रह सापेक्षात्मक ग्रहेत्यनेन संसर्गाभाव ग्रहस्यैवावोधः निश्चेतव्यः। कथंतु तदानीं तस्य निश्चयोत्तर वृत्तित्वरूपाजन्यत्व घटक व्याप्तिरूपनैयत्य घटितत्वेन तत्सापेक्ष ग्रहस्यात्यन्ता भाव ग्रह सापेक्ष तया तादृश नियम ग्रहानुकूलतया वस्य तत्रैव सत्त्वमिति साधीयान् पन्थाः। अथवा स्वपदेनात्यन्ताभावस्यैवग्रहणं सम्भवतितेन तादृशसापेक्षग्रहानुकूल तादृशनियमग्रहस्य तत्सापेक्षत्वेन संसर्गग्रहाभावग्रहग्रस्ततया तादृश सापेक्षस्यात्यन्ताभावत्वग्रहे विद्यमानतया चक्रकादिदोषस्यचात्मश्रयत्वमेव दोषः समापतत्येवेति विदुषां विचारः दृष्टिपथेसमागच्छति।

चक्रकादिदोषस्याऽन्योन्याश्रयत्वं वाऽऽत्माश्रयत्वमेव स्वीकुरुते तेन पारम्पर्यतया व्याप्तिग्रहे तद्ग्रहस्य तादृशव्याप्तिग्रहेसंसर्गाभावग्रहस्य व्याप्ति ग्रहापेक्षितत्वेन व्यापकत्वस्य तथात्वेन चक्रकापत्तिदोषस्य तत्र विद्यमानत्वेन

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वयोरपि सत्त्वमिति तेनान्योन्याश्रयत्वदशायां, तत्र चात्माश्रयत्व मपि संगतमिति विदुषां विचारपक्षः साध्यीन् प्रतिभाति।

वस्तुतस्तु—

नन्वत्र ज्ञानवान् द्रव्यत्वादित्यादौ समवायसम्बन्धेन ज्ञानस्यसाध्यत्वे द्रव्यत्वादि हेतौ साध्यविरहविशिष्टसाधनाधिकरणस्यसमवायसम्बन्धेन साध्यवत्त्वप्रतीयमानतया अतिशंका कवलितत्त्वेन प्रतरामतिव्याप्तिः स्यादेवेति ध्रौव्यम् ।

यद्यपि प्रतियोगितावच्छेदक सम्बन्धेन प्रतियोगिसम्बन्धित्वस्य विवक्षणीयतया तं परिहर्तुं शक्यमेवेति साधीयान् पन्थाः प्रतिभाति।

तथापि तत्राऽव्याप्यवृत्तिभिन्नसाध्यकस्थललक्षणनिर्देशानुसारं-साध्यतावच्छेदक सम्बन्धावच्छिन्न प्रतियोगिताघटितत्वेनैवाव्याप्ति-शंकामनुसरन् तादृशदोषस्य जागरितत्वेनैवेर्ति विचार्यमेवेति नितान्तमनुमिनोमि।

अनेनैव हेतुना तादात्म्यसम्बन्धेन गवादेः साध्यत्वे तादृशसम्बन्धावच्छिन्नात्यन्ताभावस्या प्रसिद्धया सास्नावत्तादिहेताव-व्याप्तिरिति सुस्थिरमेवेति निश्चिनोमि।

एवं-

अभाववृत्तिरभावस्यनाधिकरणस्वरूपत्वमस्तिःनवा तद्धर्मात्यन्ता-भावस्वरूत्वविद्यते । एतादृश्यां परिस्थित्यां तत्र दोषः समुद्भवति । तदस्वीकारे घटभेद स्वरूपस्य पटभेदत्वात्यन्ताभावस्य तादृशात्यन्ताभावस्यापि तादृशनिष्ठप्रतियोगितायामेव तादृश सम्बन्धावच्छिन्नत्वेनाव्याप्तिशंकाजागरिताविद्यतएवेति धीधनेशानां

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विमर्शएवति निश्चयं मन्ये। एतेन पूर्वापरसम्बन्ध मर्यादया

धर्मिभेदस्य धर्मात्यन्ताभावस्य च सामानाधिरण्येनापि स्वीकारे च तादृशाऽव्याप्त्य भावेनापि घटः भावे यत्किञ्चिद् भेदस्य प्रतीयमान्त्वेनापि तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकात्यन्ताभावीय प्रतियोगितावच्छेदक-त्वस्य गोत्वादौ सत्त्वेन सास्नादिहेतुकस्थले सञ्जाताऽव्याप्ति निरासाय, तादृशाभावनिरूपकसाध्यतावच्छेदक सम्बन्धावच्छिन्न प्रतिोगित्वस्य प्रवेशः परमावश्यक एवेति निश्चयत्वेन अभाववृत्यभावस्य नाधिकरणस्वरूपत्वं यदि स्वीकुरते तदा मूलग्रन्थस्य समीचीनत्व सुसमीचीनत्वमस्ति नवेति पक्षस्य प्रामाणिकत्व विद्यतेचानवस्थाप्रसङ्गः विदुषा निश्चेतव्यः। पारिमाण्डल्यान्नदाहः इत्यनेन जन्यत्व सम्बन्धावच्छिन्न प्रतियोगिताकाभाववान् दाहः। तथात्रजन्यत्व सम्बन्धस्य वृत्तिता नियामकत्वमास्त्येवेत्यागम्यते तदनन्तरं विषयतासम्बन्धस्य वृत्तिता नियामकत्वं भवेदेवेति निश्चीयते पूर्वोक्त स्थले तस्यापि तुन्नियामकत्वं भवेदेवेति निश्चिनोमि। किन्तु यत्र वृत्यनियामकत्वं नाङ्गीकुरुते तत्र ज्ञानाभावस्य गगनादौ स्वाभाविकतया प्रतियोगिव्याधिकरणाभावस्य तत्र प्रसिद्धतया नाति व्याप्तिशङ्कावसरः समुपसर्पति । हेतुनाऽभुनास्थलान्तरस्योपादानं परमावश्यकं प्रतिभाति। अतएव कालिकसम्बन्धेन दैशिक सम्बन्धेन च विशेषगुणस्य विद्यमानत्वेन तादृशाभावस्यनास्ति प्रतियोगिव्याधिकरणत्वमित्यतो नितान्तमव्याप्तिः संगच्छत एवेति साधीयान् यन्थाः। एवमस्यां परिस्थित्यां सम्बन्ध सामान्य मर्यादया विशेषगुणस्य चतेसि नितरामसत्वात् नातिव्याप्तिशङ्कावसरः समुयस्थितोभवति ।

अंत्र केचन विद्वांसः तद्वैयरीत्यमेव मजन्तेतराम् । भावभेदस्या तिरिक्तत्वमुयेत्य गोमेदं स्वीकृत्यनिरूपक

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रतियोगित्वनिवेशस्याऽनैचित्यसम्मततया नावश्यकत्वं तादृश प्रतियोगिता प्रवेशस्य। नावकाशः पूर्वोक्त दोषस्य। यदि च तादत्म्य सम्बन्धेनाभावसाध्यकस्थले साध्यभेदमङ्गीकृत्य तादृशाऽव्यानिरासाय चात्यन्ताभावत्व निरूपकप्रतियोगित्वप्रवेशसौलभ्येन ग्रन्थसंगमन प्रकारस्यौचित्यं नैव तर्क सम्मत मित्याग्रहोस्तिचेत् तदा पराभाषाधिकरण-वृत्यभावस्याऽवाधिकरणत्वेन साध्य भेदस्य नितरामप्रसकत्या नाव्याप्ति शङ्कावसरः तार्किक सम्प्रदायसम्मतः।

वृद्धास्तु तावर्दिदं व्याचक्षते यत् - हेत्वधिकरणविशष्टि वृत्तितावच्छेदकी भूत संसर्गाभाववशिष्ट रूपानुयोगिता निरूपित प्रतियोगिता विशिष्ट साध्यतावच्छेदक सम्बन्धावच्छिन्न प्रतियोगितावच्छेदकत्वा भाव विवक्षणान्नैव दोषः दृष्टि यथे समागच्छति।

तेन तादात्म्य सम्बन्धेन साध्यत्वे सद्धेतौ साध्यभेद विशिष्टानुयोगिता निरूपित साध्यतावच्छेदकसम्बन्धावच्छिन्न प्रतियोगितावच्छेदक-स्यावर्तमानत्वेन तदभाव विवक्षणादेव दोषावकाशावसरः नेव समुयसर्पति ।

एवं च तादृशभिन्नान्तामिति पथभव लम्व्य नाति व्याप्ति शंकायाः नितरामौचित्यं लोचन पथे समभ्युपैति।

तथा च कालोपाधित्वस्याद्युपाधित्वस्यचावर्तभानत्वेन चेतसि अवर्तमानतया तस्याव्यावर्तकत्वेन नातिव्याप्ति शंका कदाचिदपि जागरिता भवेदिति निश्चयं प्रत्येमि। तादृशाऽव्यावर्तकस्यापि तथात्वे चेतसः कालोपाधित्वं भवेदेवेति ज्यायान् मार्गः संमवति।

अतएव दीधितिकार विचारपक्षमधिकृत्य दिक्वालयोः परमेश्वरानतिरिक्त त्वादेवाऽव्याप्ति प्रसंगस्य नावकाशोस्तिचेत् सत्यमेव । किन्तु जातिमान्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भावत्वादित्यत्र समवाय सम्बन्धेन ज्ञानस्य साध्यत्वे स्वतएवातिव्याप्ति दोषस्य तादवस्थ्यमेवेति तार्किकप्रवराः निश्चिन्वेते।

साध्यरहितानामपि हेतुविशिष्टानां विषयविशिष्टानामपि तावदेकार्थ समवायेन साध्यवत्त्वेन प्रतीयमानत्वात् । किन्तु प्रतियोगितावच्छेदक सम्बन्धेन प्रतियोग्यधिकरणस्य किंवा तद् सम्बन्धि वृत्तित्वाभावस्योक्तत्वेन नावकाशः पूर्वोक्तदोषाणाम् ।

तादात्म्येन गवादेः साध्यत्वे तादृश सम्बन्धावच्छिन्न प्रतियोगिताकात्यन्ताभावस्याऽप्रसिद्धया सास्नावत्त्वादि हेतौ समागच्छति नितान्तम् व्याप्ति दोषस्य जागरितत्त्वादिति विदुषां तात्पर्यम् । तास्मात् अभाववृत्तिरभावस्य नाधिकरण स्वरुपत्वं नवा तादृशात्यन्ताभाव स्वरूपत्वमिति। अन्यथा घटभेदात्मकस्य पटभेदत्वात्यन्ताभावस्य तदन्यस्य च तादृश तन्निष्ठ प्रतियोगितायां तादात्म्य सम्बन्धावच्छिन्नत्वेनाव्याप्ति शंकावसरः समम्युपैति। अथ च अन्येषां विचारपक्षमाकलय्य ज्ञानाभावस्य पूर्वोक्त संसर्गेण घटपटादौ प्रतियोग्यसमानाधिकरणत्वान्नातिव्याप्ति शंका जागरिता भवति।

न च तथापि तादृश सम्बन्धेन प्रतियोग्यसामानाधिकरण्यस्य कथनेन वह्निसामान्याभावस्यायि हेत्वधिकरणावच्छेदेन महानसीय संयोगेन प्रतियोग्यसामानाधिकरणत्वेन वह्निमान् धूमादित्यादौ स्वप्रतियोगितावच्छेदक सम्बन्ध सामान्येन प्रतिपादनेन जातिमान् जातित्वादित्यादिस्थले समायात्येवातिव्याप्तिदोषस्य पुनरावृत्तिः। स्वप्रतियोगितावच्छेदकतादृश सम्बन्धेन प्रतियोगिव्यधिकरणत्वाभावात् ।

परन्तु ताहात्म्य सम्बन्धेन वस्तुमात्रस्यैव यथा- श्रुतव्याप्यवृत्तित्व तादृश संयोगवद्भदेस्य वृक्षादावनम्युयगमात् । तथा च किं प्रयोजनं तादृश

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सम्बन्धित्वप्रवेशस्य, विचारसन्तामाफलय्येति वचन चातुरी फलरहितेति। तात्पर्यस्यास्येति विचिन्त्य तर्करसिकेन तर्कालङ्कारेण प्रत्ययादि किलवस्तुतस्तु ग्रन्थः। तथाच- व्याप्यवृत्तिसाध्य कस्थले प्रतियोग्यसामानाधिकरणा प्रवेशः तादृश व्याप्यवृत्तित्वं तादृशपूर्वोक्त सम्बन्धेन नित्यत्वमात्रं यादृश साध्यस्य वरीवर्ति तत्रतादात्म्यसम्बन्धेन यादृशसाध्यकस्थले व्याप्तिं निरसितुं स्वाभाविकतया प्रतियोगि वैयधिकरण्यं प्रवेश्यमेवेति ज्यायान् पन्थाः। तादृशस्थले सम्बन्धित्वाऽप्रवेशे तेन सम्बन्धेनाधिकरणाप्रसिद्धयास्यादेवाऽव्याप्तिः। अतएवं तां निराकर्तुं यताश्रुतं मेव प्रतियोग्य सम्बन्धित्व प्रवेशः साधीयान् प्रतिभाति। कपिसंयोगवतः साध्यतायां तादत्म्येन नाव्याप्ति शंका जागर्ति। तादृश तादात्मासं सर्गेण प्रतियोग्यधिकरणाऽप्रसिद्धया तद् गृहीतुमशक्यत्वादिति निश्चयं प्रत्येमि।

कथंतु संसर्गान्तरावच्छिन्न प्रतियोगितायामुभया भावस्य विद्यमानत्वादिति।

एवञ्चान्योन्याभावस्यापि प्रतियोग्यसामानाधिकरण्यतयाऽव्याप्यवृत्ति साध्यकस्थलेऽपि न काप्यनुपपत्तिः सम्भवति । तद्विशिष्टस्यापि हेत्वधिकरणत्वेन विवक्षणीयतया वह्निमान् धूमादित्यादि व्याप्यवृत्ति साध्यकेऽपि नात्याप्तिरिति मनीषिणां निष्कर्षः।

अन्येषां विचारेतु प्रतियोग्यनधिकरण हेतुमन्निष्ठाभावीय प्रतियोगितायां यद्धर्मावच्छिन्नत्वयत्सम्बन्धावच्छिन्नत्वोभयाभावः तादृशधर्मावच्छिन्नसाध्य सामानाधिकरण्यस्य प्रतिपादनत्वेनैव सामञ्जस्ये किमर्थं तत्परित्यागस्यौचित्यं किमर्थ मितिनास्ति शंकावसरः समुपसर्पति। किन्तु तादात्म्यसम्बन्धेन साध्यकस्थले व्यभिचरिणि समापततिनिर्विबादमतिव्याप्तिः। तादृशस्थळीयातिव्याप्तिं निराकर्तुं प्रतियोग्यनधिकरणत्वमयास्य प्रतियोग्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सम्बनन्धित्वस्यैवोपादेयता प्रत्यक्ष सिद्धैवेति नास्ति तेषां प्रयोजनमिति व्याचक्षतेवृद्धाः। हेतुनाऽमुना शिरोमणिः तमेव पक्ष्यं व्याचचक्षे । प्रतियोग्यसम्बन्धित्वस्यापि व्यऽख्यान् सापक्षत्वेन तदुपादनस्यापि-आर्थसमाज वाहुल्यतया तन्निरूपण प्रतिपादन स्यापि गौरव ग्रस्तमेवेति प्रतिपादयन्ति वृद्धतार्किकचरणाः। प्रतियोग्य व्रुवते सम्यद्यमानाक्ष चरणाः।

मेदस्याऽव्याप्यवृत्तित्वं केचन तार्किकाः स्वीकुर्वते । क्वचिदपि तस्य वृत्तित्वं क्वचिदपि तस्यावृत्तित्वं वरीवर्ति। किन्तु भेदस्याव्याप्यकृत्तित्वमित्येवं भन्यते चेत् तदा कपिसंयोगाभावस्य प्रतियोगिमद्वृत्तित्वादेव पूर्वोक्तदोषस्य सुतरां सत्त्वं प्रतिभात्येवेति निश्चयः तेन तद्दोषस्य तादृशत्वं भवेदेवेति । अतएव तद्वदवृत्ति भिन्नेत्पार्थस्वीकारे तद्विशिष्टस्य वैफल्यमेव स्वीकुरुते। अतएव तस्य प्रतियोगिसामानाधिकरण्याभावं व्युत्याद्य तद् विशिष्टस्य हेत्वधिकरण वृत्तित्व विवक्षणे तस्य वैफल्यं सुतरां सिद्धत्येवे निश्चयः।

अव्याप्यवृत्तिसाध्यक व्यभिचारिणि स्थले-अतिप्रसंगावकाशो भवत्येवेति निश्चयः। एवं च अधिरण भेदेनाभाव भेद विरहेण संयोगीसत्त्वादित्यादौ संयोगाभावस्य संयोगवद् वृत्त्वेन तद्भिन्नत्वाभावात् अभावान्तर मादाय अतिप्रसङ्गावकाशः समुपस्थितोभवति । अतएव सोगी सत्त्वादित्यादौ अतिव्याव्याप्तिः। नन्वत्र संयोगाभावे नैव संयोग सामानाधिकरण्यमित्यात्मप्रतीतिवलेन तादृशसंयोगाभावेगुणाद्यवच्छेदेन तत्सामानाधिकरण्यात् तादृशाभावस्य सत्त्वेन नातिव्याप्तिः संभवति । प्रतीतेः अन्यथैव समुपपादितत्त्वेनैवातिव्याप्ति शंकावकाशः नावलोक्यते, तेनैव तादृशप्रतीतोव्यर्थैव जायमान तया प्रतियोगिवैयधिकरण्य विशेषणं समुचितं मेवेति नितान्तं युक्तिसंगतमेवेति निश्चिनोमि।

अतएव तस्य हेत्वधिकरणे विशेषणत्वं ज्ञायते । तेन

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कपिसंयोगीएतत्वादित्यादौ कपिसंयोगाभावस्य प्रतियोगिसामानाधिकरण्यानवच्छेदकीत्व गुणाध्यवच्छिन्नत्वेपि नाति व्याव्याप्ति शंकावसरः विज्ञायते ।

तादृशाधिकरणे हेत्वधिकरणे तादृशावच्छेदकावच्छिन्नत्वं व्याप्यवृतित्वविशिष्टावच्छेदकविरहादेव सर्वथानितरामप्रसिद्धिः। तच्च तादृश प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वविशिष्टतादृश सामानाधिकरण-यानवच्छेदकी भूतहेत्वधिकरणवृत्तित्वस्य तत्र विशेषणत्व प्रदानेन तत्रत्यसमाधानं भवितुमर्हीति।परन्तु वृद्धगुरुणां विचार पक्षं कक्षीकृत्य व्याप्यवृत्तिपदार्थस्यावच्छेदकत्वाऽनङ्गीकारे तस्याऽप्रसिद्धत्वेन गौरवदोषयङ्क-कलङ्कितत्वेन च तादृश निवेश प्रकारोपि गुरुवरपादपद्म सम्मतोनैव विदुषां समाजेश्रयेकरः पन्थाः विज्ञजनवचसा। तं व्यनक्तीति विज्ञायते विज्ञजनवचसा। हेतुनाऽमुना मूलकारसम्मत पक्षं नितान्तं समवेक्ष्य तार्किक शिरोमणिः प्रतियोगिवैयधिकरण्येत्यादि विशेषघटितलक्षणस्यैवौचित्यं वक्ष्यति तादृश विशेषणस्य हेत्वधिकरणे ज्ञातव्यमिति विदुषां विंमर्शः।

अतएव प्रतियोग्यधिकरणावृत्तित्वमित्यत्र तादृश वृत्तित्व विशिष्ट प्रवेशस्यौचित्येऽपिगौरवदोषकलङ्कपङ्कम्लानत्वेनापि प्रस्तुतवचन विलास स्यापि युनरक्तेः युक्तत्वं नैव प्रमाणतकाभ्यां संवलितमित्यमि घीयते वृद्धगुरुणां अतएव- प्रतियोगितावच्छेदकावच्छिन्नंस्य यस्य कस्यचित् प्रतियोगिनः किंवा स्वप्रतियोगितावच्छेदक विशिष्टाधिकरणी भूता या प्रतियोगिनिष्ठाधिकरणताश्रयीतेति विवक्षणे न पूर्णोक्त दोषावशरस्य प्रमाण युक्तं नैव युक्तत्वमिति समवलोकयामि। अथवा प्रतियोगितावच्छेकावच्छिन्न सामान्यस्य। तेन यावन्ति प्रतियोगितावच्छेदकानि सन्तिष्ठन्ते तावन्ति प्रतियोगितावच्छेदकावचिछन्नानधिकरणानिद्वितीयकल्पस्य तात्पर्य-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मित्यवधेयमिति। यत्किंचित् प्रतियोगितावच्छेदकावच्छिन्नस्यवाऽनधिकरणात्वंवेति मणितम् । प्रथम कल्पेतु- अव्याप्यवृत्तिसाधनकस्थले कस्यापि प्रतियोग्यधिकरणस्यापि तद्भिन्न प्रतियोग्यनधिकरणत्वेनाऽव्याप्ति दोष समाकलितत्वादित्यतो नैव पक्षः श्रेयान् प्रतिभाति।

द्वितीय पक्ष प्रवेशे—

संयोग सामान्याभाववान् द्रव्यत्वाभाववान् सत्त्वादित्यादावतिव्याप्तिः। साध्याभावाभावस्य द्रव्यं तत्प्रतियोगितात्मक संयोगविशेषाभाववत्त्वात् ।

नित्यत्व विशिष्ट द्रव्यत्वाभावाभावाभावात्मकतत्प्रतियोगिनोऽधिकरणत्वात् । स्वात्मक विशिष्टस्यापि द्रव्यत्वस्य द्रव्यत्वस्रूपत्वेन प्रतीयमानत्वात् ।

तृतीय पक्षे कपिसंयोगाभाववान् आत्मत्वादित्यादिस्थले तावदव्याप्ति दोषस्य विद्यमानतया तादृश निवेश प्रकारः नैव तर्क सम्मतः। साध्याभावस्वरूपस्य कपिसंयोगस्य गुणाधिकरणस्यात्मनः तादृश प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वात् । अतएव पूर्वोक्तविवेश प्रकारेण दोष ग्रस्तत्वात् । सत्यमतेत् किन्तु तदुद्धारप्रकारस्य नितान्तं पयीलोचनम शिरोमणिदिशातन्निराकरणो मार्गः प्रादर्शियत्—

यादृश प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेत्वधिकरणं तादृश प्रतियोगिनवच्छेदकत्वस्यार्थ विवक्षणान्नायं दोषः सम्भवति।

अत्रेदं विज्ञातयं किल-

यादृशत्वस्य प्रतियोगिता विशेषणत्वेन यादृशावच्छेदक विशिष्टस्यानधिकरणत्वं हेत्वधिकरणं तादृशावच्छेदकभिन्नं साध्यता व्वछेदक भिन्नं विद्यते तादृश निवेशस्यैवैचित्येन प्रतियोगित्वप्रवेशस्यौचित्यं नाव लोक्यते गुरुचरणैः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विषयतायाः वृत्यनियामकत्वे गगनादौज्ञानाभावस्य स्वाभाविक रूपेण प्रतियोग्यधिकरणत्वं भवेदेव कथमति व्याप्तिः सम्भवति चेत् सत्यमाभाति, परन्तु व्यभिचारनिरूपकस्य कालस्य दिशश्च कालिक सम्बन्धेन दैशिक सम्बन्धेन च विशष गुणस्य विद्यमानत्वेन तदभावस्य नैव प्रतियोगिव्यधिकरणत्वं भवतीत्यतो नितराम तिव्याप्तिः सर्वदा संगच्छ्तूएवेति निश्चयः। सम्बन्ध सामान्येन, विशेष गुणस्य चेतस्य सत्वात् नातिव्याप्तिशंका समुत्पन्ना।

अत्रेदं विचारणीयं यत्-

धर्मिभेद धर्मात्यन्ताभाव यौरैक्येऽपि अव्याप्तिशंका विरहेऽपि पराभावे गौभेदस्य वर्तमान दशायां तादत्म्य सम्बन्धावच्छिन्न प्रतियोगिताकात्यन्ताभाव प्रतियोगितावच्छेदके समत्त्वे सास्नादि हेतौ तादृशाऽव्याप्ति दोषस्य निरासायात्यन्ताभाव प्रतियोगिता निरूपकसाध्यतावच्छेदक सम्बन्धावच्छिन्न प्रतियोगित्व पर्यन्तंस्य निवेशः परमावश्यक एवेति। एवं यादृशाभाववृत्तिरभावो नाधिकरणस्वरूपं इति मूलग्रन्थस्य संगतिः शंकास्यदैवेति विदुषां विचारः। तथाचाव्याप्ति शंकायाः तादृवस्थ्यमेवेतिनिश्चयः।

तत्र केषां विचारेतु-

भावात्मक भेदस्यार्तिरिक्तत्वे गोभेदमादायाऽव्याप्तिदोष विरहदशायामपि अत्यन्ताभावत्व निरूपक प्रतियोगिता निवेशस्यौचित्यं नावश्यकभेवेति विदुषां विचाराशयः

यदि च तादात्म्येनाभावसाध्यकस्थले पराभाण्वादौ साध्यभेदं स्वीकृत्य तादृशदोषंनिराकर्तुं तादृशात्यन्ताभावत्वनिरूपकप्रतियोगित्वनिवेश प्रावल्यतया पूर्वक्तग्रन्थ विचारसन्दर्भस्य संगमन प्रकारः नैव

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तार्किकविचारसम्भत:। तदा पटाभावादि हेत्वधिकरण वृत्यभावस्याभावाधिकरणकृत्येन तादात्म्य संसर्गेण साध्यभेदस्यावर्तमानत्वेनना व्याप्तिशङ्का जागरितेति वृद्धानां विचारनिष्कर्ष:।

वास्तंविकंतु—एवं प्रतियोगित्वस्य स्वरूपसम्बन्धविशेषत्वं नावगच्छतिदुषांवरिष्ठ: तथोत्तर ग्रन्थ विरोधात् । अन्येषां विचारपक्षमविगत्य पदार्थ विभाजकीभूतधर्मावच्छिन्नप्रतियोगिताक भेदकूटाभावत्मकतया तथाविधत्वस्य नैव प्रतीयमानतया नैवाभीष्टसिद्धि: संभवति। किन्तु स्वरूपसम्बन्ध विशेषस्य प्रतियोगिस्वरूपरुपत्वे वह्निमान् धूमादित्यादावपि तादृशश दोषस्य ध्रौव्यत्वमेवसमागच्छेत् । कथंतु—

घटाध्यभाव प्रतियोगित्वस्य घटत्वावच्छिन्नवदिव द्रव्यत्वावच्छिन्नतया तादृशावच्छेदकीभूत द्रव्यत्वावच्छि्न्नस्य साधनाधिकरणे विद्यमानत्वेन प्रतियोगिव्यधिकरणाभावाऽप्रसिद्धे:।

नन्वत्र-

विशिष्ट सत्तावान् जाते रित्यत्रातिव्याप्तिं निराकर्तुं- प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वस्य तादृश प्रतियोगितावच्छेदकतात्वावच्छिन्न प्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदक- रूपवृत्तिनिरूपकताधिकरणत्वाभाववत्त्वस्य प्रतिपादनेन पूर्वोक्तदोषस्य निरास: संभवत्येवेति निश्चयं प्रतीम:। एवं च तादृशघटत्वघटित समुदायत्वावच्छि्न् निरूपकताधिकरणत्वाभावस्य महानसादौ वर्तमानत्वेन नास्ति कथमसम्भव:।

तथापि तादृशोभयाभावीय प्रतियोगिताया: तदवच्छेदकत्वेन तादृशोभयत्व घटित समुदायत्वावच्छिन्नाधिकरणत्वाप्रसिद्धया नितरामसम्भव दोषस्य तादवस्थ्यमेवेति सत्यभाभाति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न च प्रतियोगिताव्च्छेदक स्वरूपमेव प्रतियोगिताय: तर्हि कथं पूर्वोक्त दोष इतिवाच्यम्, समवायेन वह्ने: साध्यत्वेधूमादि हेतावव्याप्तिदोष प्रसङ्गात्।

समवायसम्बन्धावच्छिन्न प्रतियोगिताकाभावस्य वह्नि स्वरूप त्वेन तादृश प्रतियोगित्वस्य समवाय विशिष्ट संयोगस्याप्यस्ति तथा च स्वावच्छेदकीभूतसमवाय सम्बन्धेन हेत्वधिकरणस्य प्रतियोग्यनधिकरणविरहात् ।

सम्बन्धसामान्येन प्रतियोग्यनधिकरणत्व विवक्षणेन तन्निराकर्तुं भवति चेत् संयोगेन वह्नि साध्यके धूमादिहेतावव्याप्ति: स्यादेवेति सत्यभाभाति। तादृश वहन्यभावस्य समवायेन प्रयोगिव्यधिकरणस्य वह्नित्वरूप प्रतियोगित्वस्य संयोगसम्बन्धावच्छिन्नत्वात् । तादृशावस्थायां तथात्वेन निवेश प्रकार: व्याख्येय: तार्किक प्रकाण्ड पण्डितै:। अतएव-यदभावीय यत्प्रतियोगितावच्छेदकसम्बन्धेन यदभावीय यत् प्रतियोगितानिरूपितावच्छेदकीभूत धर्मावच्छिन्नासम्बन्धित्वंहेतुभत: तदभावीयतप्रतियोगिता निरूपितावच्छेदकता शून्यत्वंसाध्यतावच्छेदके प्रवेश्यं तेन नावकाश: पूर्वोक्तदोषस्य। प्रतियोगिताव्चछेदकरूपस्य प्रतियोगित्वे च यदभावीय यादृश प्रतियोगितावच्छेदक सम्बन्धेन तदभावीय तादृ-श प्रतियोगित्ववच्छिन्नानधिकरणत्वं हेत्वधिकरणस्येति विवक्षते सति प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वप्रवेशस्य वैयर्थ्यमितितु सत्यमाभाति, परन्तु वह्नि धूमोभयवान् वह्नेरित्यादावतिव्याप्त्यपत्ते:। कथंतु हेतुमात्रस्यैव वह्निधूमोभयत्वावच्छिन्नाभाव प्रतियोगित्वावच्छिन्नानधिकरणत्वादिति गुरुचरणानां विचारविमर्श:।

समवायेन धूाधिकरण धूमावयवभादाय वह्निमान् धूमादित्यादावपि नितरामव्याप्तिं निराकर्तुं न्यूनवारक पर्याप्ति निवेश: परमावश्यक एवाभाति। एवं च—

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्रव्यत्व साध्यक समवायेन सत्त्वादि हेतौ घटानुयोगिक समवायेन सत्वाधिकरणे साध्याभाव विरहा दतिव्याप्ति निरासायइतर वारक पर्याप्ति निवेशस्यौ चित्यं सुतरां परमावश्यकं प्रतिभाति। तथाच हेतुतावच्छेदक संसर्गतावच्छेदकतात्वावच्छिन्न प्रतियोगिताक पर्याप्त्यनुयोगिताव्चछेदक रूप वृत्तियन्निरूपकत्वं तन्निरूपिताधिकरणत्व प्रवेशस्यावश्यकत्वं परमावश्यकभाभाति। रूपवृत्तित्वंच तादृश निरूपकतायांतु- स्वावच्छेदक संसर्गतावच्छेदकतात्त्वावच्छिन्न प्रतियोगिताक पर्याप्त्यनु योगितावच्छेदकत्व सम्बन्धेनेति विज्ञेयम् ।

अतएव धूमवान् वह्नेरित्यादौ महानसीय संयोगेन सद्धेतु स्थले संयोग मात्र सम्बन्धेन हेतुमति तादृशाभाव मादायतथाऽव्याप्तिः पतति। एवं च द्रव्यत्व साध्यक घटानुयोगिक समवायेन सत्त्वादि हेतौ समवाय सम्बन्धमात्रेण समागताऽव्याप्तिनिरसितुं शिरोमणिः दीपितौ विशेष निवेश प्रकारं प्रोवाच यत् ग्राह्येति।

ग्राह्य सामानाधिकरण्ये हेतो र्यादृशः सम्बन्धः प्रविष्टःतेन सम्बन्धेन यो हेतुमान् तत्र वर्तमानत्वमभावस्य, साध्यस्य च यादृशः सम्बन्धः प्रविष्टस्तत् सम्बन्धावच्छिन्नायाश्च प्रतियोगिताया अनवच्छेदकत्वं वोध्यम् । तेन धूम समवायि निष्ठाभावस्य संयोगावच्छिन्न प्रतियोगिताया, धूम संयोगि निष्ठाभावस्य च समवायावच्छिन्न प्रतियोगिताया, धूम संयोगि निष्ठाभावस्य च समवायावच्छिन्न प्रतियोगिताया अनवच्छेदकत्वेऽपिन वह्नित्वस्य क्षतिः।

हेत्वधिकरणे तादृशसंयोगेन वहन्य भावस्य विद्यमानत्वेन वह्निमान् धूमादित्यादौ तथाऽव्याप्तिः। अतएव यादृशः सम्बन्ध इत्युक्तम् । एवं महानसीय संयोगेन वह्नेः साध्यत्वे धूमादि हेतौधूमाधिकरणे संयोगेन वहन्यभाव विरहेणाभावान्तरमादायातिव्याप्तिव्याप्ति निरासाय न्यून

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वारकपर्याप्तिनिवेशः परमावश्यकः प्रतिभाति। अतएव साध्यतावच्छेदक संसर्गतावच्छेदकतात्वावच्छिन्न प्रतियोगिताक पर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिर्या प्रतियोगिता तादृश प्रतियोगिताकाभावो-विवक्षणीयः। रूपवृत्तित्वंच- प्रतियोगितायां- स्वावच्छेदकतात्वावच्छिन्न प्रतियोगितापर्याप्त्यनुयोगितावच्छेदकेत्व संसर्गतावच्छेदक सम्बन्धेन। तेन धूमसमवायि निष्ठाभावस्य संयोग संबन्धावच्छिन्न प्रतियोगितायाः, धूमसंयोगिनिष्ठाभावस्य च समवाययावच्छिन्न प्रतियोगितायाः सुतरामवच्छेदकत्वेऽपि वह्नित्वस्य नकापि क्षतिः दृष्टि पथे समायाति।

अथ च तादात्म्य सम्बन्धेन गवादेः साध्यत्वे सास्नादि हेताव व्याप्तिः। साधनवन्निष्ठान्योन्याभावीय प्रतियोगितायाः साध्यतावच्छेदक तादात्म्य सम्बन्धा वच्छिन्नत्वस्य प्रमाणाभावतया अत्यन्ताभाव प्रतियोगितायां सम्बन्धावच्छिन्नत्व साधकस्य प्रतिबध्य प्रतिबन्धक भावाद्यनुपपत्त्यादेः भेदस्थलेसमागमनाऽसम्भवात् । तथा च सम्बन्धस्यैक प्रतियोगिकत्वा परानुयोगिकत्व नियममर्यादया तादात्म्यस्य सम्बन्धलाभावात् । घटोद्रव्यं चेत्याकारक शाब्द प्रतीत्यनुरोधेन प्रकारतायां तादात्म्यसम्बन्धावच्छिन्नत्वेऽपि तादृश प्रतियोगितायां तदभ्युपगमस्याऽप्रामाणिकत्वमेवेति विदुषां संमतमेवेति साधीयः।

एवं धनी चैत्रत्वादित्यादिस्थले स्वाभित्वसम्बन्धस्यवृत्त्यनियामकत्वेन धनादेः साध्यतायां तादृश सम्बन्धावच्छिन्नप्रतियोगित्वस्याऽप्रद्धित्वात् । तेन यदवेतिकल्यानुशरणमिति। वौद्धाध्यधिकार टिप्पण्यां प्रतिपादनतया वृत्त्यनियामक स्वामित्वसम्बन्धस्य प्रतियोगिता वच्छेदकत्वे मानाभावत्वस्य दर्शनेपितत्र विवाद ग्रस्ततत्वमेव विदुषां विचारमार्गः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अतः- अन्योन्याभावत्वमखण्डोपाधिरवे यथा ध्वंसत्वादिकम् । तथाच प्रतियोगितावच्छेदक सम्बन्धेन तद्वैयधिकरण्यंप्रवेश्य तत्रैव प्रतियोगितायां साध्यतावच्छेदक सम्बन्धावाच्छन्नत्व प्रतिपादने गुरुत्वमेव समायततीत्यतो यद्वेति कल्यानुसरणस्यवीजमाभाति। अतएव शिरोमणिः-

साध्यतावच्छेदक सम्बन्धेन प्रतियोग्यसम्बन्धित्वं हेतुमतोवक्तव्यम् , तेन सम्बन्ध भेदेन प्रतियोगिता न विशेषणीया।

ननु–

साध्यसाधनयोः सम्बन्ध विशेषप्रभावतया सामानाधिकरण्यप्रवेशे तादात्म्य सम्बन्धेन हेतु साध्यभावे तेन सम्बन्धेन साध्य हेत्वोः तदधिकरणाऽप्रसिद्धयाऽव्याप्तिः। तेन समानाधिकरण्या प्रसिद्धेः। एवं स्थिते सामानाधिकरण्यादौ सम्बन्धित्वं निवेशनीयम् । नत्वधिकरणत्वम् ।

तथा च तत्र सम्बन्धित्वं प्रवेश्य संसर्गेण तादात्म्येन सति व्यापकत्वे तादृशसाध्यतावच्छेदकसम्बन्धेन साध्याधिकरणाऽप्रसिद्धया दीधितौ तथोत्युक्तम् ।

तथा च साध्य सामानाधिकरण्यं साध्यसम्बन्धित्वम् । तथाभावस्य हेतुसामानाधिकरण्यमपि हेतुसम्बन्धिवृत्तित्वम् -तदेवादि पदेन ग्राह्यम् । वृत्तित्वमपि सम्बन्धित्वं ग्राह्यम् । अन्यथा वृत्यनियामकव्यभिचारित्व सम्बन्धावच्छिन्नप्रतियोगिताकार्द्रेन्धनाभावे साध्ये वृत्तित्वाऽतिव्याप्यत्वा पत्तेः। तथा च गौः ṣास्नावत्त्वात्'' वह्निमान् धूमादित्यादौतादात्म्य सम्बन्धेन व्यापकताव्याप्यतापि संगच्छते ।

एवं च- तादात्म्य सम्बन्धेन धूम सम्बन्धिनि महान से विद्यमानस्यऽन्योन्याभावस्य तादात्म्य सम्बन्धावच्छिन्ना या प्रतियोगिता

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तदनवच्छेदक वह्निमत्त्वावच्छिन्नस्य वह्निमतः तस्य तादात्म्येन सम्बन्धिनि महानसे धूमवतः तादात्म्येन सम्बन्धित्वस्य कथनेन न कोपि दोषावकाशः प्रतिभाति। केचित्तु परम्परासम्बन्धेन वह्नित्वस्यैव वह्निभत्त्वात् । तदनवच्छेदकेत्यस्य तदवच्छेदकतानवच्छेदक वह्नित्वावच्छिन्नेत्यर्थकत्वा-दवेत्या हुः।

द्रव्यं घटपटोभयस्मादित्यत्र तादात्म्येन हेतुत्वे क्वापि हेतौ द्रव्यं नेत्याकारक भेदस्यासत्वात्, नितान्तमतिव्याप्तिदोषःसमापतति। हेतुमन्निष्ठेत्यस्य कथनेन हेत्वधिकरणाप्रसिद्धया नितरामतिव्याप्तिदोषः समापतत्येवेति निश्चयः।

अतएव शिरोमणिः पूर्वोक्तयोः व्याप्यत्व भावं समुपपाद्य वहन्यादि धर्मस्य व्यापकत्वं धूमस्य व्याप्यत्वं विद्यत एवेति विधिमुखेन प्रदर्शन मुखेन चाह शिरोमणिः दीधितौ एवमिति।

द्रव्यं घटपटोभयस्मादित्यत्र तादात्य सम्बन्धेन हेतुत्वेन्निष्ठेति प्रतिपादने हेत्वधिकरणस्याऽप्रसिद्धया नाति व्याप्तिशङ्कावतारः। तदुभयोर्व्याप्यव्यापक भावं प्रतिपाद्य वह्न्यादिरूपधर्मव्याप्यत्वस्य तादृश धर्म व्याप्यकत्वस्यच तथात्वं संभवति। अतएव दीधितौ शिरोमणिः नितान्तमचीकथत् - यत् जलादीनां पृथिवीत्वाभाव व्याप्यत्वं तत्रोक्तं संगच्छते।

तथा च येन सम्बन्धेन हेतो र्व्याप्यत्वं गृह्यते तेन सम्बन्धेन तस्य यादृशेन सम्बन्धेन पक्षविशिष्टज्ञाने साध्यस्य व्यापकत्वं जायते तेनैव रूपेण साध्यपक्षयोः विशिष्टानुमतिः जायतएवेति निश्चीयते ।

तेन कारणेन संयोगादि सम्बन्धेन धूमावयवे किं वा समवायेन सम्बन्धेन पर्वते वह्निज्ञानंन संमवति। तथा च- अनुगत व्यापकता घटक

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सम्बन्धेन व्यापकाभाव ग्रहे संजातेअनुगत व्यापकता घटक सम्बन्धेन व्याप्यत्वाभावः सुतरां सिद्धयति। अन्यथा समवायेन वहन्यभाव विशिष्टे महानसे संयोगेन, किं वा संयोगेन वह्निविरहिणि स्वावयवे धूमः समवायेन नैव निवर्तते, यदि च निवर्तते संयोगादि सम्बन्धेन वह्नि विरहिणि संयोगेन स्वावयवे समुजपाद्य नियमः, तथाचजलादिपदार्थलसितानां व्याप्यत्व ग्रहदशायांव्यापकत्व ग्रह प्रतिषेधेन तेषामभावः तादात्म्य सम्बन्धेनैव भवेदेवेति सर्वसम्मतः। अतः तस्यामेवावस्थायां तथाचाऽन्योन्याभावः संजायते। एवं रीत्या तादात्म्य सम्बन्धेन वृक्षशिंशपयोर्व्याप्ति निश्चयस्य प्रामाण्यं संगच्छतएवेति वृद्धानां विचार मार्गः।

गोत्वनिरूपित व्याप्तिज्ञानेन समवायेन निरवच्छिन्न गोत्वसाध्यकानुमितेः जायमान तयातद्भिन्न विषयकानुमितेरसम्भवात् गौरियमनुमिति गवेतारावृत्तित्वरूपायाः दर्शनात् साध्यवदन्यवृत्तित्वरूपायाः व्याप्तेः अनुमितिहेतुत्वस्यैव वक्तव्यतया तदनुरोधादेव तादृशधर्मव्यापकत्वं धर्मिणोस्वीकारः समुतरामनुचितएवेत्यतो गोत्वेति।

अन्येतु— गोत्वत्वात्मकसाध्यतावच्छेदकानुपस्थित्या गोत्वसाध्यकानुमित्यौपयिकव्याप्तेर्दुग्रहतया गोत्वसाध्यकानुमित्यसम्भवेनायं गौरित्याकारकानुमितेरपलापेन गोत्वविशिष्ट साध्यत्वमावश्यकम् ।

नन्वत्र गोः साध्यत्वेऽपि गोत्वत्वं धर्मितावच्छेदकीकृत्यव्यापकत्व-मनुमिति हेतुः वक्तत्यः। तदस्वीकारे व्यभिचारस्य हेत्वाभासत्वानुपपत्तेः। एवं च गोत्वत्वाद्यनुपस्थितदशायां धर्मितावच्छेदक प्रकारक ज्ञानाभावेन व्यापकतावच्छेदकत्वज्ञानाभावात् नैव जायते। अतएव वक्ष्यमाण प्रतियोगिताधर्मिकोभयाभाव घटितलक्षणाभि प्रायेणेदमभिहितम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ च स्वरूपतः साध्यतावच्छेद प्रकारकोभयाभावावगाहित् ज्ञानस्य हेतुत्वेन गोत्वत्व ज्ञानानपेक्षणात् । स्वरूपतो गोत्वविधेयकत्वाऽसम्भवात् । व्यापकसामानाधिकरण्यं ज्ञानं यद्धर्मिणि व्यापकतावच्छेदकत्वमवगाहते तद्धर्भ प्रकारेण साध्यानुमितौ कारणम्, तदनुस्वरूपत साध्यानुमितौ कारणं सम्पदयेत। गोत्वावच्छिन्न विधेयताकानुमितिं प्रति गोत्वनिष्ठनिखच्छिन्न विशेष्यताकमेव प्रतियोगितानवच्छेदकत्व ज्ञानं हेतुः, अतो गोत्वत्वाग्रहेऽपि गोत्वेसास्नादिव्यापकतावच्छेदकत्वग्रहसम्भवात् गोसाध्यकानुमिते र्नानुपपत्तिः।

तादृशाभावलौकिकप्रत्यक्षे तादृशाधिकरणतावच्छेदक स्वरूप सम्बन्धेन तदुपस्थिते र्हेतुत्वात् । तन्न श्रेयान् पन्थाः विद्यते केषां नव्यनैयायिकानां कृते। व्यभिचार ज्ञानाप्रतिबध्यतया तादृशव्यापकताग्रहस्यानुमित्य हेतुत्वादिति तर्कालङ्काराणां विचार विमर्शः।

अन्यथा तुल्ययुत्त्या गोत्वविधेयकानुमिर्तिं प्रति निखच्छिन्नत्वविशिष्ट गोत्वविशेष्यताकस्य प्रतियोग्यनधिकरण हेत्वधिकरण वृत्यभाव प्रतियोगित्व ज्ञानस्य हेतुत्वेनायं गौरित्याकारकानुभितेः गोत्वत्वाद्यनुपस्थितदशायां गोत्वसाध्यकत्वस्य दुर्वारापत्तित्वस्य सर्वसम्भततया द्रष्टव्यमेवेति निश्चयः।

अत्रेदं तत्त्वमिदं विज्ञातव्यमनेन विदुषा यत् सास्नाव्यापकत्व ग्रमह्यर्यादया गोत्वमूलभूत पदार्थस्य सिद्धि र्भवेदेति सत्यमामाति तदनुरोध प्रावल्यादेव व्यापकत्वस्य स्वीकृतिः परमावश्यकी विद्यतएवेति निश्चयः। तद् गत व्यापकत्व ग्रहेणैव तस्यापि व्यापकत्व स्वीकारः समुचितः। तात्पर्य मिदमाधृत्य सम्बन्धगतव्यापकत्व प्रभादेव सम्बन्धिनः ताहशानुमितिः तर्कताण्डव प्रधान गुरुणाश्रीमता मिश्रमहाभागेन चोररीकृता। अतएव तादृशस्थलीयानुमितिः लौकिक वैदिक प्रमाण परिपुष्टत्वेन परमावश्यकीति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निश्चीयते तर्क शिरोमणिश्रीमता मिश्र महाभागेन न्यायतत्त्वविदा।

तत्र चिन्ताबीजं कथं समुपपादि तर्कालङ्कारेण तर्क प्रधान पण्डितेनेति। किन्तु तत्राभ्यन्तर पतितचिन्तावीजस्यमूलत्वं नैव विज्ञायते तर्कतत्त्वविदा महता तार्किकेणेत्यनुसन्धनविषयस्य आर्थसमाजग्रस्तत्व मेवेति।

एवंच गोतादात्म्यस्य गोत्वरूपत्वेन् तेनैव रूपेण व्यापकत्वग्रहे गोत्वत्वग्रहस्य स्वीकृतिः किं प्रमाण तर्काभ्यां सम्मिलितास्तिनवेति विवादास्यद्भादधाति। प्रमाणतर्काभाससम्मतत्वादित्यनुसन्धेय विषयः तार्किक महीमण्डले।

तादात्म्यस्यातिरिक्तत्वमस्तिनवेंति चिन्त्योयमिति वृद्धाः भाजन्तेतराम् । अतएव तादत्म्यादि सम्बन्धेन वहन्यादेः साध्यवे तद्रूपाहेतौ हेत्वधिकरणाभावस्य प्रतियोगिनः तदवच्छेदकतादात्म्य सम्बन्धेन तत् सम्बन्धि पदार्थस्याऽप्रसिद्धयाऽतिव्याप्तिः तत्र स्थिरा भवेदेवेति विचारचतुरी विदुषाम् ।

तच्चिन्त्यमिति कथनं युक्ति थुकाभाति। कथंतु- तादात्म्य सम्बन्धेन संजाते व्यापकत्व ग्रहे संसर्गमर्यादा वैलक्षण्येन प्रकारमर्यादयावा तादात्म्यग्रहवैशिष्टयेन कथं तादात्म्यत्वाद्यग्रहस्यसम्भावना वर्ततेनवेति विचिन्त्योयं विषयः समुपसर्यति।

धर्मगत व्यापक प्रभावात् तज्ज्ञानाद्वा तद्धर्भविषयिणीनितान्तमनुमितिः सर्वानुभवसिद्धा विद्यतेनवेति तार्किक समुदाये विवादास्यदत्वमादाधाति।

गोतत्त्वाग्रहदशायां यत्र सास्नायाः प्रतीतिर्जायते तत्रैगोत्वव्यवहारः सम्पद्यते नान्यत्र । तादात्म्य सम्बन्धेन गविव्यापकत्व ग्रहे संजाते सास्नादिना तत्रैव गोत्वव्यवहारः नान्यत्र । तादात्म्यसंसर्गवैलक्षण्य प्रभावमाहात्म्येन

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गोर्व्यतिरेक प्रभाववैशिष्टस्येन सास्नादि व्यतिरेकसिद्धयति । इति दीधिति काराणांविचार मार्गः। अन्येषां विचार पक्षमवलम्ब्य तदपरमार्गें चाङ्गीकृत्य वृद्धाः स्वकीय विचार भेदं स्वीकृत्य तन्निराकर्तुं स्वकीयाङ्गीकृत राद्धान्तस्य वैफल्यं विच्छिद्य साफल्य माकलयितुं मणिकारस्य विचारपन्थाः नितान्तं सर्वदा समादरणीय एव।

मणिकृत निवेश प्रवेशभ्यां सम्पादिताव्याप्तिः तथातिव्याप्त्य सम्भवदोषाणां निरासेन पूर्वोक्तादि स्थले लक्षण संगमन प्रकारस्य प्रयासः सर्वदा सर्वेथा संस्तुत्य एवेतिश्रेयान् पन्थाः। हेतुनागुना प्रकारेणायां गौः, अयं गोतादात्म्यवान् -इत्याकारण प्रकारद्वयविषयताशालित्वेन तदापत्तिरितितात्पर्यमाधृत्य श्रीमता तर्कालङ्कारेण प्रत्यापादि यत् चिन्ता वीजमिति।

अत्रेदं तत्त्वमाभाति यत् सामानाधिकरण्यस्य सम्बन्धित्व प्रवेशेसति संयोगमात्रस्य संयोगत्वेन प्रतियोगितावच्छेदक सम्बन्धत्वे वृत्यनियामक संयोगस्यापि सर्वतन्त्रसिद्धमेवेत्यतोमात्रपदं व्याचष्टे ग्रन्थकारः। अन्यथा तदनुपादाने तादृश प्रतियोगिताकाभावाऽप्रसिद्धया पृथिवीत्व व्यापकत्वस्य गगनादेः दुर्घटमेवेत्यतो तत्सम्बन्धानां संजातेऽपि प्रतियोगितानवच्छेदकत्वे द्वितीयकल्पानुसारेण व्यापकलक्षणं संघटयति।

तेन सम्बन्धान्तरेण घटाभावमादाय लक्षण समन्वयो विधेयः। अतएव द्रव्यत्वाव्याप्यत्वं संयोगेन नगनोदरपि भवेदेवेति नात्र शंकावतारकथा क्वचिदपि जायतएवेति निश्चप्रचम् ।

तथा च द्रव्यं गगनादित्यत्र गगनस्यादेरप्रसिद्धया संयोगेनगगन वृत्तित्वस्य तादृशाभावे एवं गगने च साध्यवत् सम्बन्धित्वस्य वितंरा प्रसिद्धत्वेन यथोक्त लक्षणस्यनाव्याप्तिशंकावतारकथावरीवर्ति। वृत्यनियामक

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संयोगमात्रस्य तादृशाभावप्रतियोगितावच्छेदकसम्बन्धत्वे प्रतियोग्य सम्बन्धित्वसम्पादने पृथिवीत्ववन्निष्ठाभाव प्रतियोगितानवच्छेदक धर्मवत्त्व व्यापकत्वस्यापि संजातत्वमपि भवेदेवेति निश्चयः।

तथाच तादृश गगनाभावस्य साध्यतावच्छेदक सम्बन्धेन प्रतियोग्य सम्बन्धिहेतावधिकरण निष्ठामावान्तरं स्वीकृत्य लक्षणसमन्वयोविधेयः।

अतएव तेन सम्बन्धेन तादृश सम्बन्धत्वरूप साध्यसामानाधिकरण्या प्रसिद्धयानावकाशः पूर्वोक्त दोषाणामिति ग्रन्थकाराणां तात्पर्यमितिवेवेद्धि।

तेन शिरोमणिः तत्त्वमिदमवलम्ब्य व्याचष्टे-तादृश सम्बन्धघटित सामानाधिकरण्यस्य परामर्शाघटितत्वेऽपिवृत्यनियामक संयोगघटित साध्य सामानाधिकरण्यावगाहि परामर्शाद वृत्तिनियामक संयोगेन गगनानुमितौ वाधकाभावात् ।

हेतुसाध्ययोः कस्मिन्नपि परामर्शे सामानाधिकरण्यं भासते ते नैव सम्बन्धेन साध्यानुमितेः फलं प्रतिभाति।

तदंशे संबन्धविशेषनिवेशस्याऽनङ्गीकारमते निर्दिशति, अव्यापकत्वाच्चति'' तेन येन सम्बन्धेन साध्यस्य व्यापकत्वं हेतोः गृह्यते तेनैव संबन्धेन साध्यासिद्धिः फलं भवत्येवेतिनिश्चयः। अतएव वृत्तिनियामक सम्बन्धेन साध्यस्य हेतु व्यापकत्वासम्भवादेव न प्रभानुमितिः साध्यस्य संजायते ।

तादृश सम्बन्धेन गगन सम्बन्ध्याप्रसिद्धया गगनाभावस्य प्रतियोगिव्यधिकरणत्वाभावात् । तेन तादृश प्रतियोगित्वस्य गगनादावसत्वा दित्यतो शिरोमणिः व्याचष्टे मूले अव्यापकत्वादिति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वृत्तिनियामक सम्बन्धेन गगनाभावेऽपि प्रतियोग्यसामानाधिकरण्यं गगनाभावेऽपि भविष्यत्येव। कालिकसम्बन्धेन गोत्वादौ साध्ये कालोपाधिमात्रवृत्ति घठादि हेतौ नाव्याप्ति शंकावतारः। विभिन्नकालीनत्तद् व्यक्तित्वावच्छिन्नाभावस्य घठादौहेतौ प्रतियोगिवैयधिकरण्यसम्भवात् । अतएवोक्तं यत् - अष्ट द्रव्येति। खण्डकालस्यापि विभिन्न कालीन तद् व्यत्तित्वाववच्छिन्नाभाव स्यैवघटादौ प्रतियोगिवैयधिकरण्यसम्भवात् । अतएवोक्तं- तादृश स्पन्दत्वादि हेतौ नाव्याप्तिस्तेन चरमपदम् ।

कालिक सम्बन्धेन घटादि साध्यक महाकालत्व हेतौ तथा प्रसिद्ध निबन्धनभव्याप्तिमाशङ्कते दीधितौ ननु।

तथा च गोत्ववान् घटत्वादित्यत्र कालत्वस्य हेतुत्वं न संभवति अष्ट द्रव्यातिरिक्त द्रव्यात्मककाल वृत्तित्वाभावात् । तथोक्त दिशा तादृश कालत्वादावपि नाव्याप्तिरतो मात्रपदमुपात्तम् । स्वरूप सम्बन्धेन हेतोर्लाभाय धर्मपदम् । अन्यथाकालिक सम्बन्धेन महाकालाधिकरणे घटादौ प्रतियोगिव्यधिकरणाऽप्रसिद्धयाऽतीत तत्तत्तदयक्तित्वावच्छिन्नाभाव प्रसिद्धयानाव्याप्तिः। तादृशधर्मस्य महाकालत्वादे समवायादि सम्बन्धेन व्यापकत्वं सुलभमेवेत्यतो विशेषणेति। व्याप्यवृत्ति प्रमेयत्वस्य प्रतियोगिवैयधिकरण्याघटितत्वेन कालिक सम्बन्धेन व्यापकत्वं भवेदेवे त्यतो (विशेषणतेत्युक्तम्) - अव्याप्यवृत्तीति।

तादृश साध्यस्याधिकरणे काले तदनधिकरण देशावच्छेदेन कालिक सम्बन्धावच्छिन्नाभावतया एवंविधस्य वाच्यत्वस्य तदनधिकरण देशावच्छेदेन तदभावस्य काले, असम्भवात् ।

अतएव कालोघटवान् महाकालत्वादित्यत्र व्याप्तिलक्षणाऽव्याप्तिन्न तेन तत्र दोषं संघटते। प्रतियोगितावच्छेदक सम्बन्धेन

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रतियोगिनोऽसम्बन्धिनि महाकाले विद्यामस्याभावस्य तदीय प्रतियोगितायां साध्यतावच्छेदकी भूत कालिक सम्बन्धावच्छिन्नत्वस्यतेन सम्बन्धेन प्रतियोगिसम्बन्धि तद्भिन्नत्वस्यकाले महाकाले असम्वात् । कालिक सम्बन्धेन वृत्तिमात्रस्य वृत्तेः। अवृत्तिगगनस्य पूर्वोक्त सम्बन्धेन सम्बन्धिनोऽप्रसिद्धयाकस्यापि कालिक सम्बन्धावच्छिन्न प्रतियोगिताकाभावस्य प्रतियोगितावच्छेदक सम्बन्धेन प्रतियोग्यसम्बन्धिहेतुमदवृत्तित्वासम्वात् । समवाय सम्बन्धावच्छिन्न प्रतियोगिताकाभावस्यतथा घटाभावस्य तथात्वेपि तत्प्रतियोगितायाः साध्यतावच्छेदकीभूत कालिक सम्बन्धानवच्छेद्यत्वात् ।

अतएव पूर्वोक्तस्थले समापतति अव्याप्तिदोषः। तदपर विवक्षानुसारेण—

साध्यतावच्छेदक सम्बन्धेन प्रतियोग्यसम्बन्धि हेतुमद्वृत्यभावीय सम्बन्धावच्छिन्नत्वविशेषित प्रतियोगितानिवेशकल्येन तादृश दोषस्य निरासं विधातुं प्रयतते ग्रन्थकारः। तर्थालङ्कारऽपि तमेवपक्षं स्वीकर्तुं तत् प्रदर्शित पथे न समुपप्रादयितुं शिरोमणि प्रदर्शितमार्गं नितान्तं सदास्वीकुरुते। अन्यथा पूर्वोक्त दोषस्य निराश मार्गः गगन कुसुमायमान एवाऽमाति। अतः वृद्धगुरुणां विचारचातुरी सदा सफलाजायत एवेति ध्रुवं प्रमाण प्रत्ययादिना सम्भतमेवेति सत्यम् ।

गगनाध्यभाव प्रतियोगि सम्बन्धेन तत्प्रतियोग्य प्रसिद्धया तथात्व सम्बन्धित्वं सुस्पष्टयितुं प्रतियोग्यसम्बन्धित्वमनभि धाययत् प्रतियोगि सम्बन्धित्वं तदन्यत्वंवेति विविच्य स्वाभिमतं व्याचष्टुं निर्दिशति मणिकारः अथेति।

यदि प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभाव प्रतियोगितानवच्छेदक

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

साध्यतावच्छेदकावच्छिन्न सामानाधिकरण हेतुमान् पक्ष इति निरुप्यनिरुपक भावोयन्न विषता शालिज्ञान सम्भूता भवति चेत्तदा अभ्रात पुरुष समवेतान भवेदि त्याद्यापादयापादक भावस्यैव प्रकृते शंक्रान्तत्वे नैव सम्भवात्, तथा तादृश व्याप्ति समवहितत्वस्याऽप्रसिद्धत्वेनापि निरुप्यनिरूप भावायन्त्र प्रकृत विषयता विशिष्ट विषतासमानारकारक ज्ञानीय विषयत्वस्यैवोपरजनक विशेषणस्य प्रतिपादनभावश्यकमिति गुरुचरणानां विमर्शः।

अतएवोक्तं तत्त्वविदा महाभागेन यत् ग्रन्थोऽयमनुमान परः-तथाहि- अव्याप्य वृत्ति पदार्थः अष्ट द्रव्यातिरिक्त द्रव्यात्मकालमात्रवृत्ति धर्मनिरूपित प्रतियोगिवैयधिकरण्य घटित व्यापकत्व प्रकारक ज्ञानीय विशेष्यताभाववान् साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वा भाववृत्ति तादृश धर्मकालीनऽव्याप्य वृत्तिपदार्थत्वात् । विशेष्यत्वाभावश्च प्रमीयविशेष्यत्वीय स्वरूप सम्बन्धावच्छिन्न प्रतियोगिताकः प्रभात्वं सर्वांशे भिन्नत्वम् । हेतुघटक वृत्तित्वं च धर्मे स्वाश्रयवृत्ति प्रतियोगितात्व व्यापकत्व सम्बन्धेन । प्रतियोगित्वे स्वाधिकरण वृत्तित्वं च-

स्वावच्छेदकसम्बन्धावच्छिन्नत्वस्वावच्छेदकावच्छिन्न निरूपकता-काधिकरणत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्व सम्बन्धेन।

द्वितीय हेतुश्च प्रतियोगितात्वव्यापक तादृश धर्माधिकरणावृत्तित्व कालीनाऽव्याप्यवृत्ति पदार्थत्वम् ।

तादृश धर्माधिकरणाऽवृत्तित्वं च साध्यतावच्छेदक सम्बन्धावच्छिन्न स्वावच्छेदकावच्छिन्नाधिकरणत्व सम्बन्धावच्छिन्नत्वनिष्ठावच्छेदकताक प्रतियोगिताक भेदवत्व सम्बन्धेन। एतादृश परिष्कार निर्वचन परम्परया पूर्वोक्त पदार्थतत्त्व प्रतिपादनतया तादृश प्रतियोगिसम्बन्धि भिन्नत्व

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

व्याख्यानेन पूर्वोक्त दोषाणाभवकाशोनहि सम्भाव्यते स्वप्नवेलायां तथावसरः समागच्छेदत् ।

घटे महाकालान्यत्व विशिष्ट वैशिष्ठयं सामानाधिकरण्यसम्बन्धेन, तच्च स्वरूपेण महाकालान्यत्वाधिकरणे कालिकेन वृत्तित्वरूपम् । एवं च सामानाधिकरण्य घटकविशेषणविशेष्योभयसम्बन्धाभ्यां तदुभयवत्त्वस्य विशिष्टवत्त्वनियामकतया महाकालेमहाकालान्यत्वविशिष्ट घटत्वा सम्भवात्।

तथा च मूले महाकालन्यत्व विशिष्ट घटाभाव एव महाकाले प्रतियोगिव्यधिकरणः सुलभएवेति निश्चयः।

तथा च महाकालान्यनिरूपित कालिकसम्बन्धावच्छिन्न वृत्तित्व रूपं महाकालान्यवृत्तित्वविशिष्टघटे र्वतत एवेति पर्यवसन्नम् । न चात्र विशेषणता विशेष सम्बन्धेन महाकाल निरूपित विशेषणतायाः विवक्षितत्वात् किन्तु महाकालानुयोगिक कालिक सम्बन्धेन विवक्षितत्वात् प्रतिपादित प्रतियोगिक वैयधिकरण्याऽप्रसिद्धयैवोक्ताभावस्यापि प्रतियोगिवैयधिकरण्या सम्भव इति वाच्यम् । कालमात्र वृत्ति धर्मस्य तादृश विशेषणतया कस्यापि व्यापकत्वं न स्यादिति तात्पर्यं समवधाय तथाष्ट द्रव्यातिरिक्तामिधानस्य सन्दर्भ-विरोधापत्तेः। यदि स्वरूप सम्बन्ध स्वरूप सम्बन्धेन गगनादेर्वृत्तिमत्त्वं स्वीकुरुते तदा तादृश सम्बन्धसामान्ये महाकालान्यत्वविशिष्टघटत्वावच्छिन्न-प्रतियोगिताकत्वाभावस्य परिलक्षितत्त्वेन तादृश घटाभावस्य प्रतिपादित क्रूमेण प्रतियोगिवैयधिकरण्यस्यैव युक्तियुक्ततया समुल्लिखितस्यैव समीचीनत्वमिति जायान् पक्षः।

तथापि महाकालानुयोगिकेन गोत्वादिसाध्यक घटादि कालोपाधिमात्रघटत्वादेर्महाकालानुयोगिक कालिको हेतौ नितरामव्याप्ति सम्भवतया महाकालत्व पर्यन्तानुधावनस्यैव सन्दर्भ विरोध एव समुचितः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अत्रेदं किमपि विचार्यते यत् हेत्वधिकरणे विद्यमानस्याभावस्य प्रतियोगिव्यधिकरणत्वेनविशेषणीयत्वं परमावश्यकमाभाति। तेन प्रतियोगिनो यदधिकरणं तद् भिन्नं यदधिकरणं यस्याभावस्य तादृशोभावो वक्तव्यः। अतएव प्रतियोगिव्यधिकरणहेतुतावच्छेदकावच्छिन्न हेतुतावच्छेदक सम्बन्धावच्छिन्नहेत्वाधिकरणवृत्यभावीयप्रातियोगितानवच्छेदक साध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिलक्षणमवसेयम् ।

कपिसंयोगी एतद् वृक्षत्वादित्यादावपि हेतुतावच्छेदक स्वरूप सम्बन्धेन हेत्वधिकरणे वृक्षे कपिसंयोगानाभीवीय प्रतियोगितायाः साध्येसत्त्वेऽपि तत्रत्य हेतौ नाव्याप्तिशंकावतारः।

एकस्मिन्नेववृक्षे शाखावच्छेदेनकपिसंयोगस्य सत्त्वेऽपि मूलावच्छेदेन तदभावोप्यस्त्येव। प्रतियोगिव्यधिकरणत्वं यदि प्रतियोग्यनधिकरण वृत्तित्वं निर्वक्ति तदा कपिसंयोगानधिकरणे गुणादै विद्यमानस्याभावस्य वृक्षे मूलावच्छेदेन विद्यमानत्वात् ।

प्रतियोग्याधिकरणावृत्तित्वंवर्तते चेत् संयोगी-सत्त्वादित्यत्रातिव्याप्तिः। कथंतु सत्ताधिकरणे गुणादौ संयोगाभावस्य प्रतियोग्यधिकरणे द्रव्ये वर्तमानत्वात् ।

अतएव प्रतियोग्यनधिकरण वृत्यभावस्य विवक्षितत्वेननावकाशः पूर्वोक्त दोषस्येति। अतएव स्वप्रतियोग्यनधिकरणीभूत हेत्वधिकरण वृत्यभावस्य निष्कर्ष व्याख्यानेनैव समस्त शंकानिराकृता ग्रन्थकारेण।

प्रतियोग्यनधिकरणत्वं च-

प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं कथनीयम् । तेन विशिष्टष्टसत्तावान् जाते रित्यादौ जात्यधिकरणे गुणे विशिष्ट सताभाव

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रतियोगिसमानाधिकरणत्वेपि न कापि क्षतिः। प्रतियोग्यनधिकरणत्वंच साध्यतावच्छेददक सम्बन्धेन वोध्यमिति। तेन ज्ञानवान् सलादित्यत्र विषयता सम्बन्धेन सत्ताधिकरणे घटे ज्ञानस्य सत्त्वेनापि न कापि क्षतिः।

वहिनमान् धूमादित्यत्रापि धूमाधिकरणे समवाय सम्बन्धेन वहन्यभावत्वेनापिनावकाशः दोषस्य कस्यापि दृष्टिपथे समायाति। लक्षण स्वरूपं तु- स्वप्रतियोग्यनधिकरणीभूत हेतुतावच्छेदक धर्मावच्छिन्न हेतुतावच्छेदक सम्बन्धावच्छिन्न हेत्वधिकरण वृत्ति वैशिष्टस्यव्यासज्यवृत्ति धर्मानवच्छिन्न प्रतियोगिताकाभाव प्रतियोगितानवच्छेदक साध्यतावच्छेदकावच्छिन्न साध्य सामानाधिकरण्यं व्याप्तिरितिलक्षणं मन्तव्यम् ।

प्रतियोगितावच्छेदकावच्छिन्नस्य यस्यकस्यचित् प्रतियोगिनोऽनधिकरणत्वं किंवा प्रतियोगितावच्छेदकावच्छिन्नयावत् प्रतियोगिनामनधिकरणं किंवा यत्किञ्चित् प्रतियोगितावच्छदकावच्छिन्नानधिकरणं विवक्षितमिति। तत्राद्ये वृक्ष कपिसंयोगवान् एवद् वृक्षत्वादित्यत्र, एतद् वृक्षत्वाधिकरणे वृक्षेमूले कपिसंयोगाभावमावमादाय तत्प्रतियोगितावच्छेदककपिसंयोगत्वावच्छिन्नो यःकश्चिद् व्यक्तिविशेषो वृक्षावृत्तिकपिसंयोगोपिभवति तादृशकपिसंयोगानधिकरणं हेत्वधिकरणंवृक्षः तत्प्रतियोगितावच्छेदकमेव साध्यतावच्छेदक मित्यतो भवत्यव्याप्तिः।

द्वितीयकल्पे सर्वस्यैवाभावस्य पूर्वक्षणवृत्तित्व विशिष्टस्वाभआभावात्मक प्रतियोगिसामानाधिकरणत्वात् । वह्निमान् धूमादित्यादावपि घटाभावस्य पूर्वक्षणवृत्तित्व विशिष्टस्वाभावात्मक प्रतियोग्याधिकरणत्वं वर्तते यद्यपि पर्वतादेः तथापि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

साध्यतावच्छेदकसम्बन्धेन तत्प्रतियोग्यधिकरणत्व मस्त्येवेति कथं तर्हि प्रतियोगिव्यधिकरणाभावाप्रसिद्धिरिति वाच्यम्। घटाभावे योवहन्यभावस्तस्य घटाभावात्मकत्वेन वह्निरपि घटाभावस्य प्रतियोग्यास्तीत्यतो तदधिकरणं पर्वतादित्येवं कमेम प्रतियोगिव्यधिकरणाभावस्याऽप्रसिद्धत्वादसंभवो भवत्येवेति निश्चप्रचम्।

यदि तादृशाभावाधिकरणकाभावस्य नाधिकरणात्मकत्वमस्ति किन्तुभिन्नएवेति पक्षमधिकृत्य प्रवर्तते चेत् तथा घटाभावस्य प्रतियोगीनास्तिवह्निः किन्तु घटएवास्ति तर्हि घटात्मक प्रतियोग्यनधिकरणीभूत पर्वतात्मक हेत्वधिकरण वृत्ति घटाभाव प्रतियोगितानवच्छेदक साध्यतावच्छेदक वह्नित्वावच्छिन्न वह्निस्वामानाधिकरण्यस्य धूमे विद्यमानतया नासम्भवस्यसंभवोस्ति यदि भवतां विचारोस्ति तर्हिद्वितीयकल्पस्याव्याप्तिः भवत्येवेति निश्चयं मन्ये।

तथापि धूमाभाववान् वह्ययभावादित्यत्राव्याप्तिः भवत्येवेति साधीयान् पक्षः प्रतिभाति। साध्यतावच्छेदक स्वरूप सम्बन्धेन सर्वस्याभावस्यपूर्वक्षणवृत्तित्वंविशिष्टस्वाभावात्मकप्रतियोग्यधिकरणत्वं हेत्वधिकरणस्येत्यतोभवत्येवेति निश्चयः।

तादृशस्थले हेत्वधिकरणे जल ह्रदे पूर्वोक्त प्रणाल्या तृतीय क्षणीय घटाभावस्य प्रतियोगीतः प्रथमक्षणवृत्तित्वविष्टिघटाभावाभावः तस्य साध्यतावच्छेदक स्वरूपसम्बन्धेनाधिकरणमेवहेत्वधिकरणं जायते, स्वप्रतियोग्यनधिकरणीभूत हेत्वधिकरणाभावतया समागच्छति स्वाभावकी नितरामव्याप्तिः।

तथा तादृशस्थलीयसमागतदोषं परिहर्तुं पक्षमिमं कोपि प्रस्तौति तथा यस्य कस्यापि प्रतियोगितावच्छेदकधर्मस्यानवच्छिन्न त्वं वरीवृतीति तदा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तदवच्छिन्नानधिकरणत्वं तृतीयकल्पत्वेनैव स्वीकार्यमित्यतो घटाभाव प्रतियोगिनि घटे पूर्वक्षण वृत्तित्व विशिष्ट घटाभावे वर्तमानो यो घटत्वं पूर्वक्षणीय घटाभावाभावत्वं च धर्मो तादृर्शघटत्वधर्मं स्वीकृत्य तनवच्छिन्नघटानाधिकरण हेत्वधिकरण वृत्ति घटाभाव प्रतियोगितानवच्छेदक-धूमाभावत्वावच्छिन्न धूमाभाव सामानाधिकरण्यस्य वह्न्यभावे सत्वाल्लक्षण समन्वयः। अतः तृतीयकल्पे दोषं कथयितुं व्याचष्टे यत्-

पूर्वस्थले–

सर्वस्यैवाभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मक प्रतियोग्यधिकरणत्वं विद्यते हेत्वधिकरणस्येति पक्षं चेतसि समाधाय सम्प्रति कपि संयागाभाववान् आत्मत्वादित्यादौ संघटते नितरामव्याप्तिदोषम् । कपिसंयोगाभाववान् आत्मत्वादित्यादौनितान्तमव्याप्तिः संजायते यत् तत्रात्मवृत्तिः कपिसंयोगाभावाभावः कपिसंयोगएव, तस्य गुणत्वस्वरूपतया तत्प्रतियोगितावच्छेदकं गुणसामान्याभावत्वं तदवच्छिन्नानधिकरणत्वं हेत्वधिकरणत्वं हेत्वधिकरणत्वभात्मनः। अतएव तृतीयकल्पदोषं निरसितुं ग्रन्थकारः-

मैवम्-

यादृश प्रतियोगितावच्छेदकऽवच्छिन्नानधिकरणत्वं हेतुमतः- तादृश प्रतियोगितानवच्छेदकत्वस्य विवक्षितत्त्वात् । तेन पूर्वोक्तस्यनावकाशः दृष्टिपथे पथिकायते ।

कपिसंयोगाभाववान् आत्मत्वादित्यत्र गुणसामान्याभावत्वावच्छिन्न प्रतियोगितानवच्छेदकावच्छिन्नानधिकरणहेत्वधिकरणवृत्यभाव प्रतियोगितानवच्छेदक साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यस्य हेतौ सत्त्वेन

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नावकाशः दोषस्येति विज्ञातव्यः। लक्षण स्वरूपंतुसाध्यतावच्छेदक सम्बन्धावच्छिन्नयादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरण-हेतुतावच्छेदकावच्छिन्न हेतुतावच्छेदकसम्बन्धावच्छिन्न हेत्वधिकरणवृत्ति वैशिष्य्यव्यासज्यवृत्तिधर्मानवच्छिन्न तादृश प्रतियोगितावच्छेदकावच्छिन्न प्रतियोगिताकाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्न साध्यसामानाधिकरण्यमिति व्याप्तिलक्षण स्परूपं प्रतिभाति। प्रतियोगिता विशिष्ट प्रतियोगितानवच्छेदक साध्यतावच्छेदकावाच्छिन्न सामानाधिकरण्यं व्याप्तिः। वैशिष्ट्यं च स्वतादात्म्य-स्वावच्छेदकावच्छिन्नाऽनधिकरण हेत्वधिकरणवृत्यभावीयत्वोभय सम्बन्धेन।

नन्वत्र कालो घटवान् कालपरिमाणादित्यत्र प्रतियोगि व्याधिकरणाभावस्याऽप्रसिद्धतयाऽव्याप्तिः। हेत्वधिकरणस्य महाकालस्य जगदाधारत्वेन समेषां सदाधारतया साध्यतावच्छेदक सम्बन्धेन कालिक विशेषणतया प्रतियोग्यधिकरणत्वात् । अत्रेदं सामाधनं केचिदिच्छन्ति सादऽमुनाप्रकारेण यत् महाकाल भेदविशिष्ट घटाभावस्य प्रतियोगिव्यधिकरणतया तादृशभावस्य सुप्रसिद्धत्वमस्त्येवेति निश्चयः। घटाधारत्वेऽपि महाकालस्यमहाकालभेदविशिष्ट घटानाधारत्वात् । महाकाले महाकाल भेदाभावात् । महाकाल मात्रवृत्ति कालिक सम्बन्धेन महाकालभेदविशिष्टघटात्मकप्रतियोगिनोऽधिकरणस्यैवाऽप्रसिद्धया तदभावोऽप्रसिद्ध इति व्यापकत्व व्याधाताऽऽपत्त्या कथं तर्हि लक्षण समन्वयो विधेय इत्यतो मले वस्तुतस्त्वितिपक्षं निर्दिशति यत् -

प्रतियोगितावच्छेदकसम्बनधेन प्रतियोग्यनधिकरणीभूत हेत्वधिकरण सामान्ये यत्सम्बन्धावच्छिन्नत्व यद्धर्मावच्छिन्नत्वोभयाभाव स्तेन सम्बन्धेन तद्धर्मावच्छिन्नस्य तद्धेतुव्यापक सामानाधिकरण्यं व्याप्तिरितिलक्षणं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पर्यवसन्नम् । यत्सम्बन्धःसाध्यतावच्छेदक सम्बन्धः, यद्धर्मः साध्यतावच्छेदक धर्मः। अतएव यद्धर्मावच्छिन्नत्व मात्रपदोपादाने प्रतियोगितावच्छेदक सम्बन्धमात्रोपादाने तेनैव समवाय सम्बन्धोपादाने प्रतियोग्यधिकरण वर्ततादिवृत्तित्वेन प्रतियोगितावच्छेदकस्यैव वह्नित्वस्य साध्यतावच्छेदकतयाऽव्याप्ति दोषः समापतति।

यत्सम्बनधावच्छिन्नत्वाभावमात्रपदोपादाने संयोगेन घटाभावस्य प्रतियोगितायां संयोग सम्बन्धावच्छिन्नत्वस्य विद्यमानेत्वाव्याप्ति रित्यतो तदुभयस्योपादनां विहितम् ।

प्रतियोगितावच्छेदक सम्बन्ध सामान्ये प्रतियोग्यनधिकरणीभूत हेत्वधिकरणवृत्यभावप्रतियोगितासामान्ये यद्धर्भावच्छिन्नाभाव स्तद्धर्भावच्छिन्नस्य तद्धेतुव्यापकत्वं, तादृश व्यापक निरूपितं तद्धेतु निष्ठं सामानाधिकरण्यं व्याप्तिलक्षणं सुमम्पन्नम् । तथाच पर्वतोवह्निमान् धूमादित्यत्रसमवायेन पर्वते वहन्यभावमादाय तादृश प्रतियोगितावच्छेदक समवायतादृशप्रतियोगितासामान्ये वहन्यभावस्याासत्त्वेनैव व्यायकत्व व्याघातेन सुतरामव्याप्तिः संजातेति विदुषां विचारसराणिः संगच्छते ।

इत्त्थं कालो घटवान् काल परिणामादित्यत्र संयोगसम्बन्धेन घटाभाव प्रतियोगिनः घटस्यानधिकरणे हेत्वधिकरणे महाकाले विद्यमान संयोगेन सम्बन्धेन घटाभावीय प्रतियोगितायां कालिक सम्बन्धावच्छिन्न घटत्वावच्छिन्नत्वोभयामावस्य वर्तमानत्वेन नाव्याप्ति संकावतारस्य कथा नैवदृष्टिपथे समायाति।

लक्षणघटक सामान्य पदप्रवेशमहात्म्येन धूमवान् वहने रित्यत्रातिव्यानिरासाय नान्यदीयस्य पथः नितान्तान्वेषणं परमावश्यकं सर्वदा सर्वथानुचितमेव विभाति। तथाहि-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सामान्यपदानुपादाने हेत्वधिकरण पर्वत तप्तायोगोलके धूमाभावं घटा भावंस्वीकृत्य तादृश प्रतियोगितात्तर्गत यत्किञ्चिद् घट निष्ठप्रतियोगितामादाय तादृशतान्निष्ठप्रातियोगित्वमङ्गीकृत्यसंयोगसम्बन्धावच्छिन्नत्व धूमत्वावच्छिन्नत्वोभयाभावसत्त्वाद् धूमे व्यापकत्व समन्वयतया तत्रत्य हेतौ वह्नावतिव्याप्तिः। अतएव तन्निरासाय सामान्य पदोपादानं परमावश्यकं जायते। तथोपादाने च यावत्यः प्रतियोगिताः ग्राह्याः भवन्ति। तथाच धूमनिष्ठ प्रतियोगितायां तादृशोभयस्य वर्तमानत्वेन तथोभयाभावाऽसत्त्वाद् व्यापकत्वव्याघाततया नातिव्याप्तिशंकावतारकथा कथमपिनोदेति।

अतएव तादृश प्रतियोगितात्व व्यापकत्व घटितोभयाभावस्य निवेशमन्ता तन्निराकर्तुं तत्राऽशक्यमेवेति ग्रन्थकाराणामाशयः। तादृश निवेशव्यवस्था तार्किकाणां नितान्तं विचार सम्मता ।

अतएवात्रतार्किक शिरोमणिः यक्षमिमं स्वीकुरुते । महाकालान्यत्व विशिष्टोघटः' किंवा कालोऽयंमहाकालान्यत्वविशिष्टघटवान्'' इत्यादिप्रतीत्या महाकालान्यत्वविशिष्टघटवत्त्वस्य प्रतीतिवलेन तत्कालोपाध्यवच्छेदेन महाकालस्य तादृशकालान्यत्वविशिष्टघटवत्त्व प्रतीतिसत्त्वस्यैव व्यवहारदशायां समुपलम्भतयाविशिष्ट घटवत्त्वावगाहने वस्तु मात्रस्यैव महाकाले सर्वदाऽसत्त्वप्रसंगात् ।

अतएवाधुना तदानीमिति प्रतीति व्यतिरेकेण महाकाल विषयिणी प्रतीतिप्रत्यय संकलिततया तादृश प्रतीतेः स्वारस्येन कुत्राप्यसत्त्वंनैवप्रसंगात् ।

अतएवाधुना तदानीमिति प्रतीति व्यतिरेकेण महाकाल विषयिणी प्रतीतिप्रत्यसंवलिततया तादृशप्रतीतेः स्वारस्येन कुत्रारयसत्त्वंनैवयुक्तियुक्तं प्रतिभाति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न च खण्डकालस्याधिकरणत्वे नैव किमपि प्रमाणं भवतीति वाच्यम् । पटध्वंस विशिष्टः कालः पटवदन्यः'' इत्यादिप्रतीतिसम्मत प्रभात्वानुरोधेन खण्डकालस्यापि तथात्वादिति सिद्धान्तानुसारी पन्थाः। एवं महानसीयवह्नित्वेन वह्निघटोभयत्वेन च तादृशावच्छिन्नप्रतियोगिताकस्य हेतुसमानाधिकरणाभावस्य प्रतियोगितावच्छेदकत्वं वह्नित्वे विद्यमानतयाऽव्याप्ति भियाऽवश्यमेव साध्यतावच्छेदक भिन्नोयः साध्यनिष्ठो धर्मः तदनवच्छिन्नत्वेन तादृशाभावीय प्रतियोगितालक्षणेनिवेशः कर्तव्यः। पर्याप्ति सम्बन्धेनासतो प्रत्येकमुभयत्र ताहश धर्मस्योभयावृत्तित्वासंभवेन हेतुभन्निष्ठाभाव प्रतियोगितावच्छेदकता पर्याप्त्यधिकरण भिन्नत्व निवेशायोगात् ।

एवं तादृश घटाभावस्य समहाकालान्यत्व विशिष्ट धर्मेणाक्रान्तत्वात् तादृश प्रतियोगिताकाभावमादाय प्रतियोगिव्यधिकरणाभावस्य नैव प्रसिद्धि सम्भावनापि न स्यादिति कथयामासुःयेकेच न महाभागा। तच्चिन्त्यम्-

प्रमेयवान् वाच्यत्वात्'' इत्यत्र तादृशाभावस्याप्रसिद्धयाअव्याप्ति प्रसङ्गापातत्।

वस्तुतस्तु-

यादृश प्रतियोगिता विशिष्टस्यानधिकरणत्वं हेतुमतः इत्यत्र-अवच्छेदक वैशिष्ट्यमवश्यं साध्यतावच्छेदकता घटकसम्बन्धेन वक्तव्यम् ।

अन्यथा सन्तप्तायः पिण्डस्य कालिकसम्बन्धेन यद् धूमत्वविशिष्टं वहन्यादिकं संयोगसम्बन्धेन तदधिकरणस्य नितरां सुप्रसिद्धतया धूमवान् वह्ने रित्यादौ नितान्तमतिव्याप्त्यायत्तेः।

अथ च समवायेन पटत्व विशिष्टस्य कालिक सम्बन्धेन साध्यत्वं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वरीवर्ति तत्र महाकालान्यत्व विशिष्ट पटत्वावच्छिन्नाभावस्य साध्यतावच्छेदकताघटक सम्बन्धेन- प्रतियोगितावच्छेदकावच्छिन्नत्वस्याऽ-प्रसिद्धत्वभस्त्येवेति ध्रुवम् । स्वरूपसमवायाभ्यां तत्र तथात्वात् । विशिष्ट निरूपित समवायाऽनम्युपगमात् । अतएव तादृशाभावमदायनास्ति प्रसिद्दि सम्भवोऽस्ति।

अयमाशयः -

साध्यतावच्छेदकताघटक संसर्गतावच्छेदकतात्ववच्छिन्न प्रतियोगिताक पर्य्याप्त्यनुयोगितावच्छेदक रूपवृत्ति तावदधिकरणत्वंप्रवेश्यम् । अधिकरणत्वे रूपवृत्तित्वं च स्वनिरूपित निरूपकतावच्छेदकताघटक संसर्गतावच्छेदकतात्वावच्छिन्न प्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकत्व सम्बन्धेन तन्निवेशव्यावृत्तिस्तु शुद्धसमवायेन वह्नित्वविशिष्टत्वस्य विषयिता सम्बन्धेन तज्ज्ञानवद्वह्नित्व प्रतियोगितासमवायेन वह्नित्व विशिष्ट विषयक ज्ञानान्यतरत्व हेतावति व्याप्तिः। वह्नित्वप्रतियोगिक समवायेन वह्नित्व विशिष्टस्य विषयितया साध्यतायां तज्ज्ञानशुद्धसमवायेन वह्नित्व विशिष्ट विषयताज्ञानान्यतरत्व हेतावपि सत्त्वेन तन्निरासाय इतरवारक न्यूनवारक पर्याप्ती निवेश्ये। तथा च कालोघटवान् महाकालत्वादित्यत्र तादृश प्रतियोगितावच्छेदकं महाकालान्यत्व विशिष्टं घटत्वं च, साध्यतावच्छेदकघटक समवायेन तदुभयावच्छिन्नत्वमप्रसिद्धम् । कालोघटवान् महाकालत्वादित्यत्र सामानाधिकरण्यघटितसामानाधिकरण्य सम्बन्धेन महाकाल भेदविशिष्टंयद्घटत्वं तदवच्छिन्नाभावभादायाऽव्याप्तिवारण सम्भवादाह मूले विशिष्टनिरूपितेति। सार्वभौमपक्षमादाय तन्निराकर्तुं मूले न चेति ग्रन्थ मिमं व्यचष्टुं प्रयतते शिरोमणिः नचेति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

साध्यतावच्छेदक सम्बन्धेन हेत्वधिकरणीभूत यत्किञ्चिदव्यत्त्यवृत्ति प्रतियोगितावच्छेदक विशिष्ट प्रतियोगिकत्वमेव वक्तव्यम् । शिरोमणिः। तथा चावृत्ति गगनाद्यभावंवद्वारिकैनतत् सिद्धिः। सत्ताद्यधिकरण कर्मादौ समवायेन ज्ञान सामान्यस्य संयोगं सामान्यस्य चाऽवृत्तेर्नाति प्रसङ्गः, एवं च हेत्वधिकरणनिरूपित साध्यतावच्छेदक सम्बन्धावच्छिन्नवृत्तित्वाभाववान् तादृश प्रतियोगिता सामान्यं यस्य एतादृशोऽभावो वोध्यः। कालोघटवान् महाकालत्वादित्यत्र गगनाभावः प्रतियोगिव्यधिकरणे बोध्यः। तादृश प्रतियोगिनो गगनस्य हेत्वधिकरण महाकाल निरूपित कालिक सम्बन्धावच्छिन्न वृत्तित्वाभाववत्त्वात् ।

अतएव सत्ताद्यधिकरण कर्मादौ समवायेन ज्ञानसामान्यस्य संयोग सामान्यस्य चावृत्तेर्नातिप्रसङ्ग। भूतत्वमूर्तत्वोभयत्वविशिष्ट गुणकर्मान्यत्वविशिष्ट सत्तात्वविशिष्ट सत्तादीनां मनोगुणादिवृत्तित्वाभावतया संयोग सामान्यानां किञ्चिद द्रव्यावृत्तितया नातिव्याप्तिः विशिष्टस्याऽनतिरिक्तत्वात् ।

तता च भूतत्वमूर्तत्वोभयवान् मूर्तत्वादित्यत्र मूर्तत्वाधिकरण मनोव्यतिरित्त्यवृत्तित्वस्य तादृशोभयाभाव प्रतियोगित्वाश्रयमूर्तत्वेऽसत्त्वेनोभयाभावस्य प्रतियोगि व्यधिकरणत्वा भावेनाभावान्तर मादायाति व्याप्तिः। एवं गुणकर्मान्यत्व विशिष्ट सत्तावान् जातेरित्यादौ जात्यधिकरणगुणवृत्तित्वस्यैव विशिष्ट सत्ताभाव प्रतियोगिताश्रय सत्तायां सत्त्वेना भावान्तरादायातिव्याप्तिः।

उभयाभाव प्रतियोगितायाः व्यासज्य वृत्तित्वाद्वेति द्रष्टव्यम् प्रतियोगिता पर्याप्त्यधिकरणस्यैवाऽवृत्तित्व विवक्षणे पूर्वोक्तातिव्याप्ति निरासात् ।

यद्यपि पूर्वं विशिष्ट साध्यके अतिव्याप्ति प्रदर्शनोत्तरं विशिष्ट

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्यातिरिक्ततापक्षेतद्सङ्गतेरस्वरसादुभय साध्यके सुतरामति व्याप्तिः। तद प्रदर्शनेन तदुत्तरं तत् प्रदर्शनेनात्र पूर्व ग्रन्थ विपरीतोपन्यासत्वेनतदिदयसंगतम् ।

अथ च विषयतायाः वृत्यनियामकत्वविचारे सत्त्वाधिकरणे घटादौ र्वतमानस्य भावस्यस्वाभाविकेन प्रतियोगिवैयधिकरण्यं संभवत्येवेति निश्चयात् अतः संयोग सामान्यस्येति दीधितौ शिरोमणिनानिगदितम् ।

तेन ज्ञानवान् संयोगवान् वा सत्त्वादित्यादौ नातिव्याप्ति प्रसंगः। सत्तावद् वृत्तित्व विशिष्ट सामान्याभावस्य संयोगादावभावात् उक्तातिव्याप्ति वरणाय यत्किकिञ्चदित्यस्यप्रयोजनंज्ञातव्येवेति ।

अन्येतु प्रतियोगितावच्छेदकविशिष्टप्रतियोगिसामान्ये प्रतियोगितावच्छेदक वैशिष्टस्यावच्छेदेन हेत्वधिकरणीभूत प्रतियोगिसामान्ये प्रतियोगितावच्छेदकवैशिष्टयावच्छेदेनहेत्वधिकरणीभूत यत्किञ्चिद् व्यक्ति निरूपित वृत्तित्वभावः तत्त्वभित्यर्थः।

तथाच गुणनिरूपित वृत्तित्वस्य गुणकर्मान्यत्व वैशिष्टयानच्छेदेन सत्तायामसत्त्वान्नातिव्याप्तिः।

द्वितीयस्थले च व्यासज्यवृत्ति धर्मावच्छेदेन एकदेशवृत्यभावस्याप्रसिद्धयातिव्याप्ति वारणं भवेदिति निश्चयः।

अन्यथा सार्वभौम मते उभयत्वस्यैक विशिष्टापरत्वे भूतत्वमूर्तत्वोभय गुर्णकर्मान्यत्व विशिष्टसत्तयोः तद्भिन्नतया स्वाभाविकगत्यामनो गुणाद्यवृत्तित्वेन प्रतियोगितावच्छेदक विशिष्टस्य प्रतिपादानमसंगत मेवेति नितरां साधीयः।

संयोगी द्रव्यत्वात् इत्यत्राऽव्याप्तिवारणाय सामान्य पदं पर

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मावश्यकमेवेति । तथा च विशिष्ट सत्तान् जातेरित्यादावतिव्याप्तिः। समवायेन जातेः साध्यत्वे मेयत्वादि हेतावतिव्याप्तिः। एवं संयोगादि साध्यक गुणकर्मान्यत्वादिहेतौ चाति व्याप्तिः।

हेत्वधिकरणे तादृश सम्बन्धेन हतोरप्रसिद्धेः। द्रव्य संयोगादेरपिवृत्तेः। भैवम्,

साध्यतावच्छेदक सम्बन्ध सामान्ये निरूक्त प्रतियोगिकत्व हेत्वधिकरणीभूत यत् किञ्चिद्व्यक्त्यनुयोगित्व समान्योभयाभावस्य विवक्षिततत्त्वाद् ।

अथकेचन घी धनेशाः तदेव तत्त्वं व्याचक्षते यत् किलवृत्यनियामक सम्बन्धेन साध्यत्वे सद्धेतौ हेत्वधिकरण निरूपित वृत्तिता सामान्ये साध्याभाव प्रतियोगितावच्छेदकावच्छिन्न साध्यतावच्छेदक कावच्छिन्नत्वयोरभावसत्त्वेनाव्याप्तिः। यदि च वृत्तित्व स्थाने सम्बन्धित्वं निवेश्यते, तदा प्रतियोगितावच्छेदकावच्छिन्न यात्किञ्चिद्धेत्वधिकरण निरूपित सम्बन्धिता सामान्ये साध्यतावच्छेदक सम्बन्धावच्छिन्नत्वाभाव एवं लक्षणं स्वीकर्तव्यमोवेति विदुषां विचार एव साधीयान् प्रतिभाति, किन्तु विभिन्नकाल्येः स्ववृत्ति वाच्यत्वादीनामपि सम्बन्धत्वाभावे तद् घटवान् तात्क्रियात्वादित्यत्रादि व्याप्तेः, तेषां तत्सम्बन्धत्वाभावे तद् घटवान् तत्क्रियात्वादित्यत्रातिव्याप्तेः, तेषांतत्सम्बन्धत्वेऽस्य लक्षणान्तरत्वमेवावसेयम् । एवं च हेत्वधिकरण यत्किञ्चिद् व्यक्तिवृत्तिता सामान्ये स्वप्रतियोगिकत्वोमयाभावः तादृशं एवं सामान्यकान्तेन विवक्षणीयम्। तथा चात्र स्व प्रतियोगितावच्छेदकावच्छिन्नत्वाभावमात्रा प्रतिपादने सतिव्यभिचार मात्रेऽतिव्याप्तिः कथंतु गगनाभावस्यैव प्रतियोगिव्यधिकरणत्वात् । यतोहि धूमाधिकरण पर्वतादि निरुपित

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कालिकसम्बन्धावच्छिन्नघटवृत्तितायां वहन्यभाव प्रतियोगितावच्छेदकावच्छिन्नत्वघटितोभयाभावसत्त्वादव्याप्तिः। तेन सामान्य पदं परमावश्यकं प्रतिभाति।

यद्यप्य विशिष्टनिरूपिताऽऽधेयत्वस्याऽतिरिक्तत्वे स्वप्रतियोगितावच्छेदकावच्छिन्नत्वसाध्यतावच्छेदकसम्बन्धावच्छिन्न त्वोभयाभाव वद्धेत्वधिकरण यत्किनिचद् व्यक्तिवृत्तित्व सामान्यकत्वस्य विवक्षणीयतायानावकाशः दोष षाणामिति मान्याः मनीषिणः।

अत्रकेचन तार्किक विचारगोष्ठयां वरिष्ठाः कल्पना कुसुम प्रभाकरा प्रकाण्ड पण्डित पुण्टरीक चतुराः खकीयभव प्रभातसुर्वणतर्ककाननविहरण परायणाः मौलार्थ व्याख्यान प्रतिपादन निरताः तदन्यथैव स्वाभिप्रायं व्याचक्षते यत् किञ्चिद्धेत्वधिकरण निरूपित सामान्ये तादृश वृत्तितात्व प्रवेश वैलक्षण्यकथनेनैव पूर्वोक्त दोषाणाभवकाशः नितरां नितान्तं सम्पद्यत एवेति सर्वदा सत्यमाभाति किमावश्यकं पूर्वप्रतिपादितानां विषयाणामिति।

अतएव संयोगेन घट साध्यक संयोग सम्बन्धावच्छिन्न प्रतियोगिताकघटाभावत्व हेतुक व्यभिचारिण्यतिव्याप्तिदोषस्य प्रसारः समेषां विदुषां विचारमानस मन्दिरे समागच्छत्येवेति निश्चयः। कथं तु घटाभावनिरूपित प्रतिोगित्वे घटाभाव प्रतियोगितावच्छेदकावच्छिन्नत्व संयोगग सम्बन्धन्धावच्छिन्नत्वयोः विद्यमानत्वात् । नच तथावच्छिन्न त्वस्यतादृश विलक्षणत्वेन वृत्तित्व निष्ठस्यैव प्रवेश्य तया तादृश प्रतियोगिले तदभावोऽक्षतएवेति नैव साध्वीकं वचः कदाचिदपि वैमल्यं समाकलयेत् । विस्तर विचारपक्षस्तु विदुषां विचारालोके तत्त्वालोके द्रष्टव्यएवेति न्यायतत्त्व विदां धीमता सर्वदेति सर्वथा ममेयं मतिः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नव्यास्तु-

कालोघटवान् महाकालत्वादित्यत्र कालिक सम्बन्धेन गगनाभाव प्रतियोग्यधिकरण यावद्धेत्वधिकरणाऽप्रसिद्धया स्वपदेन गगनाभावं चोररी कर्तुं नैव क्षमते । अपितु घटाभावंनेतुं सर्वथोचितभाति तथा च तत्प्रतियोग्यधिकरण विशिष्टहेत्वधिकरणस्यैव नितरां सुप्रसिद्धत्वेन नावकाशः संभवति केषं दोषाणामिति। हेतुनाऽमुना स्वप्रतियोग्यधिकरण विशिष्ट हेत्वधिकरण काऽभावस्य घटाभावस्यातिरिक्तत्वस्य गगनाभावे सुप्रसिद्धतया स्वयमेव प्रतियोगि व्यधिकरणाभावस्य सुसंगत्व मस्त्येवेति निश्चयः। नास्त्यत्र विवादावसरः समुपसर्पति। तात्पर्यमिदमाधृत्य तर्कालङ्कारेणश्रीमताचेत्थं न्यगादि।

संजाते प्रस्तुत निवेश चेत्थमनुगम प्रकारः विज्ञातव्यः समेन किल—

हेत्वधिकरणत्वव्यापकप्रतियोगिताविशिष्टप्रतियोगितातिरिक्त प्रतियोगितानवच्छेदकत्व व्यापक स्वावच्छेदक धर्मावच्छि्न साध्यतावच्छेदक सम्बन्धावच्छिन्न निरूपकताधिकरणतावत्त्वसम्बन्धेनवोध्यमिति ग्रन्थकाराणामाशयः।

नव्यास्तु साध्यता वच्छेदक सम्बन्धेन स्वप्रतियोग्यधिकरण विशिष्ट हेत्वधिकरण भिन्नत्वं प्रतियोगिवैयधिकरण्यं वक्तव्यम् । तेन गगनाभावमादाय स्वकीयलक्षण्य क्षेत्रे न कोपिदोषः दृष्टिपथे समापतति।

अन्येषां विचारमार्गेतु-

येन सम्बन्धेन यद्धर्मावच्छिन्नानधिकरणां हेत्वधिकरणं तादृश सामान्य साध्यतावच्छेदक सम्बन्धेन तद्धर्मावच्छिन्न सामानाधिकरण्यमेव लघुत्वेन व्याप्तित्वे तादृशे सति घटवान् महाकालत्वादित्यत्र समवाय सम्बन्धेन घटाभावस्यापि प्रतियोगिव्यधिकरणत्वं संवृत्तमेवेति तथ्यं वचः प्रतिभाति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

किन्तु घटवृत्तित्वविशिष्टद्रव्यत्ववान् घटत्वा दित्यादावापि केनापि सम्बन्धेन हेत्वधिकरणस्य साध्यता वच्छेदकावच्छिन्नानधिकरणत्वाऽसम्भवेन तादात्म्य सम्बन्धेन तदृशानधिकरणत्वसम्भवेन दधित्व विशिष्ट प्रभेयवान् स्थूल दधित्वादित्यादिस्थले अव्याप्ति दोष प्रसारत्व झंझावात कलुषितत्वेन तादृश दोष निरास प्रयासोहि परमावश्यक एवेति विदुषां विचारा ग्रहः संभवति।

अन्येषां विचारे तु-

प्रतियोगिता विशिष्टान्य प्रतियोगितावच्छेदक साध्यतावच्छेदकरवच्छिन्न सामानाधिकरण्यम् । वैशिष्टयं च स्वावच्छेदक सम्बन्धावच्छिन्न साध्यतावच्छेदकधर्मावच्छिन्न निरूपकता निरूपिताधिकरणता वद्भिन्न हेत्वधिकरणवृत्त्यभावीयत्व स्व तादात्म्योभय सम्बन्धेन ।

इतरे विद्वांसस्तु–

स्वप्रतियोगितावच्छेदकसम्बन्धेन यद्धर्मावच्छिन्नानधिकरणं हेत्वधिकरणं तद्वृत्त्यभावीय प्रतियोगितावच्छेद सम्बन्धान्यसाध्यता वच्छेदक सम्बन्धेन। तद्धर्माच्छिन्न सामानाधिकरण्येत्यस्यावश्यं तदृशतया वक्तव्यभिन्ये तल्लक्षणस्याप्यभाव घटितत्वान्नासङ्गतिरित्यवधेयमेवेति।

तथाच घटवान् महाकालत्वादित्यत्र समवायेन घटाभावस्य प्रतियोगित व्यधिकरणत्वेन तथात्वं भवेदेवेति सत्यं प्रतियभाति। किन्तु घटवृत्तित्व विशिष्ट द्रव्यत्ववान् घटत्वादित्त्यादि स्थले येन केनापि सम्बन्धेन हेत्वधिकरणस्य साध्यतावच्छेदकावच्छिन्ननधिकरणत्वाऽसम्भवात् ।

तादात्म्यसम्बन्धेन तयाविधानधिकरणत्वस्य सम्भवतयापिदधित्य विशिष्ट प्रमेयवान् स्थलू दधित्वादित्यादावव्याप्तिशंकग्रस्तत्वेन निश्चायात् ।

अतएव तादृशस्थलीयाव्याप्तिमपाकर्तुं तथोभयाभावघटितलक्षणमेव-परमावश्यकमाभाति। तथाच-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

साध्यतावच्छेदकसम्बन्ध सामान्ये यादृशप्रतियोगितावच्छेददकावच्छिन्न प्रतियोगिकत्व - हेत्वधिकरणीमभूत यत् किञ्चिद् नुयोगिकत्व सामान्योभयाभावस्तादृश प्रतियोगिता नवच्छेदकी भूतसाध्यता वच्छेदकावच्छिन्न सामानधिकरण्यं व्याप्ति लक्षणं कल्पनीयम् ।

साध्यसामान्यपदोपादाने कालिक सम्बन्धे धूमप्रतियोगिकत्वाऽयःपिण्डायोगिकत्वोभयसत्त्वाद धूमवान् वह्नेरित्यादावतिव्याप्तिरतः साध्यतावच्छेदक पदम् । समवायिनः संयोगेन साध्यतायां जातित्त्वादित्यादि स्थले समागच्छत्यतिव्याप्तिः।

साध्यतावच्छेदकीभूतसमवायात्मकधर्मे समवायित्वावच्छिन्न प्रतियोगिकत्व हेत्वधिकरण गुणाद्यनुयोगिकत्वोभयस्य विद्यमानत्वेन साध्यभावस्य लक्षणघटकत्वाभावतया सामान्यपदोपादनं नितान्त मावश्यकभागाति।

यद्धर्मावच्छिन्न संसर्गताक प्रकृत साध्यानुमितिः फलं भवत्येवेति निश्चयः। तद्धर्मावच्छिन्न सम्बन्धसामान्ये' इत्येव तात्पर्यं सुतरामावश्यकमेवावधार्यम् ।

साध्यप्रतियोगिक साध्यतावच्छेदकसम्बन्ध पदोपादाने हेतुमान् महानसानुयोगिकत्व वह्नित्वावच्छिन्न प्रतियोगिकतेभयाभावस्य सत्त्वेन वह्निमान् धूमादित्यादौ तथा व्याप्तिनिरासायसामान्य पदमुपात्तम् । तथा च महानसीय संयोगे तादृशोभयाभाव सत्त्वाघटितत्वेन नावकाशोस्त्यव्याप्ति दोषादोषस्येति विदुषां विचार सणिः।

धूमवान् वहनेरित्यादौतु–

हेतुमदयोगोलेकानुयोगिकत्व धूमत्वावच्छिन्न प्रतियोगिकत्वोभयाभाव-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्यवर्तमानत्वेन सुतरामतिव्याप्तिः समुपस्थिता भवति। एवञ्च-सामान्य पदोपादाने तु सामान्यान्तर्गत महानसीय संयोगे तथोभयाभआव विरहतया यादृश प्रतियोगित्वपदेन वह्नित्वावच्छिन्न प्रतियोगित्वस्य ग्रृहीतमशक्यतयानावतारः तादृशाव्याप्ति दोषकालंकशंकायाः। समवायस्यैकत्वन तेनैव सम्बन्धेन लक्षणा गमनान्ना सम्भवाकाशोविहितः।

संयोग सामान्ये समवायनिष्ठ पर्वतानुयोगिकत्वस्य वह्नित्वावच्छिन्नानुयोगिकत्वस्य तादृश प्रतियोगिकत्वस्य च द्वयोरभावसत्त्वस्य सत्त्वेनाव्याप्तिः संघटते। अतः सामान्योभयपदम् ।

अतः सामान्यपदस्योभयत्रान्वयतया तादृश पदार्थस्यान्वयः संविधेयः तार्किकैः। तादृशोभयाभावस्य स्वरूप सम्बन्धेन, अतएव समवायेन तादृशोभयाभावस्य सम्बन्ध मात्रे विद्यमानत्वेन सद्धेतुस्थले नाव्याप्ति शंकाकलंकस्य संभावनेति नितरामवसेयमितितर्कनिष्ठैः तार्किकैः।

एतद् घटवान् कालान्तरीयतद् घटत्वादित्यादिस्थले एतदघटत्वावच्छिन्न प्रतियोगिकत्व विशिष्टकालान्तरीय तादृश घटानुयोगिकत्वाप्रसिद्धेरभावान्तरभादायातिव्याप्ति शंका ग्रस्तत्वमेव तादृश पक्षाप्रतिपादने तात्पर्यभवसयमेवेति विद्वच्चणैः।

द्रव्यत्ववान् प्रमेयतदित्यादौ संयोगेन साध्यत्वे प्रमेयानुयोगिक सामान्यस्य द्रव्य प्रतियोगिकत्वेन तादृश साध्याभावस्य लक्षणाघटकत्वेनाति व्याप्ति दोष ग्रस्तत्वेन पूर्वोक्त निवेशकल्प स्यापितत्रौचित्यं नैव प्रमाण तर्काभ्यां संवलितम् कथंतु-

यादृशप्रतियोगितावच्छेदकावच्छिन्न प्रतियोगिकत्व विशिष्टसम्बन्ध सामान्ये हेत्वधिकरणा विशिष्ट तादृशव्यक्त्यनुयोगिकत्वविशिष्ट

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

साध्यतावच्छेदक सम्बन्धसामान्यत्वस्य किं यादृश प्रतियोगितावच्छेदकावच्छिन्न प्रतियोगिकत्वस्य प्रतिपादनं कथन्नविहितम् इत्यादि निवेश प्रकारस्यापि प्रतिपादनेनापि नैव दोषोद्धारः कर्तालङ्कारसम्भतोस्ति। अतएव कालिक सम्बन्ध सामान्ये महाकालानुयोगिकत्वस्य चोपस्थिति दशायांतत् प्रतियोगिकत्वस्याऽभावे घटवान् माकालत्वदित्यादि स्थले प्रतियोगि व्यधिकरणत्वेन गगनाभावस्य सुप्रसिद्धत्व मस्त्येवेति विद्वच्चणानां संवादः।

तेन धूमवान वह्नेः'' इत्यादि स्थले तादृशावच्चेदकसम्बन्ध सामान्ये तथोक्त प्रतियोगिक हेत्वधिकरण विशिष्टतादृशानुयोगिकोभयाभावस्य विवक्षणतया तथोक्तसंयोगायोगोलकानुयोगिक संसर्गाभावतया तत्र यथार्थ विशिष्ट घी नियामकतया तदुनयोगिक सम्बन्धस्य दर्शनात् ।

एतेन वह्निमान् वह्नि रूपादित्यादि स्थले तादृश पद्धत्यालक्षणाघटकत्वेनैवत्यपास्तामेत्यात्मको विचारः विवेचनीयः। अधिकंतु श्रीचरण पल्लवितत्तवालोके द्रष्टव्य एवेति निश्चयः। एवं धूम प्रतियोगिक संयोग वहन्याधिकरणायोगोलकानुयोगिकत्वस्य तदन्यत्वविशिष्टतादृश दण्डसंयोगे एतादृश तद्दण्डाधिकरण चैत्रानुयोगिकत्वस्य, गुणकर्मान्यत्वविशिष्ट सत्तासंसर्गेऽपि जात्यधिकरण द्रव्यगुणानुयोगिकत्त्वस्याभावान्नातिव्याप्ति शंकाविचारावसरः समागच्छेदिति गुरुचरणानां संवादः।

एवं च तादृश विशेष रुपेण संसर्गत्वस्य विशिष्ट वमभ्युपेत्य तात्त्विक विचार मर्यादया वृद्धाः मान्याश्चेति स्वाभिमतं व्याच क्षते यत् -

साध्यता वच्छेदक सम्बन्धावच्छिन्न प्रकृताधिकरणतानिरूपित स्वरूप सम्बन्धेन यादृश प्रतियोगितावच्छेकावच्छिननाधिकरणत्वसामान्य भाववत्त्वं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हेत्वधिकरणस्य तादृश प्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके विवक्षणीयत्वेनैव सामञ्जस्ये तथाचेति प्रतियोगिकत्वस्य खण्डशः तन्निवेशस्य वैफल्यं भवेदेवेति निश्चयं मन्ये।

कालोघटवान् महाकालत्वादित्यत्र कालिक सम्बन्धावच्छिन्न तादृशाधिकरणता निरूपित स्वरूप सम्बन्धेन तादृ-शत्वावच्छिन्नाधिकरण सामान्याभावस्य हेत्वधिकरणे वर्तमानत्वेन तादृशत्वावच्छिन्नाभावस्य तथोक्त प्रतियोगिव्यधिकरणाभावस्य सौलभ्यत्वेन पूर्वोक्तशंकाकलंकस्यावसरः नैनलोचन पथे पथिकायते। एवं च यद्धर्मावच्छिनन प्रतियोगितावच्छेदकावच्छिन्न प्रतियोगिक सम्बन्ध सामान्ये सास्यतावच्छेदक विशिष्टहेत्यधिकरणीभूततादृशानुयोगिक सम्बन्धोभयाभावस्तादृश प्रतियोगित्व प्रवेशस्यौचित्यं ग्रन्थकृतां विचारे युत्त्या सम्मतमस्तिनवेति विदुषां मण्डले सर्वर्था ध्येयमिति विद्वद्भिः तार्किक कसम्प्रदायमतानुयायिमिः।

अतएव पक्षं तथात्वं समीक्ष्य विद्यावाचस्यतिना परमगुरुणाश्रीमता स्वालोकेतत्त्वालोके बद्धपरिकरेण सर्वतन्त्र स्वतन्त्रेण गौतमावतारेण विषयोयं समीक्षितः पल्लवितेन ।

दीधितिकृतां विचारे तु-

यदि स्वरूपसम्बन्धेन गगनस्य वृत्तिमत्त्वं स्वीकुरुते तदानिरुक्त प्रतियोग्यनधिकरणहेतुमन्निष्ठभावप्रतियोगिता सामान्ये यत्सम्बन्धावच्छिन्नत्व यद्धर्मावच्छिन्नत्वोभयाभावः तेन सम्बन्धेन तद्धर्भावच्छिन्न व्यापक साध्य सामान्याधिकरण्यं व्याप्तिलक्षणं ज्ञानतव्यमिति सार्वजनीनम् ।

समवायिनः संयोगेन साध्यतायां घटत्वादिहेतावप्यीप्तिः साधन वन्निष्ठस्य समवायेन संयोगिसामान्याभावस्य प्रतियोगित्वे संयोग

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समवायोमयाभवच्छेद्यत्वेन धर्म सम्बन्धयोरुपादनां नितान्तभावश्यकम् । योगेने च तदवच्छेद्यत्वाभावान्नतदव्याप्ति शंका प्रसार: संभवति।

क्वचिदपि यादृश सम्बन्धावच्छिन्नेत्यपि द्रष्टव्यमति। शब्दैक्यस्यानुपादेयत्वात् । अतएव धूमाधिकरणे संयोगसम्बन्धेन वहन्यसामान्याभावसत्त्वेपि नाव्याप्तिशंकाकावतार:।

तत्संयोगावच्छिन्न प्रतियोगितायाः संयोग सामान्येनावच्छिन्नत्वात् । दण्डिमान् दण्डिसंयोगादित्यादि स्थले तदवच्छिन्न प्रतियोगितायां तादृशोभया भावसत्त्वात् नाव्याप्ति:। प्रमेयवान् वाच्यत्वादित्यादौ प्रमेयत्वावच्छेदयत्व विशिष्ट स्वरूपसम्बन्धावच्छिन्नत्वाप्रसिद्धयाऽव्याप्तिशंका ग्रस्तत्वेना विशिष्टाभावेभयास्य तादृशोभयाभावस्यावश्यकत्वमेव शरणम् ।

न च तथापि तादृशप्रतियोग्यनधिकरण हेतुमनिन्नष्ठाभावीय यधभार्वच्छिन्न प्रतियोगिता सामान्ये यत्सम्बन्धावच्छिन्न प्रतियोगिताकाभावतेन सम्बन्धेन तद्धर्भावच्छिन्न व्यापकत्वमेवास्तु किंप्रयोजंन तन्निवेशस्येति वाच्यम् । घटवृत्तित्व विशिष्ट द्रव्यत्ववान् घटत्वादित्यदावव्याप्ति:। तत्रत्य कथनियदपि लक्षण समन्वयेपि दधित्वविशिष्ट प्रमेयवान् स्थूल दधित्वादित्यादावव्यापति:।

तत्रापिदध्यन्तरानुयोगिक समवायादि संबन्धेन हेत्वधिकरणस्य प्रकृत साध्यानधिकरणत्वेऽपि तदुक्त क्रूमेण व्यापकत्वं विज्ञेयम् । अथच स्वावच्छेदकताघटकसम्बन्धेन यद्धतियोगितावच्छेदकावच्छिन्नाधिकरणं हेत्वधिकरणं तत्प्रतियोगिता सामान्ये यादृशोभयाभावोऽस्ति तेन सम्बन्धेन तद्धर्भावच्छिन्नस्य व्यापकत्वं परमावश्यकमाभाति। वृत्यनियामक सम्बन्धस्य प्रतियोगितानवच्छेदकत्वेऽपि प्रतियोगितावच्छेदकता घटक संसर्गस्य सर्वसम्मततया परमावश्यक मेवास्ति विदुषां विचार प्रवाह:।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अतएव चैत्रोन पचतीत्पादौ तादृशानुकूलत्व सम्बन्धेन पाक क्रिया विशिष्ट कृतेभाभयस्य चैत्रेतथान्वयदर्शनेन व्यभिचारस्थले साध्य विशिष्ट प्रतियोगितायां तथामयोभाव विरहेम नातिव्यातिशंकाजागर्तीति चिन्तनीयं तार्किक वरिष्ठैः।

अत्र माननीयाः मैनीषिणः स्वविचारं व्याचक्षते यत् - यादृश प्रतियोगितावच्छेदक सामान्ये यद्धर्मावच्छिन्नोभयाभावस्य कथने नैव तत्रत्यदोषाद्धारः भवेवेदेतिति तादृशावच्छेदकताद्वय प्रवेशेगुरुत्वमेव भवेत्। किन्तु सामान्यपदस्य व्यापकत्वार्थकत्वेन तादृश प्रतियोगिता वच्छेदकता सामान्ये तादृशवृत्यभावाप्रतियोगित्वरूपाधिकरणत्वस्य हेत्वधिकरणे निवेशस्यावश्यकतया तदभावभादायाऽव्याप्तिवारणं कर्तुं शक्यभेवेति सम्प्रदायविदः।

अथकेचिदित्त्थं कथयन्ति यत्-

समवायेन द्रव्यत्वस्य साध्यतायां गगनत्वादिहेतौ तादृश साध्याभावमादायाव्याप्तिः समभागच्छेत् किन्तु समवाय सम्बन्धावच्छिन्नाभावभादाय तादृशद्रव्याभाव प्रतियोगित्वस्यलघीयस्त्वेन समवेत द्रव्येस्वीकार्यतया तादृश प्रतियोगिताश्रयभिनत्वस्य गगने विद्यमानत्वात् । अन्येतु- स्वावच्छेदकता घटकसम्बन्धेन यादृशाप्रतियोगितावच्छेदकानधिकरणं हेत्वधिकरणं तादृश प्रतियोगिता सामान्येयद्धभईवच्छिन्नावच्छेदकताकत्व विशिष्टयत्सम्बन्धावच्छिन्नावच्छे-दकताकत्वाभावतया तेन सम्बन्धेन तद्धर्भावच्छिन्नव्यापकत्वं कथं न व्यलेखि।

अत्रकेन चित् विदुषा किमुच्यते किल प्रतियोगिताधर्मिकोभयाभावघटित शिरोमणि प्रतिपादित विचार पक्षे प्रमोयनवान् वाच्यत्वादित्यत्राव्याप्ति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निरासाय विशिष्टाभावं परित्यज्य स्थलेऽस्मिन् तादृशशोभयाभाव एवं प्रवेष्टव्यः।

एवं च व्यभिचारिणि साध्यवत् सामान्याभाव प्रतियोगितायामेव तादृशशोभयाभावाभावात् नाति व्याप्ति शंकाकलंक प्रवादः कादचिदपि शोभते केषा कृते भवतीतिशम् ।

समवाय सम्बन्धेन सामान्यादौ मेयसामान्याभावस्य विद्यमानत्वेन भेयत्वस्यापि प्रतियोगितावच्छेदकत्वं सुलम् । तेन समवायस्यैकत्वेन द्रव्यं जाते रित्यादौ वह्नि धूमोभयवान् वह्नेरित्यादावपि संयोगस्यापि द्वित्वावच्छिन्न प्रतियोगिताकाभावस्य विद्यमानतायाऽपि अतिव्याप्तिशंकावकाशः नावलोक्यते ।

एवं च समवायेन मेयसामान्याभाव प्रतियोगितायां प्रसिद्धस्य मेयत्वावच्छिन्नत्वस्य साध्यतावच्छेदक सम्बन्धावच्छिन्नत्वस्य चोभयाभावस्य यादृश प्रतियोगिता सामान्ये वर्तमानत्वान्नाव्याप्ति शंकावसरः समागच्छेत् ।

स्वरूप सम्बन्धेन गगनादेर्वृत्तिभत्त्वे तादृशसाध्यतावच्छेदक सम्बन्धसामान्ये चोभयाभाव विवक्षया दोषाणां पूर्वोक्तानां समाधानं स्पादेव विवक्षान्तरस्य प्रयोजनं व्यर्थमेवेति चारुतरं तथेति इत्यावश्यकता परिष्कारान्तस्येति। किन्तु घटवान् महाकालत्वादित्यत्र कालिकेन सम्बन्धेन घटीय तादृश विशेषणतायां पटत्वावच्छिन्न प्रतियोगिताकत्वाभावेन पटाभावस्य प्रतियोगिवैयधिकरण्य सम्भवात् ।

कालः प्रमेयवान् महाकालत्वादित्यादौ तादृशकालिक सम्बन्धेन प्रमेय सामान्यस्य व्याप्यवृत्तित्वेन तत्र प्रतियोगिवैयधि करणयस्यैवानुपपत्तेः। अतएव पूर्वकाल्ये दोषान्तरस्योपादानं कृतं ग्रन्थकारेणेति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यद्यपि संयोगमात्रस्य द्वित्वावच्छिन्न प्रतियोगिताकत्व विरहेण वह्निधूमोभयत्वावच्छिन्नाभावभादायैवनातिव्याप्ति सम्भवनावसरः समायतेत् । तथापि वह्निधूमोभयवान् वहनेरित्यादौ संयोगस्य द्वित्वावच्छिन्न प्रतियोगिताकत्व विरहावस्थायां समवायैकत्वस्य द्रव्यत्व प्रतियोगिकत्व गुणानुयोगिकत्वोभयवत्त्वेन द्रव्यं जातेरित्यादौ नाति व्याप्ति शंकाकलंकावकरः कदाचिदपि समुपस्थितो भवेदिति विदुषां सरणिः।

एतावता वाक्य वैशिष्टस्येन विज्ञायतेऽस्माभिः यत्-

सम्बन्धमात्रस्यैक प्रतियोगिताकापरानुयोगिक सम्बन्धत्व मात्र वैशिष्टस्येन वह्नि धूमोभयवान् इत्यत्र वह्निधऊमोभयत्वावच्छिन्न प्रतियोगिक सम्बन्धस्य नितान्तम प्रतीति वलादेव तादृश प्रतियोगिकत्वस्य लक्षणाघटकत्वेन वह्निनधूमोमय वान् वह्नेरित्यत्र नाति व्याप्तिः प्रकारित्वादेः सम्बन्धत्वे मानाभावादितिप्रागवेस्पष्टीकृतं तावदस्माभिः।

●

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जन्म मिति : १८.९.१९४३ ई.

पिता : श्री जयकान्त चौधरी

ठेगाना : जि. महोत्तरी, बनौलि गा.वि.स.बख्ना-४

शैक्षिक योग्यता :

क. आचार्य न्याय विषय कमेश्वर सिंह संस्कृत विश्वविद्यालय दरभंगा : १९६४ ई.

ख. पुरक आचार्य न्याय विषय त्रि.वि.वि. १९६८ ई. (P.H.D) विद्यावारिधि (म.सं.वि.) आत्मतत्व विश्लेषण

पद : प्राध्यापक म.सं.वि. अन्तर्गत हजारी जनक विद्यापीठ, जनकपुरधाम

पदक :

क. शिक्षा दिवश पुरस्कार २०४५ वि.सं.

ख. दिर्घकालिन सेवा पदक २०६५ वि.सं.

ग. महेन्द्र विद्याभूषण पदक प्रथमक श्रेणी २०५० वि.सं.

घ. विश्वविद्यालय वाट दीर्घ सेवा पदक २०५७ वि.सं.

ङ. मिथिला सांस्कृतिक केन्द्र महोत्तरी वाट सम्मान पत्र २०६२

च. उपकुलपति माधवराज गौतम वा धन्यवाद ग्यापन पत्र २०४५

छ. संस्कृत सम्मेलन एवं कार्यशाला वाट प्रमाण पत्र प्राप्त २०४२

अनुभव : प्राग्यिक परिषद सदस्या २०४४ भाद्र १८ देखि नियमित

प्रकाशक :

चौखम्बा संस्कृत पुस्तकालय

सी.के. २८/१५, ज्ञानवापी-चौक, वाराणसी - २२१००१

Ph. 0542-2401170

cspustakalaya@yahoo.com

Chaukhamba Sanskrit Pustakalaya

Jayatu Sanskritam, Kathmandu, Nepal